# गद्यं नाटकं च

COURSE CODE: B21SN01LC



UG PROGRAMME
LANGUAGE CORE
SANSKRIT

SELF LEARNING MATERIAL

SREENARAYANAGURU OPEN UNIVERSITY

SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# गद्यं नाटकं च

## Course Code: B21SN01LC

### Semester -II

# Language Core Course
# UG Programmes
# Sanskrit
# Self Learning Material

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

B21SN01LC

# गद्यं नाटकं च

SREENARAYANAGURU
OPEN UNIVERSITY

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar SGOU, Kollam.

www.sgou.ac.in

ISBN 978-81-963059-0-1

# DOCUMENTATION

## Academic Committee

Dr. C.T. Francis
Dr. Jeena George
Dr. Geetha H.
Dr. J.P. Prajith
Dr. K. Retheesh
Dr. M. Harinaryanan Mankulathillath
Dr. P.K. Somarajan
Dr. Smitha Sabu
Dr. Susanth S.
Major K.S. Narayanan
Uma A.K.

## Development of the content

Dr. G. Sahadevan, Unnikrishnan Nair S.

## Review

Content : Dr. V. Sisupala Panicker
Format : Dr. I.G. Shibi
Linguistics : Dr. G. Sahadevan

## Edit

Dr. V. Sisupala Panicker

## Scrutiny

Dr. Vincent B. Netto, Dr. Vijayarajan K.U.,
Dr. Jothilekshmi M., Dr. Sreeja J.

## Co-ordination

Dr. I.G. Shibi and Team SLM

## Design Control

Azeem Babu T.A.

## Production

March 2023

## Copyright

© Sreenarayanaguru Open University 2023

YouTube

# MESSAGE FROM VICE CHANCELLOR

Dear,

I greet all of you with deep delight and great excitement. I welcome you to the Sreenarayanaguru Open University.

Sreenarayanaguru Open University was established in September 2020 as a state initiative for fostering higher education in open and distance mode. We shaped our dreams through a pathway defined by a dictum 'access and quality define equity'. It provides all reasons to us for the celebration of quality in the process of education. I am overwhelmed to let you know that we have resolved not to become ourselves a reason or cause a reason for the dissemination of inferior education. It sets the pace as well as the destination. The name of the University centres around the aura of Sreenarayanaguru, the great renaissance thinker of modern India. His name is a reminder for us to ensure quality in the delivery of all academic endeavours.

Sreenarayanaguru Open University rests on the practical framework of the popularly known "blended format". Learner on distance mode obviously has limitations in getting exposed to the full potential of classroom learning experience. Our pedagogical basket has three entities viz Self Learning Material, Classroom Counselling and Virtual modes. This combination is expected to provide high voltage in learning as well as teaching experiences. Care has been taken to ensure quality endeavours across all the entities.

The university is committed to provide you stimulating learning ex-perience. The Language core course in Sanskrit Language for UG programmes is considered to be very special. Being a discipline with high potential of employability, the Sanskrit education requires a realistic convergence of both grammar and literature. The present course runs on this presumption and the SLM is expected to reflect it. We assure you that the university learner support services will closely stay with you for the redressal of your grievances during your studentship.

Feel free to write to us about anything that you feel relevant regarding the academic programme.

Wish you the best.

Regards,
Dr. P.M. Mubarak Pasha

01.03.2023

C O N T E N T S


| | |
|---|---|
| Block-1 कथासाहित्यमधिकृत्य सामान्यज्ञानम् | 1 |
| Unit - 1 कथासाहित्यम् | 2 |
| Unit - 2 विष्णुशर्मा | 6 |
| Unit - 3 पञ्चतन्त्रकथाः | 10 |
| Unit - 4 चन्द्रभूपतिकथा | 22 |
| Block-2अपरीक्षितकारकाद् उद्धृताः कथाः | 40 |
| Unit 1मूर्खब्राह्मणकथा | 41 |
| Unit- 2भारुण्डपक्षिकथा | 48 |
| Unit - 3मत्स्यमण्डूककथा | 54 |
| Unit- 4लोभाविष्टचक्रधरकथा | 63 |
| Block-3 नाटकसाहित्याविर्भावः, विकासः, सांकेतिकपदानि, रूपकविभागश्च इत्येतेषां सामान्यावगमनम् | 80 |
| Unit - 1रूपकविभागाः | 81 |
| Unit - 2 नाटकसाहित्यं विकासश्च | 87 |
| Unit- 3भासनाटकचक्रम् | 93 |
| Unit- 4 नाटकान्तं कवित्वम् | 104 |
| Block-4भासस्य मध्यमव्यायोगस्य सविशेषाध्ययनम् | 108 |
| Unit - 1व्यायोगस्य सविशेषता | 109 |
| Unit - 2 घटोत्कचप्रवेशः | 1109 |
| Unit - 3 मध्यमस्य रङ्गप्रवेशः | 120 |
| Unit - 4भीम-हिडिम्बीसमागमः | 132 |
| Model Question Paper Set - 01 | 142 |
| Model Question Paper Set - 02 | 145 |

BLOCK -1

# कथासाहित्यमधिकृत्य सामान्यज्ञानम्

## उद्देश्यानि (Learning Outcomes)

- प्राचीनसंस्कृतकथासंग्रहज्ञानम्।
- संस्कृतमण्डले गद्यकाव्यानां सामान्यपरिचयः।
- पञ्चतन्त्राध्ययनेन पशुपक्षिकथापरिचयः, मूल्यबोधं च।
- संस्कृतसाहित्यस्य अभिरुचिः।

## प्राक्व्यपेक्षाः (Prerequisites)

संस्कृते कथासाहित्यं मानवोत्पत्तिना आरभते। किन्तु तत्कालादारभ्य इदानीं यावत् बहूनि परिवर्तनानि सञ्जातानि। भारतीयकथासाहित्यस्य मुख्यं स्रोतः संस्कृतभाषा संस्कृतसाहित्यं च। मानवानां धार्मिक-सामाजिक-सांस्कृतिकाभिवृद्ध्यर्थं प्रेरणादायिनीः कथाः संस्कृते बहवः सन्ति। तादृशीः कथाः प्रथमं कथा - आख्यायिका इति द्विधा विभज्यन्ते। किन्तु आचार्यः दण्डी द्विसंज्ञाङ्किता सा एकैव इति अभिप्रैति।

## मुख्यपदानि (Key terms)

कथा, आख्यायिका, कथापठनस्य महत्वम्, पञ्चतन्त्रम्, हितोपदेशः, बृहत्कथा, बृहत्कथामञ्जरि, कथासरित्सागरः, जातकमाला, वेतालपञ्चविंशतिका, सिंहासनद्वात्रिंशिका, शुकसप्ततिः।

# Unit - 1

# कथासाहित्यम्

## Discussion

भारतीयकथासाहित्यस्य मुख्यं स्रोतः संस्कृतभाषा संस्कृतसाहित्यं च। मानवानां धार्मिक-सामाजिक-सांस्कृतिकाभिवृद्ध्यर्थं प्रेरणादायिनीः कथाः संस्कृते बहवः। तादृशीः कथाः प्रथमं कथा - आख्यायिका इति द्विधा विभज्यन्ते। किन्तु आचार्यः दण्डी द्विसंज्ञाङ्किता सा एकैव इति अभिप्रैति।

आबालवृद्धं जनं तोषयन्ती काचन काव्यसरणिः भवति कथा । कथायाः सुनिश्चितं दृढं लक्षणं च वक्तुं न शक्यते। विविधैः रूपैः स्वभावैः च युक्तस्य कथासाहित्यस्य लक्षणं वक्तुं पण्डिताः यत्नं कृतवन्तः आसन्। कथा न साधनं, किन्तु साध्यमेव, सा चिन्ताः रञ्जयन्ति इत्यस्मिन् कार्ये निरूपकेषु ऐक्यं वर्तते। न केवलं शिशूनां सर्वेषामपि कथाश्रवणे पठने पारायणे च तात्पर्यं वर्तते। शिशुचित्तानि हठादाकर्षयन्ति इत्यतः कथासु नैतिकता - सदाचारनिष्ठा दार्शनिकता चाधिकतया वरीवर्ति। कथायाः सर्वाङ्गीकारं समर्थयति जि.ए. योकाहाम् तथा आर्.

जि. जिप्सन् च 'अध्यापने आधुनिकप्रणाल्यः तन्त्राणि च'इत्यस्मिन् ग्रन्थे। ताभ्यां कथितं यत् - "The story can be justified for it's recreational values alone. If a story points a moral well and good, if it improves language habits, so much the better, but the story must first of all be a good story and story-telling must be worth while for it's own sake". अमेरिकादेशस्थः लेखकः एड्गर् एल्लने एवमभिप्रैति यत् - "A story in a narrative short enough to read in a single sitting, written to make an impression on the reader excluding all that does not forward that impression complete in itself ".

## कथापठनस्य महत्वम्-

कथा काचन श्रव्यकला भवति। सा यथार्थजीवितानुभवैः काल्पनिकवर्णनया पावनीभूता आनन्ददायिका च। कथापठनेन एते लाभाः।

१. कल्पनाशक्तेः विकासः।
२. जीवितरीतिभिः साकं परिचायनं, सच्चिन्ताविर्भावः, सामाजिकचिन्ताधारां, लोकोक्तिं, महद्वचनानि च ज्ञातुं प्रेरणा।
३. आदर्शनिष्ठां जीवितरीतिं च जानाति।
४. भाषास्वाधीनं, पदावलीसम्पादनं, सम्भाषणरीतिं, साहित्यं प्रति रुच्युत्पादनं, जीवितमूल्यं च ग्रहीतुं शक्यते।
५. कथामाध्यमेन दुष्करमपि विषयं सुकरया रीत्या ज्ञातुं शक्यते।

## संस्कृतभाषायां वर्तमानानां कथानां विशेषताः-

सर्वासु भाषासु कथाः सन्त्यपि संस्कृतसाहित्ये वर्तमानासु कथासु काश्चन सविषेषताः सन्ति।

**क. निश्चितं लक्ष्यम्।**

सर्वाः कथाः सोद्देशपूर्विकाः। प्रायः सर्वाः कथाः धर्मार्थकामादीन् लक्षीकुर्वन्ति।

**ख. जीवितेन निकटतमः बन्धः।**

कथायाः प्रतिपाद्यविषयः जीवितेन सहबद्धः भवेत्। जीवितप्रश्नान् सुधीरम् अभिमुखीकर्तुं प्रेरकं भवति इतिवृत्तम्।

**ग. कथोपकथनम्।**

श्रृंखलारूपेण परस्परं बन्धिताः भवेयुः काश्चन कथाः। हृदयावर्जकरूपेण कथाः परस्परपूरिताः।

**घ. भाषाशैली।**

उचिता भाषारीतिः वर्तते। नद्याः प्रवाहमिव अनर्गलं भाषा प्रवहति। सूक्तयः, महद्वचनानि, सदुपदेशाः च ललितया रीत्या कथासु दर्शनयोग्याः भवन्ति। कथाविभागे नीतिकथा इति विभागे पशुपक्ष्याश्रिता मनुष्याश्रिता चेति विभागद्वयं वर्तते। उभयत्रापि सदाचार-राजनीति-व्यवहारादीनां ज्ञानमुपदिश्यते। पञ्चतन्त्रं हितोपदेशश्च पशुपक्ष्याश्रिताः कथाः भवन्ति।

### 1.1.1 नारायणस्य हितोपदेशः

विदुषा नारायणाख्येन कृतं पञ्चतन्त्रस्य नवीनं संस्करणं भवति हितोपदेशः। हितोपदेशे चत्वारि प्रकरणानि। तेषु त्रीणि प्रकरणानि पञ्चतन्त्रस्यैव परिवर्धितरूपाणि। चतुर्थं प्रकरणं नारायणकविना रचितमेव। अत्र त्रिचत्वारिंशत् (४३) कथाः सन्ति। तासु पञ्चविंशतिः पञ्चतन्त्रात् स्वीकृताः। शेषाः ग्रन्थान्तरेभ्यः स्वीकृताः। उक्तञ्च -

**मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च।**
**पञ्चतन्त्रात्तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते।। इति।**

अत्र पञ्चतन्त्रापेक्षया पद्यानां बाहुल्यं दृश्यते। अस्य ग्रन्थस्य आङ्गलेय्यां विवर्तनं श्रीमता एड्विन् अर्नोल्ड् महाभागेन कृतम्। धवलचन्द्रस्य बङ्गनृपस्य सदसि वर्तमानः शैवभक्तः आसीत् नारायणपण्डितः। सः अष्टमे शतके जिजीव इति केचन विद्वांसः।

### 1.2.2 विद्यापतेः पुरुषपरीक्षा

मनुष्यपात्रमालम्ब्य विद्यापतिना रचितः ग्रन्थः भवति पुरुषपरीक्षा। सोऽयं राज्ञः शिवसिंहस्य सभापण्डितः आसीत्। तेन सूचितं भवति यत् -

**तस्य श्रीशिवसिंहदेवनृपतेर्विज्ञप्रियस्याज्ञया।**
**ग्रन्थं ग्रन्थिलदण्डनीतिविषये विद्यापतिव्यतनोत्।। इति।**

पुरुषपात्रप्रयोग एवास्य ग्रन्थस्य प्राधान्यम्। अस्य भाषा क्लिष्टापि सरसा दृश्यते।

### 1.1.3 गुणाढ्यस्य बृहत्कथा

उपलभ्यमानकथाग्रन्थेषु प्राचीनतमः ग्रन्थः भवति गुणाढ्यस्य बृहत्कथा। पैशाचीनामिकायाम् अपभ्रंशभाषायामेव अस्य ग्रन्थस्य रचना कृता। सोऽयं षष्ठे शतके अजायत। गुणाढ्यस्य विषयः कथासरित्सागरे उक्तमस्ति यत् सः सातवाहनस्य राज्ञः सभापण्डितः आसीत् इति। अत्र काचन कथा श्रूयते। सातवाहनः संस्कृतानभिज्ञः आसीत्। एकदा जलक्रीडायां राज्ञ्या 'मोदकैस्ताडय'इत्युक्तः सः मोदकान् आनाय्य तैः प्रहर्तुमारभत। तदा 'मा उदकैः'इति विज्ञप्तो लज्जाकुलः जातः संस्कृतं जिज्ञासुः पण्डितान् प्रार्थयामास। तदा गुणाढ्येन षड्भिर्वर्षैः प्रतिज्ञातम्। सर्ववर्मणा षड्भिर्मासैरेव कृत्वा प्रदर्शितम्। ततः गुणाढ्यः पराजितः भूत्वा राजद्वारं संस्कृतं प्राकृतं च भाषामुत्सृज्य विन्ध्याटवीं प्राप। तत्र सः काणभूतेः कथां श्रुत्वा तां पिशाचभाषायां ग्रथितवान्। सः स्वरक्तेन सप्तलक्षात्मकान् श्लोकान् विरच्य सातवाहनं समर्पितवान्। राजा पैशाच्यां लिखितत्वात् तं ग्रन्थं तिरस्कृतवान्। निराशाकुलः गुणाढ्यः स्वग्रन्थं कानने वन्यमृगाणां पुरतः वाचयित्वा अग्नौ समर्पितवान्। अन्तिमं लक्षपरिमितं विहाय सर्वे श्लोकाः विनष्टाः। सातवाहनस्य हस्ते अन्तिमं भागं सम्प्राप्तम्। तस्मिन् नरवाहनदत्तस्य चरित्रमेवावशिष्टम्।

बृहत्कथा अनेकधा प्रशस्ता। ग्रन्थस्यास्य त्रीणि संस्काराणि लभ्यन्ते - बृहत्कथाश्लोकमञ्जरी, बृहत्कथामञ्जरी, कथासरित्सागरश्च।

### 1.1.4 क्षेमेन्द्रस्य बृहत्कथामञ्जरी

सुप्रसिद्धानां कथानां संग्रहः भवति बृहत्कथामञ्जरी। अयं ग्रन्थः काश्मीरदेशस्थेन क्षेमेन्द्रेण बृहत्कथायाः सारमादाय रचित एव। सोऽयं एकादश शतके अजायत। अस्मिन् ग्रन्थे १९ अध्यायाः पञ्चशताधिकसप्तसहस्रं (७५००) श्लोकाः च भवन्ति। बृहत्कथाश्लोकसंग्रहापेक्षया काश्चिन्नवीनाः अपि कथाः संयोजिताः सन्ति। बृहत्कथायां प्रधानकथापात्रत्वेन वर्तमानः नरवाहनः अस्मिन् ग्रन्थे गौणत्वमेव वहति।

### 1.1.5 सोमदेवस्य कथाससरित्सागरः

काश्मीरदेशस्थेन सोमदेवेन बृहत्कथायाः साररूपेण कथासरित्सागरः इति नाम्ना एकः ग्रन्थः रचितवान्। सोऽयं ग्रन्थः संस्कृतकथासाहित्ये नितरां प्रसिद्धिमाप। अस्य ग्रन्थकर्तुः पितुः नाम रामः इति। अयं सोमदेवः एकादशशतके जीवितमदाधारयत्। अमुं ग्रन्थं सि.एच्.टाव्नि महाभागेन आङ्गलेयभाषायां विवर्तनं कृतम्। कथासरित्सागरे अष्टादश लम्पकाः १२८ तरङ्गाः द्वाविंशतिसहस्रश्लोकाश्च सन्ति।

### 1.1.6 आर्यशूरस्य जातकमाला

भगवन्तं बुद्धमाधारीकृत्य आर्यशूरेण रचितः ग्रन्थः भवति जातकमाला। अस्मिन् ग्रन्थे षट्त्रिंशत् कथाः सन्ति। काव्यं तु गद्यपद्योभयात्मकः काव्यमयश्च। सोऽयं चतुर्शतके जीवितवान्।

### 1.1.7 वेतालपञ्चविंशतिका

वेतालपञ्चविंशतिकायाः द्वे संस्करणे लभ्यते। एकं द्वादशशतके कालयापनं कृतेन शिवदासेन सङ्गृहीतं केवलं गद्यात्मकम्। अत्र पञ्चविंशतिः कथाः सन्ति। इमाः कथाः प्रतिष्ठानराजस्य विक्रमसेनस्य पुत्रं त्रिविक्रमसेनं कश्चित् वेतालः श्रावयति। इमाः कथाः बृहत्कथामञ्जर्यां कथासरित्सागरे च सन्ति।

### 1.1.8 सिंहासनद्वात्रिंशिका

अज्ञातकर्तृकेन केनापि विदुषा रचितः कथाग्रन्थः भवति विक्रमादित्यसम्बन्धः सिंहासनद्वात्रिंशिका। एकादशशतके संजातः इति मन्यमानेऽस्मिन् ग्रन्थे द्वात्रिंशत् कथाः सन्ति। सिंहासनमारोढुमागतं भोजं सिंहासनद्वारि वर्तमानाः अप्सररूपिण्यो पुत्तलिकाः एकैकाः कथाः कथयन्ति। अस्य ग्रन्थस्यापरं नाम भवति विक्रमार्कचरितमिति।

अस्य ग्रन्थस्य भाषान्तरीकरणं सर्वासु भारतीयभाषासु अस्ति। जनैः महदौत्सुक्येन विक्रमार्कचरितं श्रुतं च।

### 1.1.9 शुकसप्ततिः

चिन्तामणिनामकेन कविना रचितः कथाग्रन्थः भवति शुकसप्ततिः। किन्तु केचन विद्वांसः अज्ञातकर्तृकत्वेन शुकसप्ततिं गणयन्ति। द्वादशे शतके एवास्य ग्रन्थरचना संजाता इति विश्वासः। अस्मिन् ग्रन्थे सप्ततिः कथाः सन्ति। भर्तुरभावे जारेण सह सम्पर्काय उत्सुकां स्वस्वामिनीं शुकः निवारयति - प्रतिरात्रं सदाचारनिष्ठानां महतां कथाद्वारा। एवं सप्ततिः दिनानि कथाः शुकेन कथिताः। भर्तुरागमनं च सञ्जातम्।

अस्य ग्रन्थस्य भाषान्तरीकरणम् अनेकासु भाषासु सञ्जातम्। आङ्गलभाषायां अमीर् तरेक् महाशयेन कृतम्। फारसीभाषायां भाषान्तरीकरणं वर्तते। १६०० तमे वर्षे कदीरपति पालकवेहि नामकोऽपि आङ्गलभाषायां विवर्तनं कृतम्। तेलुगु-हिन्दीभाषायामपि अस्य भाषान्तरीकृताः ग्रन्थाः सन्ति।

# Unit - 2

## विष्णुशर्मा

### विष्णुशर्मणा रचितं पञ्चतन्त्रम्

विष्णुशर्मणा विरचितः ग्रन्थः भवति पञ्चतन्त्रम्। प्रायेण सर्वेषु देशेषु पाश्चात्यपौरस्त्यभेदं विना अस्य ग्रन्थस्य कथाः प्रचलिताः सन्ति। सर्वासु भाषासु वर्तमानः ग्रन्थः भवति बैबिल्। द्वितीयस्थानं पञ्चतन्त्रस्यैव।

विष्णुशर्मणः देशकालादिकमधिकृत्य विवादाः सन्त्यपि सोऽयं क्रिस्तोः चतुर्थे शतके जीवितमधारयत् इति प्रामाणिकानां मतम्। पञ्चतन्त्रे कथामुखम्, मित्रभेदम्, मित्रलाभः, लब्धप्रणाशम्, काकोलूकीयम्, अपरीक्षितकारकञ्चेति षट् प्रकरणानि सन्ति। किन्तु कथामुखं विष्णुशर्मणः वा नवेति कार्ये संशयः वर्तते। कथामुखे कथितं यत् दक्षिणदेशे महिलारोप्यनगरे अमरशक्तिः नाम राजा आसीत्। तस्य राज्ञः त्रयः पुत्राः आसन्। ते कलहप्रियाः मन्दबुद्धिमांश्च। तान् पुत्रान् अध्यापयितुं राज्ञा नियुक्तः विष्णुशर्मा इमं ग्रन्थं प्रणीतवानिति। किन्तु हितोपदेशस्य प्रस्ताविकभागे कथितमस्ति यत् भागीरथीतीरस्थस्य पाटलीपुत्रनगरस्य राज्ञः सुदर्शनस्य त्रीन् पुत्रान् विष्णुशर्मा अपाठयत् इति। 'तथा च तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं काव्यम्'इति कथनैवं ज्ञातुं शक्यते यत् केनापि कथामुखं प्रणीय पञ्चतन्त्रेण सह समायोजितमिति।

पञ्चतन्त्रस्य सप्ताधिकानि संस्कराणि सन्ति। तेषु परस्परं स्वल्पं वा बहु वा अन्तरमस्ति। पह्लवीभाषायां पञ्चतन्त्रस्य रूपान्तरं बुर्जोई नामकेन कृतम्। ततः पश्चात् सीरियाभाषायां कलिकगदम्नग नाम्ना बूदमहाशयेन भाषान्तरीकरणं कृतम्। पुनः अरबीभाषायाम् अब्दुल-इब्नुल-मोकफ्फा नामकेन कबील-व-दिम्न इति नाम्ना ग्रन्थस्य रूपान्तरं कृतम्। अरबीसंस्करणतोऽस्य यवनभाषायां पुनः इट्टली-जर्मन्-लाटिन् प्रभृतिभाषासु रूपान्तराणि संजातानि।

पञ्चतन्त्रस्था भाषा सरसा सरला च। कथाव्याजेन बालानां उपकाराय प्रणीतोऽयं ग्रन्थः वृद्धानामपि उपकारकम्। अत्र कथामनु उपकथा प्रवर्तते। पञ्चसु तन्त्रेषु ऊनसप्ततिः कथाः सन्ति। कथाः प्रायः गद्ये, नीतिवाक्यानि तु पद्ये निबद्धानि सन्ति। अयं ग्रन्थः संस्कृतसाहित्यभण्डागारस्य अमूल्यं हीरकमेव।

### पुनरावृत्तिः (Recap)

| ग्रन्थस्य नाम | ग्रन्थकर्तुः नाम | प्रधानांशाः |
|---|---|---|
| पञ्चतन्त्रम् | विष्णुशर्मा | सर्वासु लोकभाषासु भाषान्तरीकरणम्। कथामुखं विहाय काकोलूकीयम्, अपरीक्षितकारकम्। |
| हितोपदेशः | नारायणः (8th AD) | चत्वारि प्रकरणानि। मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः। आहत्य त्रिचत्वारिंशत् कथाः। |
| पुरुषपरीक्षा | विद्यापतिः (14th AD) | मनुष्यकथापात्राणि। चत्वारिंशत् कथाः। राज्ञः शिवसिंहदेवस्य सभापण्डितः। |
| बृहत्कथा | गुणाढ्यः (6th AD) | कथाग्रन्थेषु प्राचीनतमः। पैशाचीभाषायां (अपभ्रंश)। सातवाहनमहाराजस्य सभापण्डितः। सप्तलक्षकान् श्लोकान् लक्षपरिमितं श्लोकान् विहाय सर्वे श्लोकाः अग्नौ समर्पितवान्। त्रीणि संस्करणानि। |
| बृहत्कथामञ्जरी | क्षेमेन्द्रः (11th AD) | १९ अध्यायाः, ७५००० श्लोकाः। बृहत्कथायाः सारः। |
| कथासरित्सागरः | सोमदेवः (11th AD) | बृहत्कथायाः सारः। १८ लम्पकाः १२४ तरङ्काः। २२००० श्लोकाः। |
| जातकमाला | आर्यशूरः (4th AD) | बुद्धमाधारीकृत्य वर्तमानाः कथाः। ३६ कथाः। गद्यपद्योभयात्मकः। काव्यमयश्च। |
| वेतालपञ्चविंशतिका | शिवदासः (12th AD) जम्भलदत्तः | द्वे संस्करणे, एकः शिवदासेन (गद्यपद्योभयात्मकः) द्वितीयः जम्भलदत्तेन (गद्यात्मकम्)। पञ्चविंशतिः कथाः। कश्चित् वेतालःत्रिविक्रमसेनं श्रावयति। |
| सिंहासनद्वात्रिंशिका | | अज्ञातकर्तृत्वेन परिगण्यते। ३२ कथाः। अपरं नाम विक्रमार्कचरितम्। सर्वासु भारतीयभाषासु भाषान्तरीकरणं कृतम्। |
| शुकसप्ततिः | चिन्तामणिः (12th AD) केचन विद्वांसः अज्ञातकर्तृतमिति | भर्तुरभावे जारेण सह सम्पर्काय उद्युक्तां स्वस्वामिनीं शुकः धार्मिकचिन्तोद्दीपकाभिः कथाभिः कुमार्गात् निवारयति। ७० कथाः। |

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. कस्य मते 'कथा आख्यायिका च द्विसंज्ञाङ्कितः एकैव'इति?

२. ‘कवील-ब-दिम्न’इति नाम्ना अस्य ग्रन्थस्य रूपान्तरं जातम्। कस्य ग्रन्थस्य?

३. विष्मुशर्मणा रचितः ग्रन्थः कः?
४. श्रीबुद्धमाधारीकृत्य रचिताः कथाः एव अस्मिन्नन्तर्भवन्ति। कस्मिन्?

५. राजा सातवाहनस्य सभापण्डितः आसीत् सः। कः?
६. कस्य ग्रन्थे काकोलूकीयम् इति नाम्ना एकः भागः वर्तते?
७. नीतिकथासु मनुष्याश्रितः कश्चन कथाग्रन्थः अस्ति। तस्य नाम किम्?
८. प्रायेण सर्वासु विश्वभाषासु प्रचारं प्राप्तः संस्कृतकथाग्रन्थः कः?
९. अत्रत्याः कथाः प्रतिष्ठानराजस्य विक्रमसेनस्य पुत्रं त्रिविक्रमसेनं कश्चित् वेतालः श्रावयति। कुत्रस्थाः कथाः?
१०. हितोपदेशे वर्तमानानि प्रकरणानि कानि?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

१. बृहत्कथामञ्जरी।
२. विष्णुशर्मा।
३. वेतालपञ्चविंशतिका।

## निर्दिष्टाभ्यासः (Assignments)

१. विष्णुशर्मणं अधिकृत्य लिखत।
२. कथापठनस्य महत्वं प्रतिपाद्य संस्कृतभाषायां वर्तमानानां कथानां विशेषताः सूचयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. दण्डिनः।
२. पञ्चतन्त्रस्य।
३. पञ्चतन्त्रम्।
४. जातकमालायाम्।
५. गुणाढ्यः।
६. पञ्चतन्त्रे।
७. पुरुषपरीक्षा।

८. पञ्चतन्त्रम्।
९. वेतालपञ्चविंशतिकाया:।
१०. मित्रलाभः, सुहृद्भेदः, विग्रहः, सन्धिः चेति चत्वारि प्रकराणानि।

## सूचनाग्रन्थाः (References)


१. डो. जि. सहदेवन् संस्कृताध्ययनं पाठः १२. नेत्री पब्लिक्केषन्स्, तिरुवनन्तपुरम्, २००२ पुटानि १२२-१२६
२. आचार्यः लोकमणिदहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास अक्कादमी, वारणसी,२०१६, पुटानि ३७१ - ३७८
३. टि.के. रामचन्द्र अय्यर् संस्कृतसाहित्यचरित्रम्, आर्.एस्.वाध्यार् आन्ट् सण्स्, पालक्काट्, २०१८, पुटीनि १२० - १२८


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. A macdonel. *A Hitory of Sanskrit Literature* , Motilal Banarasidas, Delhi
2. A K Warder. *Indian Kavya Literature*,Vol II Motilal Banarasidas, Delhi

# Unit - 3
## पञ्चतन्त्रकथाः

### उद्देश्यानि (Learning Outcomes)

- गद्यांशानाम् अर्थग्रहणम्।
- संस्कृतसाहित्यस्य अभिरुचिः।
- कल्पनाशक्तेः विकासः।
- पञ्चतन्त्राध्ययनेन पशुपक्षिकथापरिचयः, मूल्यबोधं च।

### प्राग्व्यपेक्षाः (Prerequisites)

भो छात्राः,
अतीते एकके विष्णुशर्माणं, तस्य पञ्चतन्त्रं चाधिकृत्य सामान्यपरिचयः कृतः। अस्मिन् एकके पञ्चतन्त्रस्य रचनायै साहाय्यकं कार्यं कथामुखेन विशदयति।
अस्मिन्नेकके दश श्लोकाः चत्वारः खण्डिकाश्च सन्ति। श्रद्धया पठन्तु।

### मुख्याशयाः (Key Concepts)

प्रथमं सर्वान् देवान् स्तौति - नीतिशास्त्रकारान् प्रणमति - विष्णुशर्मणा पञ्चतन्त्रं रचितम् - राजानम् अमरशक्तिं वर्णयति - मूर्खपुत्राः न श्रेष्ठाः - अपण्डितः अभक्तिमान् पुत्रः अदुग्धदा धेनुरिव निष्प्रयोजनम् - मूर्खः पुत्रः जारसन्ततिरिव प्रतिभाति - अपण्डितः पुत्रः यस्याः अस्ति सा वन्ध्यासदृशा भवति - राजा अमरशक्तिः मन्त्रिभिः सह चर्चां करोति - सर्वशास्त्रपारङ्गतः विष्णुशर्मा - राजा विष्णुशर्माणं स्वपुत्रान् समर्पितवान् -पञ्चतन्त्रपठनस्य प्रयोजनं विशदयति।

## Discussion

**मङ्गलाचरणं द्वाभ्यां श्लोकाभ्यां निर्वहति। प्रथमं सर्वान् देवान् स्तौति।**
**श्लोकः - १**

> **ब्रह्मा रुद्रः कुमारो हरिवरुणयमाः वह्निरिन्द्रः कुबेर-**
> **श्चन्द्रादित्यौ सरस्वत्युदधियुगनगाः वायुरूर्वी भुजङ्गाः।**
> **सिद्धा नद्योऽश्विनौ श्रीर्दितिरदितिसुताः मातरश्चण्डिकाद्याः**
> **वेदास्तीर्थानि यज्ञा गण-वसु-मुनयः पान्तु नित्यं ग्रहाश्च।।**

**पदच्छेदः** - वह्निरिन्द्रः - वह्निः + इन्द्रः।

कुबेरश्चन्द्रादित्यौ - कुबेरः + चन्द्रादित्यौ।

सरस्वत्युदधिनगाः - सरस्वती + उदधिनगाः।

वायुरूर्वी - वायुः + ऊर्वी।

नद्योऽश्विनौ - नद्यः + अश्विनौ।

श्रीर्दितिरदितिसुताः - श्रीः + दितिः + अदितिसुताः।

मातरश्चण्डिकाद्याः - मातरः + चण्डिकाद्याः।

वेदास्तीर्थानि - वेदाः + तीर्थानि।

ग्रहाश्च - ग्रहाः + च।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| ब्रह्मा रुद्रः कुमारः हरिः वरुणः | - | हिरण्यगर्भः शिवः कार्तिकेयः विष्णुः वरुणदेवः |
| यमः वह्निः इन्द्रः कुबेरः | - | यमदेवः अग्निः देवराजः धनदः |
| चन्द्रादित्यौ सरस्वती | - | सोमसूर्यौ वाग्देवी |
| उदधियुगनगाः | - | समुद्रः कृतत्रेतादियुगानि पर्वताः |
| वायुरूर्वीभुजङ्गाः | - | पवनपृथ्वीसर्पाः |
| सिद्धा नद्योऽश्विनौ | - | देवविशेषाः सिद्धाः गङ्गाद्याः नद्यः अश्विन |
| श्रीर्दितिरदितिसुताः | - | लक्ष्मीः दैत्यजननीदेवाः |
| चण्डिकाद्याः मातरः वेदाः | - | चण्डीप्रभृतयः मातृवर्गाः चतुर्वेदाः |
| तीर्थानि यज्ञाः | - | काश्यादीनि पुण्यक्षेत्राणि यागाः |
| गण-वसु-मुनयः | - | शिवानुचराः अष्टसंख्याकाः वसवः व्यासादयः |
| ग्रहाः च नित्यं पातु | - | नवग्रहः च सततम् अस्मान् रक्षतु। |

**सारः** - ब्रह्म-शिव-कार्तिकेय-विष्णु-वरुण-यम-अग्निदेवाः देवेन्द्र-धनद-सोमसूर्याः-सरस्वती-कृतादीनि युगानि, पर्वत-वायु-सर्प-सिद्धपुरुषाः, नद्यः, अश्विनिकुमारौ, लक्ष्मीः, शिवानुचराः अष्टवसवः, व्यासादयः महर्षयः नवग्रहाः च नित्यं अस्मान् रक्षन्तु।

**श्लोकः - २**

**नीतिशास्त्रकारान् प्रणमति।**

**मनवे वाचस्पतये शुक्राय पराशराय ससुताय।**
**चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः।।**

**पदच्छेदः** - नमोऽस्तु - नमः +अस्तु।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| मनवे वाचस्पतये शुक्राय | - | मनुस्मृतिकाराय बृहस्पतये दैत्याचार्याय शुक्राचार्याय |

| | | |
|---|---|---|
| ससुताय पराशराय | - | व्याससहिताय पराशरमुनये |
| विदुषे चाणक्याय | - | पण्डिताय कौटिल्याय |
| नयशास्त्रकर्तृभ्यः च | - | नीतिशास्त्रकर्तृभ्यः च |
| नमोऽस्तु | - | प्रणतिरस्तु। |

**सारः** - मनवे देवगुरवे असुरगुरवे व्यासाय पराशराय पण्डिताय कौटिल्याय नीतिशास्त्रविशारदेभ्यः नमः अस्तु।

**व्याकरणकार्यम् -** नमः इत्यस्य योगे चतुर्थी विभक्तिः।

यथा - मनवे नमः, वाचस्पतये नमः, शुक्राय नमः इत्यादि।

**श्लोकः - ३**

**सकलशास्त्रपारङ्गतेन विष्णुशर्मणा पञ्चतन्त्रं रचितम्।**

**सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम्।**
**तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम्।।**

**पदच्छेदः** - विष्णुशर्मेदम् - विष्णुशर्मा + इदम्।

पञ्चभिरेतच्चकार - पञ्चभिः + एतत् + चकार।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| जगति | - | अस्मिन् लोके |
| विष्णुशर्मा | - | अस्य ग्रन्थस्य कर्ता |
| सकलार्थशास्त्रसारं | - | सर्वार्थशास्त्राणां तत्त्वं |
| समालोक्य पञ्चभिः तन्त्रैः | - | समालोच्य पञ्चभिः भागैः |
| एतत् सुमनोहरं शास्त्रं | - | इदं नीतिशास्त्रं |
| चकार | - | रचितवान् |

**सारः -** सर्वशास्त्रपारंगतः नीतिशास्त्रविशारदः विष्णुशर्मा पञ्चभिः तन्त्रैः युक्तं मनोहरं पञ्चतन्त्रं रचितवान्।

**खण्डिका - १**

**राजानम् अमरशक्तिं वर्णयति।**

तद्यथानुश्रूयते - अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम्। तत्र सकलार्थिकल्पद्रुमः प्रवरमकुटमणिमरीचिमञ्जरीचर्चितचरणयुगलः सकलकलापारङ्गतोऽमरशक्तिः नाम राजा बभूव। तस्य त्रयः पुत्राः परमदुर्मेधसो बहुशक्तिरुग्रशक्तिरनन्तशक्तिश्चेति नामानो बभूवुः। अथ राजा तान् शास्त्रविमुखानवलोक्य सचिवानाहूय प्रोवाच - 'भोः ज्ञातमेतद्भवद्भिर्यन्ममैते पुत्राः शास्त्रविमुखा विवेकरहिताश्च। तदेतान्पश्यतो मे महदपि राज्यं न सौख्यमावहति।'

**व्याख्या - तदेति।**

तत् यथा अनुश्रूयते - तद्यथाऽनुश्रूयते। अस्ति - अस भुवि-पर-लट्-प्रपु-ए.व। अस्ति - स्तः - सन्ति।

तत्र - तस्मिन् स्थले। सकलार्थकल्पद्रुमः सकलानां सर्वेषाम् अर्थिनां याचकानां कल्पद्रुमः इव कल्पवृक्षः इव। प्रवराणां महतां राज्ञां मकुटमणीनां किरीटरत्नानां या किरणावल्यः ताभिः चर्चितं रञ्जितं यत् पादयुगलम्। सकलाः सर्वाः याः कलाः विद्याः तासां पारंगतः प्राप्तः। तस्य अमरशक्तेः। परमदुर्मेधसः अतिदुर्बुद्धयः। अथ अनन्तरम्। भोः हे। तत् + एतान् - तदेतान्। तत् तस्मात्।

**संक्षेपः** - दक्षिणदेशे महिलारोप्यं नाम नगरमस्ति। तत्र याचकानां कल्पवृक्ष इव, अनेकैः सामन्तराजभिः पूज्यमानः अमरशक्तिः नाम राजा आसीत्। सः सर्वशास्त्रपारंङ्गतः आसीत्। तस्य त्रयः पुत्राः। बहुशक्तिः, उग्रशक्तिः, अनन्तशक्तिः चेति। ते पुत्राः अतिदुर्बुद्धयः आसन्। शास्त्रानभिज्ञान् तान् वीक्ष्य एकदा राजा अमात्यान् एवमुवाच। मम पुत्राः शास्त्रविमुखाः विवेकशून्याः च भवन्ति। अतः राजसुखं नानुभवामि इति।
अथवा साध्विदमुच्यते -

**श्लोकः -४ मूर्खपुत्राः न श्रेष्ठाः।**

**अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम्।**
**यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत्।।**

**पदच्छेदः** - यतस्तौ - यतः + तौ।
यावज्जीवम् - यावत् + जीवम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अजातमृतमूर्खेभ्यः (पुत्रेभ्यः) | - | पुत्ररहित-मृत-मूर्खपुत्रेभ्यः |
| मृताजातौ पुत्रौ वरम् | - | मृतः अजातः च सुतौ मनाक्प्रियौ |
| यतः तौ स्वल्पदुःखाय | - | हि तौ मृताजातपुत्रौ अल्पकालदुःखाय |
| जडः यावत् जीवं दहेत् | - | मूर्खपुत्रः जीवावसानं यावत् दुःखं जनयेत्। |

**सारः** - पुत्ररहित-मृत-अजातपुत्रेभ्यः मृतः अजातः च पुत्रौ वरं भवति। हि तौ अल्पकालमेव दुःखं जनयतः। मूर्खपुत्रास्तु आजीवनं दुःखं जनयेयुः।

**श्लोकः - ५**

**रूपवान् धनवान् अपि पुत्रः नाभिकाम्यः**
**वरं गर्भस्रावो वरमृतुषु नैवाभिगमनम्।**
**वरं जातः प्रेतो वरमपि न गर्भेषु वसति-**
**र्न चाविद्वान्रूपद्रविणयुक्तोऽपि तनयः।।**

**पदच्छेदः** - नैवाभिगमनम् - न + एव +अभिगमनम्।
कन्यैव - कन्या + एव।
वसतिर्न - वसतिः + न।
चाविद्वान् - च +अविद्वान्।

रूपद्रविणयुक्तोऽपि - रूपद्रविणयुक्तः + अपि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| गर्भस्रावः वरं | - | अकाले गर्भनिःसरणं मनाक्प्रियः |
| ऋतुषु अभिगमनं नैव वरं | - | ऋतुकाले स्त्रीसङ्गमः नैव वरं |
| जातः प्रेतः वरं | - | उत्पन्नः पुत्रः मृतोऽपि मनाक्प्रियः |
| भार्या वन्ध्या वरं | - | कलत्रम् अप्रसवा अपि मनाक्प्रियम् |
| गर्भेषु वसतिः अपि वरं | - | गर्भाद् अनिःसरणमपि मनाक्प्रियः |
| रूपद्रविणयुक्तः अपि तनयः | - | रूपवान् सौन्दर्यवान् धनवान् अपि पुत्रः |
| च अविद्वान् (चेत्) | - | मुर्खः पुत्रः चेत् (न वरम्)। |

**सारः** - सौन्दर्यवान् धनवान् अपि पुत्रः अविद्वान् चेत् तद् अतीव खेदकरं दुस्सहं च। तस्मादपि वरमेव अकाले गर्भनिःसरणं, ऋतुकाले स्त्रीसमागमः, जातः पुत्रः मृतः, भार्या अप्रसवा सती, गर्भात् अनिस्सरणञ्च।

**श्लोकः - ६**

**अपण्डितः अभक्तिमान् पुत्रः अदुग्धदा धेनुरिव निष्प्रयोजनम्।**

**किं तया क्रियते धेन्वा या न सूते न दुग्धदा।**
**कोऽर्थः पुत्रेण जातेन यो न विद्वान्न भक्तिमान्।।**

**पदच्छेदः** - कोऽर्थः - कः + अर्थः।

यो न - यः + न।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| यः न विद्वान् न भक्तिमान् | - | यः पुत्रः अविद्वान् भक्तिरहितः च |
| जातेन पुत्रेण कः अर्थः | - | तादृशेन पुत्रेण किं प्रयोजनम्? |
| या न सूते न दुग्धदा | - | या धेनुः न प्रसूते न पयस्विनी |
| तया धेन्वा किं क्रियते? | - | तादृश्या धेन्वा किं प्रयोजनम्? (न प्रयोजनमित्यर्थः) |

**सारः** - यः अविद्वान् अभक्तिमान् च पुत्रः, तेन पुत्रेण किं प्रयोजनम्? या धेनुः न प्रसूते न पयस्विनी, तादृश्या धेन्वा किं प्रयोजनम्?

**श्लोकः - ७**

**मूर्खः पुत्रः जारसन्ततिरिव प्रतिभाति।**

वरमिह वा सुतमरणं मा मूर्खत्वं कुलप्रसूतस्य।
येन विबुधजनमध्ये जारज इव लज्जते मनुजः।।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| इह सुतमरणं वरं वा | - | अस्मिन् लोके पुत्रनिधनं श्रेष्ठं वा |
| कुलप्रसूतस्य मूर्खत्वं मा | - | सत्कुलजातस्य अविद्यत्वं न भवतु |
| येन मनुजः विबुधजनमध्ये | - | येन मूर्खत्वेन मानवः पण्डितसमितौ |

जारज इव लज्जते - जारात् जायते इति जारजः (उपपतिजः) इव लज्जाकुलः भवेत्।

**सारः -** अस्मिन् लोके सत्कुलजातस्य मूर्खत्वात् वरमेव भवति सुतमरणम्। हि पण्डितजनसभायां मूर्खपुत्रेण मानवः जारजः इव लज्जाकुलः भवेत्।

**श्लोकः - ८**

**अपण्डितः पुत्रः यस्याः अस्ति सा वन्ध्यासदृशा भवति।**

**गुणीगणगणनारम्भे न पतति कठिनी ससंभ्रमा यस्य।**
**तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति।।**

**पदच्छेदः** - तेनाम्बा - तेन + अम्बा।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| गुणीगणगणनारम्भे | - | गुणीगणानां विद्वद्वृन्दानां संख्याप्रसङ्गे |
| यस्य | - | यस्य नाम्नि |
| कठिनी भवति | - | यस्याः प्रसिद्धिः |
| ससंभ्रमा न पतति | - | सगौरवं न लिख्यते |
| तेन अम्बा | - | तेन पुत्रेण माता |
| यदि सुतिनी | - | यदि पुत्रवती भवेत् |
| वन्ध्या कीदृशी, वद | - | अपुत्रायाः तस्याः च कीदृशी भेदः? कथय। |

**सारः** - पण्डितसमूहे यस्य पुत्रस्य नाम कदापि न दृश्यते चेत् तेन पुत्रेण सा माता पुत्रवती भवत्यपि वन्ध्यायाः समाना भवति। अर्थात् पाण्डित्यरहितस्य पुत्रस्य लाभात् श्रेष्ठं भवति अवन्ध्यत्वम्।

**खण्डिका - २**

**राजा अमरशक्तिः मन्त्रिभिः सह चर्चां करोति।**

तदेतेषां यथा बुद्धिप्रकाशो भवति यथा कोऽप्युपायोऽनुष्ठीयताम्। अत्र च मदत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती तिष्ठति। 'ततो मम मनोरथाः सिद्धिं यान्ति तथाऽनुष्ठीयताम्'इति। तत्रैकः प्रोवाच - 'देव, द्वादशभिर्वर्षैर्व्याकरणं श्रूयते। ततो धर्मशास्त्राणि मन्वादीनि, अर्थशास्त्राणि चाणक्यादीनि, कामशास्त्राणि वात्स्यायनादीनि। एवं च ततो धर्मार्थकामशास्त्राणि ज्ञायन्ते'। ततः 'प्रतिबोधनं भवति'। अथ तन्मध्यतो सुमतिर्नाम सचिवः प्राह - 'अशाश्वतोऽयं जीवितव्यविषयः प्रभूतकालज्ञेयानि शब्दशास्त्राणि। तत्संक्षेपमात्रं शास्त्रं किंचिदेतेषां प्रबोधनार्थं चिन्त्यतामिति'। उक्तं च यतः -

**व्याख्या - तदेति।**

यथा - तथा - येन प्रकारेण तेन। बुद्धिप्रकाशः बुद्धेः ज्ञानस्य प्रकाशः उदयः। मया दत्तां मद्दत्ताम्। मया अमरशक्तिना। वृत्तिं - जीवनोपायभूतां सम्पत्तिम्। मम-दकारान्तः -त्रिषु लिङ्गेषु समानः-अस्मद्-ष-ए व। मम (मे) - आवयोः (नौ) - अस्माकं (नः)। ततः - तस्मात् (अत्र पण्डितानां पञ्चत्या) पञ्चशती - ५००। मनोरथाः कामाः। प्रोवाच - प्र + ब्रूञ् व्यक्तायां वाचि-पर-लिट्-प्रथमपुरुषएकवचनम्। प्रोवाच - प्रोचतुः - प्रोचुः। श्रूयते पठ्यते। मनु

आदीनि मन्वादीनि। ततो धर्मार्थकामशास्त्राणि - ततः + धर्मार्थकामशास्त्राणि। प्रतिबोधनं - ज्ञानं (पाण्डित्यम्)।

भवति - भू सत्तायाम्-पर-लट्-प्रपु-ए व। भवति - भवतः - भवन्ति। सुमतिर्नाम - सुमतिः + नाम। अशाश्वतः अनित्यः। जीवितव्यविषयः - जीवनकालः। प्रभूतकालज्ञेयानि - बहुकालवेद्यानि। शब्दशास्त्राणि - व्याकरणशास्त्राणि। शास्त्रं - अ-नपुं-प्र-ए व। शास्त्रम् - शास्त्रे - शास्त्राणि।

**संक्षेपः** - (राजा अमरशक्तिः सचिवान् उवाच) अतः मम पुत्राणां बुद्धेः विकासः यथा भवति तथा क्रियताम्। मामाश्रयित्वा पञ्चाशती विदूषः सन्ति किल। मम इच्छानुसारं यत्नः क्रियताम्। तदा एकः सचिवः उवाच - 'द्वादशवर्षेण व्याकरणपठनं, पुनः धर्मशास्त्राणि मन्वादीनि इतरशास्त्राणि च। तदा ज्ञानोदयः जायते'। तदा सुमतिः नाम मन्त्री एवमुवाच - 'जीवनकालः अनश्वरः। पूर्वनिर्दिष्टानि शास्त्राणि पठितुं बहुकालः आवश्यकः। अतः शास्त्राणां संक्षेपः कार्यः। तदर्थं चिन्तयताम्'इति।

**श्लेकः - ९**

**शास्त्रसारमेव गृहीतव्यम् इति मन्त्रिणः सुमतेरभिप्रायः।**

**अनन्तसारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः।**
**सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात्।।**

**पदच्छेदः -** तथायुर्बहवश्च - तथा + आयुः + बहवः च।

ततो ग्राह्यम् - ततः + ग्राह्यम्।

हंसैर्यथा - हंसैः + यथा।

क्षीरमिवाम्बुमध्यात् - क्षीरम् + इव + अम्बुमध्यात्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| शब्दशास्त्रम् अनन्तसारं किल | - | व्याकरणम् अशेषं निश्तितं |
| तथा आयुः स्वल्पं | - | किन्तु जीवनकालं क्षणस्थायि |
| बहवः विघ्नाः च | - | अनेके अन्तरायाः सम्भवन्ति च |
| ततः यथा हंसैः अम्बुमध्यात् | - | तस्मात् यथा हंसाः क्षीरमिश्रिता जलमध्यात् सारं क्षीरं सारभूतम् इव पयः गृह्यन्ते |
| (तथा जनैः) फल्गु अपास्य | - | तथा जनाः असारं त्यक्त्वा |
| (क्षीरं) गृह्यन्ते | - | दुग्धं गृह्णति। |

**सारः** - अतिविपुलं भवति व्याकरणशास्त्रम्। जीवनकालः अल्पः। मध्ये बहवः विघ्नाः च जायन्ते। यदा क्षीरमिश्रितात् जलात् हंसः जलमुपेक्ष्य सारभूतं क्षीरं गृह्णाति तदा उत्कृष्टं वस्तु गृहीतव्यम्।

**खण्डिका - ३**

**सर्वशास्त्रपारङ्गतः विष्णुशर्मा।**

तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रपारङ्गतः छात्रसंसदि लब्धकीर्तिः। तस्मै समर्पयतु एतान्। स नूनं द्राक्प्रबुद्धान् करिष्यति इति। स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच - 'भो भगवन्, मदनुग्रहार्थमेतानर्थशास्त्रं प्रति द्रागयथानन्यसदृशान् विदधासि, तथा कुरु। तदाहं त्वां शासनशतेन योजयिष्यामि'। अथ विष्णुशर्मा तं राजानमूचे - 'देव, श्रूयतां मे तथ्यवचनम्। नाहं विद्याविक्रयं शासनशतेनापि करोमि। पुनरेतांस्तव पुत्रान्मासषट्केन यदि नीतिशास्त्रज्ञान्न करोमि, ततः स्वनामत्यागं करोमि। किं बहुना? श्रूयतां ममैष सिंहनादः। नाहमर्थलिप्सुर्ब्रवीमि। ममाशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य न किंचिदर्थेन प्रयोजनम्। किन्तु त्वत्प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि। तल्लिख्यतामद्यतनो दिवसः। यद्यहं षण्मासाभ्यन्तरे तव पुत्रान्नयशास्त्रं प्रत्यनन्यसदृशान्न करिष्यामि, ततो नार्हति देवो देवमार्गं सन्दर्शयितुम्।'

**व्याख्या - तत्रेति।**
अस्ति - वर्तते। अस भुवि -पर-लट्-प्रपु-ए व। अस्ति - स्तः - सन्ति। छात्रसंसदि - छात्रसभायाम्। एतान् एतान् राजकुमारान्। एतान् - द-पु-द्वि-ब व। एतं (एनं) - एतौ (एनौ) - एतान् (एनान्)। द्राक् - झटिति। प्रबुद्धान् - ज्ञानसम्पन्नान्। तदाकर्ण्य - तत् + आकर्ण्य। आकर्ण्य - श्रुत्वा। मदनुग्रहार्थम् - मम अनुग्रहार्थम्। अनन्यसदृशान् - असाधारणान्। त्वां - भवन्तं विष्णुशर्माणं। भवन्तम् - त-पु-द्वि-ए व। भवन्तं - भवन्तौ - भवतः। शासनशतेन - शतं ग्रामसम्पद्दानेन। तं - द-पु-द्वि-ए व। तं - तौ - तान्। मे - मम। विद्याविक्रयः - विद्यायाः विक्रयः। पुनरेतांस्तव - पुनः + एतान् + तव। किं बहुना - किम् अधिकम्। अधिकतया वक्तव्यस्यावश्यकता नास्ति। ममैषः - मम + एषः। सिंहनादः - सिंहवद् नादः (सदर्पोक्तिः)। नाहमर्थलिप्सुर्वदामि - न + अहम् + अर्थलिप्सुः + वदामि। अर्थाय लिप्सुः - अर्थलिप्सुः। अर्थं - धनम्। लब्धुम् इच्छुः- लिप्सुः। अशीतिवर्षस्य - अशीतिवर्षवयस्कस्य। अशीतिः - ८०। व्यावृत्तसर्वेन्द्रियार्थस्य - इन्द्रियभोग्यवस्तुषु निःस्पृहस्य। सरस्वतीविनोदं - सरस्वत्याः (वाग्देव्याः) विनोदं - मनोरञ्जनम्। अद्यतनो दिवसः - अद्यतनः + दिवसः। षण्मासाभ्यन्तरे - षट् मासानां मध्ये। देवः - जगदीश्वरः। देवमार्गं - स्वर्गपथम्। सन्दर्शयितुं - अवलोकयितुम्। न अर्हति - न युज्यते।

**संक्षेपः -** अस्यां सभायां प्रशस्तः सर्वशास्त्रपारंगतः विष्णुशर्मा नाम ब्राह्मणः अस्ति। तव पुत्रान् विष्णुशर्मणे ददातु। सः तान् ज्ञानसम्पन्नान् करिष्यति। तदा राजा विष्णुशर्माणम् एवं प्रार्थितवान्। 'मम पुत्रान्, भवान् अर्थशास्त्रं पाठयतु। तुभ्यं शतग्रामसम्पदं दास्यामि'। तदा विष्णुशर्मा राजानमेवमवदत्। 'हे राजन्, शतग्रामसम्पदा विद्याविक्रयं नेच्छामि। किन्तु तव पुत्रान् षण्मासेन नीतिशास्त्रज्ञान् करिष्यामि। नाहं धनलालसः। इन्द्रियभोग्यवस्तुषु निःस्पृहस्य मम धनेन किं प्रयोजनम्? किन्तु तव कार्यार्थं शास्त्रचर्चया मनोरञ्जनं करिष्यामि। यदि अद्य प्रभृति षट्मासेन तव पुत्रान् नीतिशास्त्रज्ञान् न करिष्यामि तर्हि परलोकेऽपि मम सद्गतिं जगदीशः न विदधातु'।

**खण्डिका -४**
**राजा विष्णुशर्माणं स्वपुत्रान् सर्पपितवान्।**
अथासौ राजा तां ब्राह्मणस्यासंभाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सादरं तान्कुमारान्समर्प्य परां निर्वृत्तिमाजगाम। विष्णुशर्मणापि तानादाय तदर्थं मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-

अपरीक्षितकारकाणि चेति पञ्च तन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः। तेऽपि तानधीत्य मासषट्केन यथोक्ताः संवृत्ताः। ततः प्रभृत्येतत्पञ्चतन्त्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तम्। किं बहुना -

**व्याख्या - अथेति।**

राजा अमरशक्तिः। राजन् शब्दः -न-पु-प्र-ए व। राजा - राजानौ - राजानः। निर्वृत्तिं - सन्तोषं। तानादाय - तान् + आदाय। तदर्थं - तेषां राजकुमाराणां कृते। तान्यधीत्य - तानि +अधीत्य। तानि तन्त्राणि। तानि - द- नपुं-तद् शब्दस्य प्र-ब व। तत् - ते - तानि। यथोक्ताः - यथा कथिताः(पण्डिताः)। प्रभृत्येतत् - प्रभृति + एतत्। प्रवृत्तम् - प्रचारितम्। किं बहुना - किमधिकेन कथनेन।

**संक्षेपः** - विष्णुशर्मणः कठिनप्रतिज्ञां श्रुत्वा सन्तुष्टः राजा अमरशक्तिः स्वस्य कुमारान् ब्राह्मणाय समर्पितवान्। विष्णुशर्मा राजकुमाराणां कृते मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि चेति पञ्च तन्त्राणि विरच्य राजपुत्रान् अधीतवान्। ते कुमाराः षट्मासेन पञ्चतन्त्रम् अधीत्य पण्डिताः बभूवुः। ततः आरभ्य पञ्चतन्त्रं नामकं नीतिशास्त्रं बालावबोधनार्थं भूतले प्रसिद्धिं प्राप।

**श्लोकः - १०**

**पञ्चतन्त्रपठनस्य प्रयोजनं विशदयति।**

**अधीते य इदं नित्यं नीतिशास्त्रं श्रृणोति च।**
**न पराभवमाप्नोति शक्रादपि कदाचन।।**

**पदच्छेदः** - य इदम् - यः + इदम्।
शक्रादपि - शक्रात् + अपि।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| यः इदं नित्यं | - | यः जनः इदं पञ्चतन्त्रं नाम नीतिशास्त्रं |
| अधीते श्रृणोति च | - | प्रत्यहं पठति आकर्णयति च |
| न कदाचन शक्रादपि | - | स कदापि इन्द्रादपि |
| पराभवमाप्नोति | - | पराजयं न प्राप्नोति। |

**सारः** - यः हि जनः इदं पञ्चतन्त्रं नाम नीतिशास्त्रं प्रत्यहं पठति आकर्णयति च सः कदापि इन्द्रादपि पराजयं न प्राप्नोति।

## पुनरावृत्तिः (Recap)

- दक्षिणदेशे महिलारोप्ये जनपदे अमरशक्तिः नाम राजा आसीत्।
- सः दानदयादिशीलः सर्वशास्त्रपारंगतश्च आसीत्। तस्य त्रयः पुत्राः।
- बहुशक्तिः, उग्रशक्तिः, अनन्तशक्तिः चेति।
- ते पुत्राः शास्त्रविमुखाः अलसाश्चासन्।

- अतः राजा अतीव दुःखितः बभूव।
- एकदा सचिवान् समाहूय ज्ञानरहितान् पुत्रान् अपेक्ष्य अपुत्रत्वं मरणत्वं च श्रेष्ठमिति उक्त्वा तत्परिहारार्थं किं कर्तव्यमिति आलोचितवान्।
- तदा कश्चन सचिवः व्याकरणशास्त्रं, धर्मशास्त्रं पुनः नीतिशास्त्रं च पठनाय निर्देशः दत्तः।
- तदा सुमतिः नाम सचिवः अल्पेन कालेन नीतिशास्त्रं पाठयितुं सर्वशास्त्रपारंगतेन ब्राह्मणेन विष्णुशर्मणा शक्यते इत्यवदत्।
- राजा विष्णुशर्माणमाहूय स्वस्य पुत्रान् नीतिशास्त्राभिज्ञान् कर्तुं प्रार्थयत।
- शतग्रामसम्पद् दास्यामीति अवदत्।
- तच्छ्रुत्वा विद्याक्रयेण शतग्रामसम्पद् नेच्छामि, नाहमर्थलिप्सुः।
- भवतः पुत्रान् षण्मासपर्यन्तेन सरस्वतीचर्चया अनन्यसदृशान् करिष्यामि।
- नो चेत् परलोके मम सद्गतिं न विदधातु इत्युत्तरम् अदात्।
- राज्ञा विष्णुशर्मणे लब्धाः पुत्राः षट्मासेन मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि इति पञ्च तन्त्राणि पठित्वा पण्डिताः समाजायन्त।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. अमरशक्तेः मते के न श्रेष्ठाः?
२. सर्वशास्त्रपारंगतः ब्राह्मणः कः?
३. अपण्डितः अभक्तिमान् पुत्रः किमिव भवति?
४. कति कालेन अमरशक्तेः कुमाराः नीतिशास्त्रविशारदाः बभूवुः?
५. वेदास्तीर्थानि - इत्यस्य पदच्छेदः कः?
६. राजसभायां विष्मुशर्मा नीतिशास्त्रपारंगतः इति कः सूचितवान्?
७. लिप्सुः इत्यस्य विग्रहः कः?
८. विदुषे नमः - व्याकरणकार्यं किम्?
९. पञ्चभिः तन्त्रैः एतत् सुमनोहरं तन्त्रं रचितवान् - किं तस्य नाम?
१०. तेन पुत्रेण सा माता पुत्रवती भवत्यपि वन्ध्यायाः समाना - कीदृशेन पुत्रेण?

## एकैकया खण्डिकया उत्तराणि लिखत।
## (Answer the following questions in a paragraph)

१. सभायां विष्णुशर्मणः तथ्यवचनम्।
२. अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम्। यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत्।

## निर्दिष्टाभ्यासः (Assignment)

| |
|---|
| १. पञ्चतन्त्रस्य प्राधान्यम्। |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. अविद्वांसः पुत्राः।
२. विष्णुशर्मा।
३. अदुग्धा धेनुरिव।
४. षट्मासेन।
५. वेदाः तीर्थानि।
६. सचिवः सुमतिः।
७. लब्धुम् इच्छुः लिप्सुः।
८. नमः इत्यस्य योगे चतुर्थीविभक्तिः। विदुषे इति रूपम्।
९. पञ्चतन्त्रम्।
१०. अपण्डितेन पुरुषेण।

## सूचनाग्रन्थाः (References)


१. प्रोफसर् जि. सहदेवः संस्कृताध्यापनम्, कथाशिक्षणम्, नेत्री, तिरुवनन्तपुरम्, २००२।
२. विष्णुशर्मा, पञ्चतन्त्रम्, कथामुखम्, ज्योत्स्ना-मुदुला संस्कृत हिन्दी व्याख्योपेतम्, चौखम्बा कृष्णदास् अक्कादमी,वाराणसी, २०१५
३. आचार्य लोकमणि दहालः, संस्कृतसाहित्येतिहासः, नीतिकथा - लोककथा, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी २०१६,


## अधिकवाचनग्रन्थाः (Suggested Readings)


१. आचार्य लोकमणि दहालः, संस्कृतसाहित्येतिहासः, नीतिकथा - लोककथा, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी २०१६,
२. टि.के. रामचन्द्र अय्यर् संस्कृतसाहित्यचरित्रम्, आर्. एस्. वाध्यार् आन्ट् सन्स्, पालक्काड् २०१८

# Unit - 4
## चन्द्रभूपतिकथा

### उद्देश्यानि (Learning Outcomes)

- गद्यांशानाम् अर्थग्रहणम्।
- संस्कृतसाहित्यस्य अभिरुचिः।
- कल्पनाशक्तेः विकासः।
- पञ्चतन्त्राध्ययनेन पशुपक्षिकथापरिचयः, मूल्यबोधं च।

### प्राग्व्यपेक्षाः (Prerequisites)

हे छात्राः,
विष्णुशर्मणः पञ्चतन्त्रम् अधिकृत्य अतीते एकके पठितम्। पञ्चतन्त्रेषु अन्तिमं तन्त्रं भवति अपरीक्षितकारकम्। तस्मिन् कथाभागे वर्तमाना कथा भवति चन्द्रभूपतिकथा। श्रद्धया पठन्तु।

### मुख्याशयाः (Key Concepts)

वानरयूथाधिपः वानरान् उपदिशति - मेषसूपकारकलहे वानरनाशः जायेत - कलहायमाने गृहे वासः नोचितः - एतत् राजगृहं विहाय वनगमनमुचितमिति वृद्धवानरः - तव बुद्धिमान्द्यमेव सञ्जातमिति मदोद्धताः वानराः अवदन् - भाविनि कुलक्षयमागमिष्यति इत्यतः वृद्धवानरः वनं गमिष्यति - वानरवसया अश्वस्य वह्निदाहस्य परिसमाप्तिः जायते - राज्ञः निर्देशानुसारं वानरान् घ्नन्ति - वृद्धवानरस्य प्रतीकारप्रवर्तनम् - पौरजनानां सरसि मज्जनं राक्षसेन भक्षणं च - दुष्टे प्रतिक्रिया उचिता, राक्षसः वृद्धवानरम् अभिनन्दति - अतिलोभः न कार्यः -आपदि सुहृत्त्यागः नोचितमिति - दुर्दैवतया गृहीतः वानर इव तव वदनच्छाया संजाता।

## Discussion

**गद्यम् - १**

**वानरयूथाधिपः वानरान् उपदिशति।**

अस्ति कस्मिंश्चिन्नगरे चन्द्रो नाम भूपतिः वसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेवानेकभोजनभक्षणादिभिः पुष्टिं नयन्ति स्म। अथ वानरयूथाधिपो यः सः औशनसबार्हस्पत्यचाणक्यमतवित्तदनुष्ठाता च तान् सर्वानप्यध्यापयति स्म। अथ तस्मिन् राजगृहे

लघुकुमारवाहनयोग्यं मेषयूथमस्ति। तन्मध्यादेको जिह्वालौल्यादहर्निशं निःशङ्कं महानसे प्रविश्य यत्पश्यति तत्सर्वं भक्षयति। ते च सूपकाराः यत्किञ्चित्काष्ठं मृण्मयं भाजनं कांस्यपात्रं ताम्रपात्रं वा पश्यन्ति तेनाशु ताडयति। सोऽपि वानराणां क्षयाय भविष्यति यतोऽन्नास्वादलम्पटोऽयं मेषो महाकोपाश्च सूपकाराः यथासन्नवस्तुना प्रहरन्ति। तद्यदि वस्तुनोऽभावात्कदाचिदुल्मुकेन ताडयिष्यन्ति तदूर्णाप्रचुरोऽयं मेषः स्वल्पेनापि वह्निना प्रज्वालयिष्यति। तद्दह्यमानः पुनरश्वकुट्यां समीपवर्तिन्यां प्रवेक्ष्यति। सापि तृणप्राचुर्या ज्वलिष्यति। ततोऽश्वा वह्निदाहमवाप्स्यन्ति। शालिहोत्रेण पुनरेतदुक्तम्। यद्वानरवसायाश्वानां वह्निदाहदोषः प्रशाम्यति। तन्नूनमेतेन भाव्यमत्र निश्चयः। एवं विचिन्त्य सर्वान् वानरानाहूय रहसि प्रोवाच। यत्-

**व्याख्या - अस्तीति।**

चन्द्रो नाम - चन्द्रः + नाम। प्रतिवसति स्म - प्रत्यवसत्। 'प्रतिवसति स्म'इत्यत्र 'लट् स्मे'इति सूत्रेण स्म इत्यव्ययस्य योगे भूतकालार्थे लट् लकारः। वानरयूथं - वानराणां यूथं समूहम्। नयन्ति स्म - अनयन्। स्म योगे लट्। औशनस-बार्हस्पत्य-चाणक्य-मतवित् - उशनस-बृहस्पति-चाणक्यानां तत्त्वानि ज्ञातवान्। सः वानरयूथाधिपः। सः - द-पु-तद् शब्दस्य प्र-ए व। सः - तौ - ते। अध्यापयति स्म - अध्यापयत्। स्म योगे लट्। राजगृहे - राज्ञः गृहे। राजभवने। लघुकुमारवाहनयोग्यं - लघुकुमारान् वोढुं योग्यम्। जिह्वालौल्यादहर्निशं - जिह्वालौल्यात् + अहर्निशम्। जिह्वायाः लौल्यं जिह्वालौल्यम्। अहर्निशं - दिनरात्रम्। सदा। यत्किंञ्चित्काष्ठं - यत् दारु पश्यति तत्। कांस्यपात्रं - ताम्रपात्रं (copper) भविष्यति - भू सत्तायम्-पर-लृट्-प्रपु-ए व। भविष्यति - भविष्यतः - भविष्यन्ति। कदाचिदुल्मुखेन कदाचित् +उल्मुखेन। उल्मुखम् - अर्धदग्धकाष्ठम्। समीपवर्तिन्यां - समीपस्थितायाम्। सापि - सा +अपि। सा (मेषा) सा - द-स्त्री-प्र-ए व। सा - ते - ताः। ततोऽश्वाः - ततः + अश्वाः। शालिहोत्रः नाम कश्चन अश्ववैद्यः। शालिहोत्रेण रचिता संहिता भवति शालिहोत्रसंहिता। दाहदोषः - दहनेन संजातः दोषः। अत्र अस्मिन् स्थले। आहूय - आह्वानं कृत्वा। आहूय - ल्यबन्तमव्ययम्।

**संक्षेपः** - चन्द्रः नाम भूपतिः आसीत्। तस्य पुत्राः वानरक्रीडासु तत्पराः आसन्। ते भक्षणादिभिः वानरान् अपोषयन्। वानराणाम् अधिपः कश्चन अवर्तत। सः उसनसमिव, बृहस्पतिरिव,चाणक्यः इव नीतिशास्त्रज्ञः। सः सर्वान् वानरान् अध्यापयञ्च। तस्मिन् राजगृहे लघुकुमारवाहनयोग्याः मेषाः च आसन्। मेषेषु अन्यतमः प्रतिदिनं महानसं प्रविश्य भक्षणसाधनानि भक्षयति। तदानीं पाचककाराः यत् पश्यन्ति तेनोपकरणेन तं ताडयन्ति। यदि वस्तुनः अभावात् सूपकाराः अर्धदग्धकाष्ठेन मेषं ताडयन्ति चेत् स्वल्पेन अग्निना ऊर्णप्रचुरः मेषः ज्वलिष्यति। सः समीपस्थायाम् अश्वकुट्यां प्रविशति। तृणप्राचुर्याश्वकुटी ज्वलिष्यति। तेन अश्वाः दग्धाः भवेयुः। अश्वानां रक्षणाय वानरवसा बहूपकारिका इति शालिहोत्रवैद्येन उक्तं च। अतः वानरान् हत्वा तेषां वसाभिः अश्वानां संरक्षणाय यतिष्ये इति।

**श्लोकः - १**

**मेषसूपकारकलहे वानरनाशः जायेत।**

**मेषेण सूपकाराणां कलहो यत्र यत्र जायते।**
**स भविष्यत्यसंदिग्धं वानराणां क्षयावहः।।**

**पदच्छेदः** - कलहो यत्र - कलहः + यत्र।

भविष्यत्यसंदिग्धम् - भविष्यति + असंदिग्धम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| मेषेण सूपकाराणां | - | मेषेण पाचककाराणां |
| यत्र कलहः जायते | - | यत्र युद्धः समजायते |
| असन्दिग्धं (तत्र) वानराणां | - | संशयं विना तत्र कपीनां |
| सः क्षयावहः भविष्यति | - | सः नाशोन्मुखः भविष्यति। |

**सारः -** यत्र मेषेण सूपकाराणां कलहः जायते तत्र नूनं वानराणां क्षयमेव संभवेत्।

**श्लोकः - २**

**कलहायमाने गृहे वासः नोचितः।**

**तस्मात्स्यात्कलहो यत्र गृहे नित्यं विकारणः।**
**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्।।**

**पदच्छेदः** - कलहो यत्र - कलहः + यत्र।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तस्मात् यत्र गृहे नित्यं | - | तत्कारणात् यस्मिन् भवने सदा |
| विकारणः कलहः स्यात् | - | कारणं विना युद्धः अवर्तत |
| जीवितं वाञ्छन् तद्गृहं | - | जीविताभिलाषी तद्भवनं |
| दूरतः परिवर्जयेत् | - | दूरतः त्यजेत्। |

**सारः -** तस्मात् यस्मिन् भवने कारणं विना सदा कलहः जायते जीविताभिलाषी तद्गृहं त्यक्त्वा अन्यत्र गमिष्यति। तथा च - अपि च।

**श्लोकः - ३**

**कलहेन प्रासादाः नश्यन्ति।**

**कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।**
**कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्।।**

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कलहान्तानि हर्म्याणि | - | प्रासादानि कलहेन नश्यन्ति |
| कुवाक्यान्तं सौहृदं च | - | कुत्सितवाक्यैः सौहार्दं नश्यति |
| कुराजान्तानि राष्ट्राणि | - | कुत्सितैः राजभिः राष्ट्राणि नश्यन्ति |
| कुकर्मान्तं नृणां यशः | - | कुत्सितैः कर्मभिः मानवानां यशः नश्यन्ति। |

**सारः -** कलहैः प्रासादानि, कुत्सितवाक्यैः सौहार्दं, कुत्सितैः राजभिः राज्यानि, कुत्सितकर्मैः मानवयशः च नश्यन्ति।

**गद्यम् - २**

**एतत् राजगृहं विहाय वनगमनमुचितमिति वृद्धवानरः।**

तद् यावत्सर्वेषां संक्षयो भवति तावदेतत् राजगृहं संत्यज्य वनं गच्छामः। अथ तत्तस्य वचनमश्रद्धेयं श्रुत्वा मदोद्धता वानराः प्रहस्य प्रोचुः। भोः, भवतो वृद्धभावात् बुद्धिवैकल्यं संजातं येनैतद्ब्रवीषि। उक्तं च -

**व्याख्या - तदिति।**

सर्वेषां वानराणाम् यावत् - तावत्। यावत् दत्तं तावत् भुक्तम्। संजातं - जातम् ।

**संक्षेपः** - तत्कारणात् राजगृहमुपेक्ष्य वनगमनमेव कार्यम्। तदा मदोद्धताः वानराः वृद्धवानरस्य वचनं तत्यजुः। भवतः बुद्धिवैकल्यं जातम्।

**श्लोकः - ८**

**तव बुद्धिमान्द्यमेव सञ्जातमिति मदोद्धताः वानराः अवदन्।**

**वदनं दशनैर्हीनं लाला स्रवति नित्यशः।**
**न मतिः स्फुरति क्वापि बाले वृद्धे विशेषतः।।**

**पदच्छेदः** - दशनैर्हीनम् - दशनैः + हीनम्।
क्वापि - क्व + अपि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| वदनं दशनैः हीनं | - | आननं दन्तहीनं |
| नित्यशः लाला स्रवति | - | नित्यं लाला आननात् स्रवति |
| क्वापि मतिः न स्फुरति | - | तादृशेषु कदापि बुद्धिः न प्रकाशते |
| विशेषतः बाले वृद्धे (च) | - | विशिष्य बाले स्थविरे च। |

**सार** : - त्वं वृद्धः असि। भवते बुद्धिः न प्रकाशते। मुखे दन्ताः न। लालारसः सदा स्रवति। बाले वृद्धे च विशिष्य बुद्धिमान्द्यं दृश्यते।

**गद्यम् - ३**

**भाविनि कुलक्षयमागमिष्यति इत्यतः वृद्धवानरः वनं गमिष्यति।**

न वयं स्वर्गसमानोपभोगान् नानाविधान् भक्ष्यविशेषान् राजपुत्रैः स्वहस्तदत्तान् अमृतकल्पान् परित्यज्य तत्राटव्यां कषायकटुतिक्तक्षाररूक्षफलानि भक्षयिष्यामः। तच्छ्रुत्वाऽश्रुकलुषां दृष्टिं कृत्वा स प्रोवाच। ‘रे रे मूर्खाः यूयमेतस्य सुखस्य परिणामं न जानीथ। पाकरसास्वादनप्रायमेतत्सुखं परिणामे विषवद्भविष्यति। तदहं कुलक्षयं स्वयं नावलोकयिष्यामि। साम्प्रतं वनं यास्यामि।’ उक्तं च -

**व्याख्या - नेति।**

स्वर्गसमानोपभोगान् - स्वर्गलोके एव उपभोगाय लब्धुं योग्यान्।
तच्छ्रुत्वाऽश्रुकलुषां - तत् + श्रुत्वा + अश्रुकलुषाम्। अश्रुकलुषाम् - अश्रुभिः कलुषाम्।
मूर्खाः - ज्ञानहीनाः। पाकरसास्वादनप्रायमेतत्सुखं - रुचिकरभक्षणेन अनुभूयमानं सुखम्।
कुलक्षयं - कुलस्य क्षयम्। वंशनाशम्। यास्यामि - गमिष्यामि। या-प्रापणे-पर-लृट्-उपु-ब व। यास्यामि - यास्यावः - यास्यामः।

**संक्षेपः -** मदोद्धताः वानराः एवमवदन्। राजकुमारैः अतिप्रीत्या दीयमानम् अमृततुल्यं भक्षणमुपेक्ष्य वनगमनं नोचितम्। तदानीं वृद्धवानरः एवमवदत् - 'हे मूढ! इदानीं पाकरसास्वादं भक्षणं विषरूपेण परिणमते। कुलनाशं द्रष्टुं नाहं शक्तः। अतः वनं गमिष्यामि'।
उक्तं च

**श्लेकः - ४**
**देशनाशं कुलनाशं च ये न पश्यन्ति ते धन्याः।**
**मित्रं व्यसनसम्प्राप्तं स्वस्थानं परपीडितम्।**
**धन्यास्ते न पश्यन्ति देशभङ्गं कुलक्षयम्।।**

**पदच्छेदः** - धन्यास्ते - धन्याः + ते।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| व्यसनसम्प्राप्तं मित्रं | - | दुःखसङ्कटे पतितं सुहृदं |
| परपीडितं स्वस्थानं | - | अन्यैराक्रमितं स्वस्थानं स्वदेशं |
| देशभङ्गं कुलक्षयं | - | देशनाशं वंशनाशं च |
| ये न पश्यन्ति ते धन्याः | - | ये प्रत्यक्षतया न अवलोकयन्ति ते भाग्यशालिनः भवन्ति। |

**सारः -** आपदि प्राप्तं मित्रम् अन्यैराक्रमितं स्वदेशं देशनाशं कुलक्षयं च ये न पश्यन्ति ते भाग्यशालिनः भवन्ति।

**गद्यम् - ८**
**राजगृहे किं सम्भूतमिति विशदयति।**

एवमभिधाय सर्वांस्तान् परित्यज्य स यूथाधिपो अटव्यां गतः। अथ तस्मिन् गतेऽन्यस्मिन्नहनि स मेषो महानसे प्रविष्टो यावत्सूपकारेण नान्यत्किञ्चित्समासादितं तावदर्धज्वलितकाष्ठेन ताड्यमानो जाज्वल्यमानशरीरः शब्दायमानोऽश्वकुट्यां प्रत्यासन्नवर्तिन्यां प्रविष्टः। तत्र तृणप्राचुर्ययुक्तायां क्षितौ तस्य प्रलुठतः सर्वत्रापि वह्निज्वालास्तथा समुत्थिता तथा केचिदश्वाः स्फुटितलोचनाः पञ्चत्वं गताः, केचित् बन्धनानि त्रोडयित्वा अर्धदग्धशरीराः इतश्चेतश्च हेषायमाणा धावमानाः सर्वमपि जनसमूहमाकुलीचक्रुः। अत्रान्तरे राजा सविषादः शालिहोत्रज्ञान् वैद्यानाहूय प्रोवाच - 'भोः प्रोच्यतामेषामश्वानां कश्चिद्दाहोपशमनोपायः'। तेऽपि शास्त्राणि सञ्चित्य प्रोचुः - 'देव, प्रोक्तमत्र विषये भगवता शालिहोत्रेण'। यत् -

**व्याख्या - एवमिति।**

सर्वास्तान् - सर्वान् + तान्। तस्मिन् गते - सति सप्तमीप्रयोगः। यथा सः अगच्छत् तथा इत्यर्थः। गतेऽन्यस्मिन्नहनि - गते +अन्यस्मिन् +अहनि। अहनि - दिने। क्षितौ - भूमौ। राजा - भूपतिः (चन्द्रः)। एषाम् - व्रणितानाम् आसन्नमरणानाम्। एषाम् - म-पु-ष-ब व।
अस्य - अनयोः (एतयोः) - एषाम्। शास्त्राणि - शालिहोत्रसंहिताशास्त्राणि (अश्वचिकित्सासम्बन्धवचनानि) । अत्र विषये - अस्मिन् विषये। अश्वसंरक्षणविषये।

**संक्षेपः -** वृद्धवानरः मदोद्धतान् वानरान् उपेक्ष्य वनं प्राप। कतिपयदिनानन्तरं सः मेषः महानसं प्रविवेश। सूपकारः प्रहरणाय सन्नद्धो बभूव। किमपि वस्तु तस्य करे न प्राप्तम्। वह्नियुक्तं अर्धदग्धं काष्ठं विना। तेन सूपकारः तं अताडयत्। तेन जाज्वल्यमानशरीरः मेषः समीपस्थायाम् अश्वकुट्यां प्रविवेश। तृणप्राचुर्यात् अश्वकुटी अग्निनावृता। केचन अश्वाः मृताः। केचन बन्धनानि त्रोडयित्वा हेषायमाणाः (हेषा इति शब्दमुत्पादयन्तः) इतस्ततः धावन्तः व्रणिताः। दुःखितः राजा शालिहोत्रज्ञान् वैद्यान् उपायमपृच्छत्। अश्वानां संरक्षणं शालिहोत्रसंहितायां कथितं किमिति अपृच्छत्।

**श्लोकः - ५**

**वानरवसया अश्वस्य वह्निदाहस्य परिसमाप्तिः जायते।**

**कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।**
**अश्वानां नाशमभ्येति तमः सूर्यादये यथा ।।**

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कपीनां मेदसा | - | वानराणां वसया |
| अश्वानां वह्निदाहमुद्भवः दोषः | - | अश्वानां वह्निजातदोषः |
| नाशमभ्येति | - | विनाशं प्राप्नोति |
| सूर्योदये तमः यथा | - | सूर्योदये अन्धकार इव। |

**सारः -** सूर्योदये तमः इव अश्वानां वह्निदाहसमुद्भवः दोषः वानरवसाय परिहर्तुं शक्यते।

**गद्यम् - ५**

**राज्ञः निर्देशानुसारं वानरान् घ्नन्ति।**

तत्क्रियतामेतच्चिकित्सितं द्राग्यावन्नेतेन दाहदोषेण विनश्यन्ति। सोऽपि तदाकर्ण्य समस्तवानरवधमादिष्टवान्। किं बहुना? सर्वेऽपि ते वानराः विविधायुधलकुटपाषाणदिभिर्व्यापादिता इति। अथ सोऽपि वानरयूथपस्तं पुत्रपौत्रभ्रातृसुतभागिनेयादिसंक्षयं ज्ञात्वा परं विषादमुपगताः। स त्यक्ताहारक्रियो वनाद्वनं पर्यटति। अचिन्तयच्च। कथमहं तस्य नृपापसदस्यानृणताकृत्येनापकृत्यं करिष्यामि। उक्तं च

**व्याख्या - तदिति।**

एतच्चिकित्सितम् - एतत् + चिकित्सितम्। अश्वानाम् सुरक्षा क्रियताम्।

तदाकर्ण्य - तत् + आकर्ण्य। आकर्ण्य - श्रुत्वा। वानरवसया अश्वानां वह्निदाहदोषः उपशमति इति श्रुत्वा। किं बहुना? - किमधिकतया कथनस्य कार्यम्? सर्वेऽपि वानराः व्यापादिताः - सर्वान् वानरान् जघ्नुः। सोऽपि– सः + अपि । सः वृद्धवानरः। वनाद्वनं प्रतिवनम्। अचिन्तयच्च - अचिन्तयत् + च। अचिन्चयत् - चिति स्मृत्याम्- णिचि-लङ्-प्रपु-ए व। अचिन्तयत् - अचिन्तयताम् - अचिन्तयन्। कथं - केन प्रकारेण।

**संक्षेपः -** अतः सर्वेषामश्वानां नाशात्पूर्वं प्रतिक्रिया कार्या। राजा सर्वान् वानरान् हन्तुं निर्देशमदात्। तदा विविधैः आयुधैः पाषाणादिभिः च वानरान् जघ्नुः। वृद्धवानरः स्वस्य पुत्रपौत्रादीनां बन्धूनां विनाशं सम्भूतमिति ज्ञात्वा नितरां दुःखितो बभूव। सः आहारमपि त्यक्त्वा वनाद्वनं सञ्चरति। कथं दुष्टाय राज्ञे प्रतिकारं कर्तुं शक्यते इति सदा चिन्तितवान्।

**श्लोकः - ७**

**अपरेण कृतं कुलापराधं यः क्षमते सः अधमः।**

**मर्षयेद्धर्षणां योऽत्र वंशजां परनिर्मिताम्।**
**भयाद्वा यदि वा कामात्स ज्ञेयः पुरुषाधमः।।**

**पदच्छेदः -** मर्षयेद्धर्षणाम् - मर्षयेत् + धर्षणाम्।

योऽत्र - यः + अत्र।

भयाद्वा - भयात् + वा।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| यः अत्र परनिर्मितां वंशजां धर्षाणां | - | यः जनः अस्मिन् लोके अन्यैः कृतां कुलसम्बन्धिनीं धर्षणां |
| भयेन कामात् वा | - | अपमानभयेन इच्छया वा |
| यदि मर्षयेत् सः | - | यदि क्षमेत् स पुरुषः |
| पुरुषाधमः ज्ञेयः | - | पुरुषेषु अधमः एव। |

**सारः -**अपरेण कृतं कुलापराधं यदि यः भयेन कामात् वा सहते तर्हि सः पुरुषाधमः एव।

**गद्यम् - ६**

**वृद्धवानरस्य प्रतीकारप्रवर्तनम्।**

अथ तेन वृद्धवानरेण कुत्रचित्पिपासाकुलेन भ्रमता पद्मिनीखण्डमण्डितं सरः समासादितम्। तद्यावत्सूक्ष्मेक्षिकयाऽवलोकयति तावद्वनचरमनुष्याणां पदपङ्क्तिप्रवेशोऽस्ति न निष्क्रमणम्। ततश्चिन्तितवान् - नूनमत्र जलान्ते दुष्टग्राहेण भाव्यम्। तत्पद्मिनीनालमादाय दूरस्थोऽपि जलं पिबामि। तथानुष्ठिते तन्मध्याद्राक्षसो निष्क्रम्य रत्नमालाविभूषितकण्ठस्तमुवाच - 'भो, अत्र सलिले प्रवेशं करोति स मे भक्ष्य'इति। तन्नास्ति धूर्ततरस्तनां त्वत्समोऽन्यो यत्पानीयमनेन विधिना पिबसि। ततस्तुष्टोऽहम् प्रार्थय हृयवाञ्छितम्। कपिराह - 'भोः

कियति ते भक्षणशक्तिः?' स आह - 'शतसहस्रायुतलक्षाण्यापि जलप्रविष्टानि भक्षयामि'। बाह्यतः श्रृगालोऽपि मां दूषयति। वानर आह - 'अस्ति मे भूपतिना सहात्यन्तं वैरम्। यद्येनां रत्नमालां मे प्रयच्छसि तत्सपरिवारमपि भूपतिं वाक्प्रपञ्चेन लोभयित्वात्र सरसि यथा प्रविशति तथा करोमि'। सोऽपि श्रद्धेयं वचस्तस्य श्रुत्वा रत्नमालां दत्वा प्राह - 'भो मित्र, यत्समुचितं भवति तत्कर्तव्यमिति'। वानरोऽपि रत्नमालाविभूषितकण्ठो वृक्षप्रासादेषु परिभ्रमञ्जनैः दृष्टः पृष्टश्च - 'भोः यूथप, भवानियन्तं कालं कुत्र स्थितः? भवतेदृग्रत्नमाला कुत्र लब्धा या दीप्तं सूर्यमपि तिरस्करोति'। वानरः प्राह - 'अस्ति कुत्रचिदरण्ये गुप्ततरं महत्सरो धननिर्मितम्। तत्र सूर्योऽर्धोदिते रविवारे यः कश्चिन्निमज्जति स धनदप्रसादादीदृग्रत्नमालाविभूषितकण्ठो निःसरति'। अथ भुभुजा तदाकर्ण्य स वानरः समाहूतः पृष्टश्च- 'भोः यूथाधिप, सत्यमेतत्? रत्नमालासनाथं सरोऽस्ति क्वापि?' कपिराह - 'स्वामिन्, एष प्रत्यक्षतया मत्कण्ठस्थितया रत्नमालया प्रत्ययस्ते। तद्यपि रत्नमालाप्रयोजनं तन्मन्या सह कमपि प्रेषय येन दर्शयामि'। तच्छ्रुत्वा नृपतिराह - 'यद्येवं तदहं सपरिजनः स्वयमेष्यामि येनं प्रभूताः रत्नमालाः सम्पद्यन्ते'। वानर आह - 'स्वामिन् एवं क्रियताम्'। तथानुष्ठिते भूपतिना सह रत्नमालालोभेन सर्वे कलत्रभृत्याः प्रस्थिताः। वानरोऽपि राज्ञा दोलाऽधिरूढेन स्वोत्सङ्गे आरोपितः सुखेन प्रीतिपूर्वमानीयते। अथवा साध्विदमुच्यते -

**व्याख्या - अथेति।**

कुत्रचित् - कस्मिंश्चित्। पातुमिच्छा - पिपासा। यावत् सूक्ष्मेकया अवलोकयति तावत् - यदा सूक्ष्मेक्षिकया अवालोकितवान् तदा। ससूक्ष्मं निरीक्षति सति। ततश्चिन्तितम् - ततः + चिन्तितम्। दुष्टग्राहः दुष्टः क्रूरजन्तुः। ग्राहः जलहस्ती इति केचित्। आदाय गृहीत्वा। पद्मिनीनालम् - कमलिन्याः नालम्। तन्मध्याद्राक्षसः- तन्मध्यात् + राक्षसः। तन्मध्यात् - सरसः मध्यात्। सलिले - जले। धूर्ततरस्त्वत्समोऽन्यः - धूर्ततरः + त्वत्समः + अन्यः। धूर्ततरः - बुद्धिमान्। ततस्तुष्टोऽहम् - ततः + तुष्टः + अहम्। तुष्टः - सन्तुष्टः। हृदयवाञ्छितम् - हृदये वर्तमानमाग्रहम्। कपिराह - कपिः + आह। वानरः अवदत्। भक्षणशक्ति - कति जनान् (प्राणिनः) भक्षयितुं शक्यते? स आह - सः + आह। सः ग्रहः आह अवदत्। भक्षयामि - भक्ष-पर-णिचि-उपु-ए व। भक्षयामि - भक्षयावः - भक्षयामः। बाह्यतः श्रृगालोऽपि मां दूषयति - जलाद्बहिः वर्तमानं श्रृगालमपि मया भक्षयितुं न शक्यते। दूषयति - दूषयतः - दूषयन्ति। दुष्-पर-णिच्-प्रपु-ए व। वानरः - वानरश्रेष्ठः (वृद्धवानरः)। आह - अवदत्। ब्रूञ् व्यक्तायां वाचि-पर-लट्-प्रपु-ए व। ब्रवीति (आह) - ब्रूतः (आहतुः) - ब्रुवन्ति (आहुः) सहात्यन्तम् - सह + अत्यन्तम्। अत्यन्तम् - अत्यधिकम्। भूपतिना सह - सह इत्यस्य योगे तृतीया। प्रयच्छसि - ददासि। प्र + यम्-पर-लट्-मपु-ए व। प्रयच्छसि - प्रयच्छथः - प्रयच्छथ। वचस्तस्य - वचः + तस्य। वचः - स-नपु-प्र-ब व। उच्यते इति वचः। वचः वाक्यम्। कर्तुं योग्यं कर्तव्यम्।

परिभ्रमञ्जनैर्दृष्टः - परिभ्रमन् + जनैः अ दृष्टः। परिभ्रमन् - परितः भ्रमणं कुर्वन् सञ्चरन्। इयन्तम् - इतः पर्यन्तम्। लब्धा - सिद्धा। महत्सरो धननिर्मितम् - महत्सरः + धननिर्मितम्। धनः कुबेरः। कश्चिन्निमज्जति - कश्चित् + निमज्जति। सः वानरः समाहूतः - तं वानरं समाह्वयन्। यूथानाम् अधिपः यूथाधिपः (वृद्धवानरः)। एतत् एतद्वृत्तन्तम्। क्वापि - क्व + अपि। क्व - कुत्र। मत्कण्ठस्थिता रत्नमाला एवात्र प्रमाणम्। मया सह -

सहयोगे तृतीया। तच्छ्रुत्वा तद् + श्रुत्वा। तद् रत्नमालावृत्तान्तम्। परिजनेन सह वर्तते इति सपरिजनः। एवं - तथैव। रत्नमालां लभते इति लोभेन रत्नमालालोभेन। स्वस्य उत्संङ्गे स्वोत्सङ्गे।
अथवा वा।

**संक्षेपः -** वृद्धवानरः इतस्ततः चरन् कस्यचन सरसः तीरं प्राप। सः पातुरिच्छुरभवत्। सूक्ष्मनिरीक्षणेन सः वानरः ज्ञातवान् यत् सरः प्रति वनचरमनुष्याणां पदपङ्क्तिप्रवेशः, न निष्क्रमणचिह्नानि। अतः जलान्ते दुष्टः ग्राहः वर्तिष्यते इति। अतः पद्मिनीनालमादाय जलपानमकरोत्। तदा जलमध्यादेकः राक्षसः प्रत्यक्षीभूय इष्टं वरं प्रष्टुमादिदेश। अनेकान् प्राणिनः हन्तुं शक्तस्य राक्षसस्य वैभवं ज्ञात्वा वानरः तेन सह सौहार्दं प्राप्य स्वकण्ठस्थितां रत्नमालां स्वीचकार। तां रत्नमालां कण्ठे धृत्वा वानरः वृक्षात् वृक्षं प्रासादात् प्रासादं सञ्चरितवान्। जनाः तं पश्यन् त्वं कुत्र आसीः? इयं माला कथं लब्धा इत्यादिकमपृच्छन्। महारण्ये कुबेरेण निर्मितं सरः वर्तते। तत्र रविवारे सूर्योदयसमये जले निमज्य उद्धरति तदा एतादृशी काचन रत्नमाला लभेत इत्यवदत्। इमां वार्तां राजा चन्द्रः अपि ज्ञातवान्। सः वृद्धवानरं समाहूय वृत्तान्तमपृच्छत्। वानरतः वृत्तान्तं ज्ञात्वा सपरिवारः राजा वृद्धवानरेण साकं सर्वेभ्यः रत्नमाला लप्स्यन्ते इति चिन्तया सरस्तीरं प्राप।

**श्लोकः - ८**

**तृष्णादेवीं स्तौति।**

**तृष्णे देवि नमस्तुभ्यं यया वित्तान्विता अपि।**
**अकृत्येषु नियोज्यन्ते भ्राम्यन्ते दुर्गमेष्वपि।।**

**पदच्छेदः** - नमस्तुभ्यम् - नमः + तुभ्यम्।

दुर्गमेष्वपि - दुर्गमेषु + अपि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| तृष्णे देवि, तुभ्यं नमः | - | हे तृष्णे देवि, नमस्ते |
| यया वित्तान्विता अपि | - | यया देव्या धनसम्पन्ना अपि |
| अकृत्येषु नियोज्यन्ते | - | कर्तुमयोग्येषु कार्येषु नियोज्यन्ते |
| दुर्गमेषु अपि भ्राम्यन्ते | - | अगम्येष्वपि स्थानेषु परिभ्राम्यन्ते। |

**सारः** - हे देवि, तृष्णे, तुभ्यं नमः। भवत्या धनसम्पन्नाः अपि कर्तुमयोग्येषु कार्येषु नियोज्यन्ते। असाध्यकार्येषु व्यापर्तुं प्रेर्यन्ते च। अधिकाधिकां तृष्णां जनहृदयेषु जनयितुं तृष्णादेवी प्रेरयति इत्याशयः। तथा च।

**श्लोकः - ९**

**मानवस्य तृष्णा सीमातीता।**

**इच्छति शती सहस्रं सहस्री लक्षमीहते।**
**लक्षाधिपस्तथा राज्यं राज्यस्थः स्वर्गमीहते।।**

**पदच्छेदः** - लक्षाधिपस्तथा - लक्षाधिपः + तथा।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| शती सहस्रं इच्छति | - | शतधनी सहस्रं धनं वाञ्छति |
| सहस्री लक्षमीहते | - | सहस्रधनी लक्षाधिपः भवितुमिच्छति |
| तथा लक्षाधिपः राज्यम् (ईहते) | - | एवं लक्षाधिपः राज्यं प्राप्तुमीहते |
| राज्यस्थः स्वर्गमीहते | - | राजा स्वर्गाधिपं वाञ्छति। |

**सारः -** शतधनी सहस्रं वाञ्छति। सहस्राधिपः लक्षाधिपं प्राप्तुमीहते। लक्षाधिपः राज्याधिपतिम् इच्छति। राज्याधिपतिः स्वर्गाधिपतिं प्राप्तुम् अभिलषति। तृष्णा अधिकाधिकं प्राप्तुं प्रेरयति।

**श्लोकः - १०**

**तृष्णा प्रतिदिनं वर्धते।**

**जीर्यन्ते जीर्यतः केशाः दन्ताः जीर्यन्ति जीर्यतः।**
**जीर्यतश्चक्षुषी श्रोत्रे तृष्णैका तरुणायते।।**

**पदच्छेदः** - जीर्यतश्चक्षुषी - जीर्यतः + चक्षुषी।

तृष्णैका - तृष्णा + एका।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| जीर्यतः केशाः जीर्यन्ते | - | वृद्धावस्थां प्राप्तस्य शिरोरोमाः जीर्णाः भवन्ति |
| जीर्यतः दन्ताः जीर्यन्ते | - | वृद्धावस्थायां प्राप्तस्य दन्ताः विगताः (नष्टाः) |
| जीर्यतः चक्षुषी श्रोत्रश्च (जीर्यन्ते) | - | वृद्धावस्थायां प्राप्तस्य नेत्रे कर्णे च जीर्णिताः |
| एका तृष्णा तरुणायते | - | तृष्णा (लोभेच्छा) तरुणवत् आचरति। |

**सारः -** वृद्धावस्थायां प्राप्तस्य केशाः धवलिताः। दन्ताः जीर्ण्य नष्टाः। नयने दर्शनशक्तिरहिते अभूताम्। श्रोत्रेन्द्रियं विकलं च। किन्तु तृष्णा एव युवत्वं प्राप्नोति।

**गद्यम् - ७**

**पौरजनानां सरसि मज्जनं राक्षसेन भक्षणं च।**

अथ तत्सरः समासाद्य प्रत्यूषसमये राजानमुवाच - 'देव, अत्रार्धोदिते सुर्येऽत्र प्रविष्टानां सिद्धिर्भवति। तत्सर्वोऽपि जनः एकदैव प्रविशतु। त्वया पुनर्मया सह प्रवेष्टव्यं येन पूर्वदृष्टस्थानम् आसाद्य प्रभूतास्ते रत्नमाला दर्शयामि'। अथ प्रविष्टास्ते लोकाः सर्वे भक्षिता राक्षसेन। अथ तेषु चिरायमाणेषु राजा वानरमाह - 'भोः यूथाधिप, किमिति चिरायते मे जनः?' तच्छ्रुत्वा वानरः सत्वरं वृक्षमारुह्य राजानमुवाच - 'भोः दुष्टनरपते, राक्षसेनान्तः सलिलस्य स्थितेन भक्षितास्ते परिजनः। साधितं मया कुलक्षयं वैरम्। तद्गम्यताम्। त्वं स्वामीति मत्वा नात्र प्रवेशितः'। उक्तं च -

**व्याख्या - अथेति।**

राजानं - चन्द्रभूपतिम्। सूर्येऽत्र - सूर्ये + अत्र। एकदैव - एकदा + एव। प्रवेष्ठव्यम् - प्रवेष्ठुं योग्यम्। सर्वे लोकाः भक्षिताः - सर्वान् लोकान् अभयत्। तेषु चिरायमाणेषु - यदा चिरायिताः तदा। किमिति चिरायते - केन

कारणेन आगमनविघ्नः संजातः? गम्यतां - गच्छ। गम्यताम् - गम्लृ-पर-कर्मणि-लोट्-प्रपु-ए व। गम्यताम् - गम्येताम् - गम्यन्ताम्। अत्र सरसि।

**संक्षेपः** - सरसः तीरं प्राप्तः वृद्धवानरः भूपतिम् उवाच। 'हे राजन्, सूर्ये अर्धोदये सर्वे सरसि निमज्जति चेत् कार्यसिद्धिः जायते। अतः भवान् अहं च पुनः निमज्जावः। परिजनाः निमज्जन्तु।' एवं सरसि निमज्जितान् सर्वान् राक्षसः भक्षितवान्। परिजनानाम् आगमनाभावे चन्द्रभूपतिः वानरयूथाधिपं कारणमपृच्छत्। तदा वानरः वृक्षमारुह्य राजानमेवमवदत्। 'हे दुष्ट, तव सर्वे परिजनाः राक्षसेन भक्षिताः। मम वैरम् इदानीं साधितप्रायम्। त्वं गच्छ। त्वं स्वामीति कारणात् तव सरसि प्रवेशनं निरुद्धम्'।

**श्लोकः - ११**

**दुष्टे प्रतिक्रिया उचिता।**

**कृते प्रतिकृतिं कुर्याद्धिंसिते प्रतिहिंसितम्।**
**न तत्र दोषो पश्यामि दुष्टे दुष्टं समाचरेत्।।**

**पदच्छेदः** - कुर्याद्धिंसिते - कुर्यात् + हिंसिते।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कृते प्रतिकृतिं कुर्यात् | - | उपद्रवे कृते प्रत्युपद्रवं कुर्यात् |
| हिंसिते प्रतिहिंसितं (कुर्यात्) | - | हिंसायाः प्रतिहिंसा कार्या |
| दुष्टे दुष्टं समाचरेत् | - | दुष्टकर्म क्रियते चेत् तत्र दुष्टं कार्यं कर्तव्यम् |
| तत्र दोषो न पश्यामि | - | तत्कार्ये वृद्धवानरः दोषं न पश्यति। |

**सारः** - उपद्रवं कुर्वते जने प्रत्युपद्रवं कार्यम्। हिंसायाः प्रतिक्रिया हिंसा एव। दुष्टे दुष्टम् आचरणीयम्। तत्र दोषं न पश्यति वृद्धवानरः।

**गद्यम् - ८**

**दुःखितस्य चन्द्रभूपतेः गमनम्।**

तत्त्वया मम कुलक्षयः कृतो मया पुनस्तवेति। अथैतदाकर्ण्य राजा शोकाविष्टः पदातिरेकाकी यथायातमार्गेण निष्क्रान्तः। अथ तस्मिन् भूपतौ गते राक्षसस्तृप्तो जलान्निष्क्रम्य सानन्दमिदमाह।

**व्याख्या - तदेति।**

तत्त्वया - तत् + त्वया। तत् तत्कारणात्। अथैतदाकर्ण्य - अथ + एतत् +आकर्ण्य। अथ अनन्तरम्। तस्मिन् भूपतौ गते (सति सप्तमीप्रयोगः) यदा भूपतिः अगच्छत् तदा।

**संक्षेपः** -'हे राजन्, त्वया (चन्द्रभूपतिना) मम (वानरस्य) कुलक्षयः कृतः तथा मया तव कुलक्षयः कृतः'। एतत् श्रुत्वा राजा दुःखितः सन् आयातमार्गेण अगच्छत्। तदा राक्षसः जलात् आगत्य वृद्धवानरम् एवमवदत्।

**श्लोकः - १२**

**राक्षसः वृद्धवानरम् अभिनन्दति।**

**हतः शत्रुः कृतं मित्रं रत्नमाला न हारिता।**
**नालेनास्वादितं तोयं भो वृद्धवानर।।**

**पदच्छेदः** - नालेनास्वादितम् - नालेन + आस्वादितम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| शत्रुः हतः | - | शत्रुं जघान |
| (आवां) मित्रं कृतम् | - | आवां मित्रे अभूव |
| रत्नमाला न हारिता | - | रत्नमाला नापहृता |
| भो वृद्धवानर | - | समर्थ हे वानर |
| नालेन तोयम् आस्वादितम् | - | कमलनालेन जलं पानं कृतम् |
| साधु | - | सर्वं त्वया सम्यक् कृतम्। |

**सारः** - रिपुः नाशितः। मम मित्रं जातम्। रत्नमाला नापहृता। कमलनालेन जलं पीतम्। हे वानर, त्वया सर्वं साधु कृतम्।

**गद्यम्** - अतोऽहं ब्रवीमि।

**व्याख्या** - अत इति। अहम् अत्र सुवर्णसिद्धिः।

**संक्षेपः** - इतः पर्यन्तं सुवर्णसिद्धिः चक्रधरं प्रति चन्द्रभूपतेः कथां कथितवान्।

**विशदीकरणम्।**

**सुवर्णसिद्धिः** - अपरीक्षितकारकम् इति पञ्चतन्त्रस्य पञ्चमं तन्त्रम्। तत्र वर्तमानासु कथासु अन्यतमा भवति चन्द्रभूपतिकथा। तस्याः कथायाः पूर्वं लोभाविष्टः चक्रधरः इति कथा वर्तते। तस्यां कथायां वर्तमानं एकं कथापात्रं भवति सुवर्णसिद्धिः। अपरं कथापात्रं भवति चक्रधरः। चक्रधरस्य मस्तके चक्रं सदा भ्रमति। तस्मै कठिनां वेदनां ददाति च। चक्रधरस्य सुहृद् भवति सुवर्णसिद्धिः। चक्रधरम् आश्वासयितुं एकैकां कथां कथयति। तासु एका कथा भवति चन्द्रभूपतिकथा। द्वितीये खण्डे (द्वितीये भागे - अस्य पत्रस्य) इयं कथा पठनाय वर्तते।

**श्लोकः - १३**

**अतिलोभः न कार्यः।**

**यो लौल्यात्कुरुते कर्म नैवोदर्कमवेक्षते।**
**विडम्बनामवाप्नोति स यथा चन्द्रभूपतिः।।**

**पदच्छेदः** - नैवोदर्कम् - न + एव +उदर्कम्।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| यः लौल्यात् | - | यः लोभात् |
| उदर्कं नैव अवेक्षते | - | भाविकार्यं न विचिन्त्य |
| कर्म कुरुते | - | प्रवृत्तिं करोति |
| सः चन्द्भूपतिं यथा | - | सः चन्द्रभूपतिम् इव |
| विडम्बनामवाप्नोति | - | परिहासपात्रं प्राप्नोति। |

**सारः** - यः भाविकार्यमनालोच्य लोभात् कर्म करोति सः चन्द्रभूपतिमिव परिहासपात्रं भवेत्।

**गद्यम् - १०**

**स्वगृहगमनाय तात्पर्यं सुवर्णसिद्धिः चक्रधरं प्रति प्रकटयति।**

एवमुक्त्वा भूयोऽपि स चक्रधरमाह - 'भो मित्र, प्रेषय मां येन स्वगृहं गच्छामि'। चक्रधर आह - 'भद्र, अपदार्थे धनमित्रसंग्रहः क्रियते। तन्मामेवं विधं त्यक्त्वा क्व यास्यसि?'

उक्तं च-

**व्याख्या - एवेति।**

एवम् - अनेन प्रकारेण। मित्र - हे सुहृत्। भद्र - हे सौम्य।

तन्मामेवं विधम् - तत् + माम् + एवं विधम्। तत् - तस्मात्।

**संक्षेपः** - चक्रधरं प्रति स्वगृहागमनानुमतिं सुवर्णसिद्धिः अपृच्छत्। तदा आपत्काले मित्रत्यागं नोचितमिति चक्रधरः तमुपदिशति।

**श्लोकः - १४**

**आपदि सुहृत्त्यागः नोचितमिति।**

**यस्त्यक्त्वा सापदं मित्रं याति निष्ठुरतां सुहृत्।**
**कृतघ्नस्तेन पापेन नरके यात्यसंशयम्।।**

**पदच्छेदः** - यस्त्यक्त्वा - यः + त्यत्क्वा।

कृतघ्नस्तेन - कृतघ्नः + तेन।

यात्यसंशयम् - याति +असंशयम्।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| यः सापदं मित्रं त्यक्त्वा | - | यः आपदि पतितं मित्रम् उपेक्ष्य |
| याति (सः) निष्ठूरतां सुहृत् | - | गच्छति सः निष्ठूरः सुहृदेव |
| तेन पापेन कृतघ्नः | - | तत्पापेन कृतघ्नः भवति |
| (सः) असंशयं नरके याति | - | सः नरके पतिष्यति, न संशयः |

**सारः** - यः आपदि पतितं मित्रमुपेक्ष्य गच्छति सः क्रूरः कृतघ्नः च भवति। सः नरके पतिष्यति। न संशयः।

**गद्यम् - ११**

**त्वां रक्षितुं मया न शक्यते इति सुवर्णसिद्धेरभिप्रायः।**

सुवर्णसिद्धिराह - 'भोः सत्यमेतद्यदि गम्यस्थाने शक्तिर्भवति। एततपुरुषाणामगम्यस्थानम्। नास्ति कस्यापि त्वान्मोचयितुं शक्तिः। अपरं यथा यथा चक्रभ्रमवेदनया तव मुखविकारं पश्यामि तथा तथाहमेतज्जानामि यद्रागगच्छामि मा कश्चिन्ममाप्यनर्थो भवेत्'। यतः -

**व्याख्या - सुवर्णसिद्धिरिति।**

सुवर्णसिद्धिराह - सुवर्णसिद्धिः + आह। सत्यमेतद्यदि - सत्यम् + एतत् + यदि।

एतत्पुनर्मनुष्याणाम् - एतत् + पुनः + मनुष्यामाम्। एतत् त्वामापदः संरक्षणकार्यम्।

नास्ति - न + अस्ति। अपरम् - अपरं कार्यमिति।

**संक्षेपः** - सुवर्णसिद्धिः चक्रधरमवदत्। यदि तव शक्तिरस्ति चेत् सुहृत्संरक्षणं क्रियेत। त्वां संरक्षितुं मनुष्यैरपि न शक्यते। अपि च भवान् चक्रभ्रमणेन संजातेन वेदनया नितरां व्याकुलः इति तव मुखदर्शनेनैव ज्ञातम्। अपि च त्वया साकं वर्तते चेत् अहमपि आपदि पतिष्यामि। यतः-

**श्लोकः - १५**

**दुर्देवतया गृहीतः वानर इव तव वदनच्छाया संजाता।**

**यादृशी वदनच्छाया दृश्यते तव वानर।**
**विकालेन गृहीतोऽसि यः परैति जीवति।।**

**पदच्छेदः** - गृहीतोऽसि - गृहीतः +असि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| वानर | - | हे कपे |
| विकालेन गृहीतोऽसि | - | दुर्देवतया त्वं पीडितः इव असि। |
| तव वदनच्छाया | - | तव यः मुखविकारः (मुखे दृश्यमानः व्यतियानः) यः परैति यः पररूपेण परिणमते |
| सः जीवति | - | तादृशः जीवति। |

**सारः** - हे वानर, तव मुखे दृश्यमानेन विकारेण ज्ञातुं शक्यते यत् दुर्देवता त्वां गृहीता इति। अतः ततः पलायनेन जीवनं कर्तुं शक्यते। (दुर्देवतायाः पीडनात् सुरक्षायै पलायनं कार्यमित्यर्थः। मुखे तादृशः परिभ्रमः दृश्यते)

**गद्यम् - १२**

**विकालेन गृहीतस्य वानरस्य मुखच्छाया कीदृशी इति पृच्छति।**

चक्रधर आह - कथमेतत्? सोऽब्रवीत्।

**व्याख्या - चक्रधरेति।**

कथां श्रोतुं तत्परः चक्रधरः पृच्छति सा कथा का ? इति। सोऽब्रवीत् सः अब्रवीत्। सः सुवर्णसिद्धिः।

## पुनरावृत्तिः (Recap)

- कस्मिंश्चित् नगरे चन्द्रः नाम राजा पुत्रैः परिजनैः च सहावसत्।
- तस्य पुत्राः वानरक्रीडारताः आसन्। ते भक्षणादिभिः वानरानपोषयन्।
- तस्मिन् राजगृहे लघुकुमारवाहनयोग्यं मेषयूथमप्यस्ति।
- मेषयूथादेकः जिह्वालौल्यात् महानसं प्रविश्य भक्षणानि भक्षयति।
- सूपकारः यत्किञ्चित् लभते तेन मेषं ताडयति।
- वानराणामधिपः कश्चन वृद्धवानरः आसीत्, सः भाविकाले सम्भाव्यमानं कुलनाशं विचिन्त्य वानरेभ्यः निर्देशम् अदात्।
- किन्तु सर्वे वानराः तस्य वचनं तिरस्कृत्य पूर्ववद् स्वर्गसमानोपभोगं नानाविधं अमृतकल्पं भक्षणं उपेक्ष्य वनं गन्तुं विमुखाः बभूवुः।
- वृद्धवानरस्तु कुलनाशं द्रष्टुं अशक्तः सन् राजगृहं त्यक्त्वा वनं प्राप।
- वृद्धवानरे गते सति एकदा भक्षणलोलुपः मेषः महानसं प्रविशति।
- सूपकारः अर्धदग्धकाष्ठेन मेषमताडयत्।
- ऊर्णाप्राचुर्योऽयं मेषः अग्निना ज्वलितः सन् समीपस्थायाम् अश्वकुट्यां प्रविशति।
- तृणप्राचुर्यात् अश्वकुटी ददाह। अश्वाः केचन व्रणिताः। केचन दग्धाः।
- अश्वानां पीडयां दुःखितः राजा अश्ववैद्यशास्त्रानुसारं वानराणां वसया वह्निदाहदोषः प्रशाम्यति इति ज्ञात्वा वानरान् हन्तुं निर्देशं भृत्येभ्यो अदात्।
- तदनुसारं भृत्याः विविधायुधैः पाषाणैश्च सर्वान् वानरान् जघ्नुः।
- वृत्तान्तं ज्ञात्वा दुःखितः वृद्धवानरः राज्ञे अपकृत्यं कर्तुं चिन्तितः सन् वने इतस्ततः सञ्चरितवान्।
- पिपासाकुलः सः वनमध्ये वर्तमानं सरः अपश्यत्। सरः प्रति वनचरमनुष्याणां पदपङ्क्तिम् अपश्यत्, न नष्क्रमणचिह्नम्।
- जले दुष्टग्राहः वर्तिष्यते इति चिन्तया कमलनालेन जलमपिबत्।
- तदा जलमध्यात् उद्धृतेन राक्षसेन सह ममतां स्थाप्य राजानम् अपकीर्तिं जनयितमुपायं सूचितवान्।
- राक्षसस्य सकाशात् रत्नमालां स्वीकृत्य वृद्धवानरः वनात् वनं प्रासादात् प्रासादम् उत्प्लुत्य सञ्चचार।
- वृद्धवानरस्य कण्ठे रत्नमालां द्रष्ट्वा भवान् कुतः आयाति? कथं लब्धा रत्नमाला? इत्यादिकं जनाः अपृच्छन्।
- कुबेरनिर्मितं विशिष्टं सरः अरण्ये वर्तते। रविवारे सूर्ये अर्धोदिते यः सलिले निमज्जति सः

रत्नमालाविभूषितकण्ठः निस्सरति इत्यवदत्।

- इमां वार्ताम् आकर्ण्य चन्द्रभूपतिः वृद्धवानरम् आनाय्य किमेतत्सत्यम् इत्यपृच्छत्।
- एतत्सत्यमेव। विश्वासाय कमपि प्रेषय इत्युत्तरं श्रुत्वा अहं सपरिजनः आगमिष्यामि इति राजा अवदत्।
- एवं वृद्धवानरस्य नेतृत्वे सरस्तीरं प्राप्ताः। राजानं वृद्धवानरं च विहाय इतरे सर्वे रत्नमालेच्छया सरसि निमग्नाः।
- कुतः ते चिरायन्ते इति राजा यदा अपृच्छत् तदा वृक्षमारुह्य राजानमेवमवदत् -' हे दुष्ट, नरपते, तव परिजनाः राक्षसेन भक्षिताः। त्वया मम कुलं विनाशितम्। मया तव कुलं च' इति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. भविष्यति - कः लकार?
२. अरण्ये वर्तमानः सरः केन निर्मितमासीत्?
३. तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् - कीदृशं गृहम्?
४. वानरवसया अश्वानां वह्निदाहदोषः जायते इति केनोक्तम्?
५. अरण्ये वर्तमाने सरसि दुष्टग्राहः वर्तते इति वृद्धवानरः कथं जानाति?
६. तत्त्वया मम कुलक्षयः कृतो मया पुनस्तथेति - कस्येदं वचनम्?
७. चन्द्रभूपतिकथा कः कं विशदयति?
८. मदोद्धताः वानराः यूथाधिपं किमवदन्?
९. वृद्धवानराय रत्नमाला कः अदात्?
१०. लोभात् विडम्बनां प्राप्तः राजा कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।
### (Answer the following questions in one or two sentences)

१. अश्वानां वह्निभयः कुतः सञ्जातः?
२. वृद्धवानरस्य मते के धन्याः भवन्ति?
३. तृष्णादेव्याः स्वभावः कीदृशः?
४. नमस्तुभ्यम् - अत्रत्यः व्याकरणविशेषः कः?

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

१. वानरकुलनाशं कथं सम्भूतम्?
२. अरण्ये वर्तमानः सरः।

## निर्दिष्टाभ्यासः (Assignments)

१. चन्द्रभूपतिकथां संक्षिप्य लिखत।
२. अतिलोभः न कार्यः - उपन्यस्यत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. भविष्यति - लृट्।
२. कुबेरेण निर्मितं भवति तत्सरः।
३. यत्र जनाः परस्परं कलहं कुर्वन्ति।
४. शालिहोत्रेण।
५. वनचरमनुष्याणां पदपङ्क्तिप्रवेशोऽस्ति, न निष्क्रमणम्।
६. इदं वाक्यं वृद्धवानरः भूपतिं प्रति वदति।
७. सुवर्णसिद्धिः चन्द्रभूपतिकथां चक्रधरं कथयति।
८. हे वानरश्रेष्ठ, भवतः वार्धक्यात् बुद्धिवैकल्यं जातम्। अमृतकल्पान् विविधान् भक्षणविशेषान् अस्माभिः त्यक्तुं न शक्यते।
९. सरसि वर्तमानः राक्षसः वृद्धवानराय रत्नमालाम् अदात्।
१०. चन्द्रभूपतिः लौल्यात् विडम्बनां प्राप।

## सूचनाग्रन्थाः (References)


१. प्रोफसर् जि. सहदेवः संस्कृताध्यापनम्, कथाशिक्षणम्, नेत्री, तिरुवनन्तपुरम्, २००२
२. विष्णुशर्मा, पञ्चतन्त्रम्, कथामुखम्, ज्योत्स्ना-मुदुला संस्कृत हिन्दी व्याख्योपेतम्, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी, २०१५
३. विष्णुशर्मा पञ्चतन्त्रम्, अपरीक्षितकारकम्, चन्द्रभूपतिकथा, कार्तिक बुक्स्, तिरुवनन्तपुरम्, २०११

## अधिकवाचनग्रन्थौ (Suggested Readings)

१. आचार्य लोकमणि दहालः, संस्कृतसाहित्येतिहासः, नीतिकथा - लोककथा, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी २०१६

२. टि.के. रामचन्द्र अय्यर् संस्कृतसाहित्यचरित्रम्, आर्. एस्. वाध्यार् आन्ट् सन्स्, पालक्काड् २०१८

BLOCK -2

# अपरीक्षितकारकाद् उद्धृताः कथाः

# Unit 1
## मूर्खब्राह्मणकथा

### उद्देश्यानि (Learning Outcomes)

- संस्कृतमण्डले गद्यकाव्यानां सामान्यपरिचयः।
- पञ्चतन्त्राध्ययनेन पशुपक्षिकथापरिचयः, मूल्यबोधं च।
- गद्यांशानाम् अर्थग्रहणम्।
- कल्पनाशक्तेः विकासः।
- व्याकरणादिकार्याणां अवगमनम्।

### प्राग्व्यपेक्षाः (Prerequisites)

अयि छात्राः,
द्वितीये सत्रे गद्यं, नाटकं च इत्यस्मिन् पत्रे भागचतुष्टयं वर्तते। प्रथमे भागे (खण्डे) कथासाहित्यमधिकृत्य सामान्यज्ञानं, पञ्चतन्त्रस्य कथामुखं, चन्द्रभूपतिकथा च पठनाय वर्तन्ते। एतत्खण्डमस्माभिः पठितम्। द्वितीये खण्डे एककद्वयं वर्तते। प्रथमे एकके तिस्रः कथाः। प्रथमा कथा भवति मूर्खब्राह्मणकथा।
विष्णुशर्माणं पञ्चतन्त्रं चाधिकृत्य वयं पूर्वमेव अपठाम। अस्यां कथायां, षड् गद्यभागाः चत्वारः श्लोकाः च सन्ति।

### मुख्याशयाः (Key Concepts)

चत्वारः ब्राह्मणकुमाराः - ते देशान्तरं गतवन्तः - ब्राह्मणकुमारेषु त्रयः शास्त्रपारङ्गताः - एकः शास्त्रपराङ्मुखः - प्रथमः ब्राह्मणकुमारः सिंहस्य अस्थीनि सञ्चितवान् - द्वितीयस्तु चर्ममांसादिरुधिरं समायोजितम् - तृतीयस्तु प्राणान् दातुं आरभत - शास्त्रपराङ्मुखः ब्राह्मणकुमारः वृक्षमारुरोह - तृतीयः यदा सिंहं सजीवं चकार - तदा सिंहः त्रीनपि जघान - बुद्धिरेव श्रेष्ठा।

## Discussion

**गद्यम् – १**

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणकुमाराः परं मित्रभावमुपगता वसन्ति स्म। तेषां त्रयः शास्त्रपारङ्गताः परंतु बुद्धिरहिताः। एकस्तु बुद्धिमान् केवलं शास्त्रपराङ्मुखः। अथ तैः कदाचिन्मित्रैर्मन्त्रितम् - को गुणो विद्यया येन देशान्तरं गत्वा भूपतीन् परितोष्यार्थोपार्जना न क्रियेत? तत्पूर्वदेशं गच्छामः।

**व्याख्या -** कस्मिंश्चिदिति। अधिष्ठाने नगर्याम्। परं मित्रभावं नितान्तमैत्रीभावम्। वसन्ति स्म अवसन्। 'स्म'इत्यव्ययस्य योगे भूते लट्। 'लट् स्मे' इति सूत्रेण। शास्त्रपारङ्गताः शास्त्रपण्डिताः। बुद्धिरहिताः बुद्धिहीनाः। शास्त्रपराङ्मुखः शास्त्रज्ञानरहितः। मन्त्रितम् आलोचितम्। अन्यः देशः देशान्तरम्। पूर्वदेशं प्राचीं दिशम्।

**संक्षिप्तः आशयः** - एकस्यां नगर्यां चत्वारः ब्राह्णकुमाराः अवसन्। ते सुहृदः आसन्। तेषु त्रयः शास्त्रपण्डिताः सन्त्यपि बुद्धिरहिताः। एकः शास्त्रज्ञानरहितः सन्नपि बुद्धिमान्। एकदा ते एवमचिन्तयन्। देशान्तरं गत्वा विद्यया भूपतीन् सन्तोषयित्वा धनार्जनं कार्यम्। अतः प्राचीदेशं प्रति गच्छामः इति।

**गद्यम् -२**

तथानुष्ठिते कंचिन्मार्गं गत्वा तेषां ज्येष्ठतरः प्राह - अहो अस्माकमेकश्चतुर्थो मूढः केवलं बुद्धिमान्। न च राजप्रतिग्राहो बुद्ध्या लभ्यते विद्यां विना। तन्नास्मै स्वोपार्जितं दास्यामि। तद्गच्छतु गृहम्। ततो द्वितीयेनाभिहितम् - भोः सुबुद्धे, गच्छ त्वं स्वगृहे यतस्ते विद्या नास्ति।

**व्याख्या -** तथेति।

गत्वा गमनं कृत्वा गत्वा। क्त्वान्तमव्ययम्। मूढः अज्ञः (शास्त्रज्ञानरहितः)। लभ्यते - लभ् लाभे-कर्मणि-आत्म-लट्-प्रपु-ए-व। लभ्यते - लभ्येते - लभ्यन्ते। विद्यां विना इत्यत्र विना इति शब्दस्य योगे 'पृथग्विनानानाभिस्तृतीयान्यतरस्याम्'इति सूत्रेण द्वितीया, तृतीया, चतुर्थी वा स्यात्। अत्र द्वितीया। दास्यामि दानं करिष्यामि। दास्यामि - दा-दाने-पर-लृट्-उपु-ए व। दास्यामि - दास्यावः - दास्यामः। गच्छतु व्रजतु। गम्लृ गतौ-पर-लोट्-प्रपु-ए व। गच्छतु (गच्छतात्) - गच्छतां - गच्छन्तु। द्वितीयेन द्वितीयेन ब्राह्मणकुमारेण। यतस्ते - यतः + ते।

**संक्षिप्तः आशयः** - पूर्वनिश्चयानुसारं तानि मित्राणि अगच्छन्। यात्रामध्ये तेषु प्रथमः एवमवदत्- 'अस्मासु एकः अज्ञः। विद्याहीनाय राजा पारितोषिकं न दास्यति। मह्यं लब्धं धनं अहं न दास्यामि'। द्वितीयः अपि शास्त्रज्ञानरहितम् एवमवदत् - 'त्वं विद्याहीनः, गृहं गच्छ'इति।

**गद्यम् - ३**

ततस्तृतीयेनाभिहितम् - न युज्यत एवं कर्तुम् यतो वयं बाल्यात्प्रभृत्येकत्र क्रीडिताः। तदागच्छतु महानुभावोऽस्मादुपार्जितवित्तस्य संविभागं भविष्यतीति। उक्तं च -

**व्याख्या -** तत इति।

ततस्तृतीयेनाभिहितम् - ततः + तृतीयेन + अभिहितम्। कर्तुम् तुमुन्नन्तमव्ययम्। एकत्र एकस्मिन् स्थले। उपार्जितवित्तस्य सम्पादितधनस्य।

**संक्षिप्तः आशयः -** तृतीयः ब्राह्मणकुमारः एवमवदत् - एतत् न युज्यते। वयं सर्वे बाल्यादारभ्य एकत्र अक्रीडन्। अस्माभिः साकं सोऽपि आगच्छतु। लब्धं वित्तं तुल्यतया विभक्तव्यम्। यतः -

**श्लोकः - १**

**किं तया क्रियते लक्ष्म्या या वधूरिव केवला।**
**या च वेश्येव सामान्या पथिकैरुपभुज्यते।।**

**पदच्छेदः -** वधूरिव - वधूः + इव।
वेश्येव - वेश्या + इव।
पथिकैरुपभुज्यते - पथिकैः + उपभुज्यते।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| या वधूरिव केवला (चेत्) | - | या स्वस्य वधूरिव स्वस्य चेत् |
| तया लक्ष्म्या किं क्रियते | - | तादृश्या सम्पदा किं प्रयोजनम्? |
| या सामान्या वेश्या इव | - | या साधारणजनैरुपभोक्तुं योग्या वेश्या इवपथिकैः उपभुज्यते |
| | - | यात्रिकैः उपभोक्तुं करिष्यति। |

**सारः -** सम्पद् केवलं स्वस्य वधूरिव चेत् तया सम्पदा किं प्रयोजनम्? वेश्यामिव पथिकैः उपभोक्तुं न शक्यते चेत् सम्पदा किमपि प्रयोजनं न।

**श्लोकः - २**

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां च वसुधैव कुटुम्बकम्।।**

**पदच्छेदः -** परो वेति - परः + वा + इति।
वसुधैव - वसुधा + एव।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| अयं निजः परः वा इति | - | अयं मम भवति, अयमन्यस्य भवति इति |
| गणना लघुचेतसाम् | - | विचारः सङ्कुचितचित्तानामेव। |
| उदारचरितानां च | - | विशालहृदयानां तु |
| वसुधा एव कुटुम्बकम्। | - | इयं भूमिः एव मम कुटुम्बमिति चिन्ता। |

**सारः -**इदं मम भवति, इदमन्यस्य भवति इत्यादि चिन्ता सङ्कुचितचित्तानामेव। विशालचित्तानां तु वसुधैव कुटुम्बकम्।

**गद्यम् - ४**

तदागच्छत्वेषोऽपीति। तथानुष्ठिते तैर्मार्गाश्रितैरटव्यां मृतसिंहस्यास्थीनि दृष्टानि। ततश्चैकेनाभिहितम् - 'यदहो विद्याप्रत्ययः क्रियते। किंचिदेत्सत्वं मृतं तिष्ठति। तद्विद्याप्रभावेन जीवसहितं कुर्मः। अहमस्थिसञ्चयं करोमि'।

**व्याख्या -** तदेति।

आगच्छत्वेषोऽपीति - आगच्छतु + एषः + अपि + इति। तैर्मार्गाश्रितैरटव्याम् - तैः + मार्गाश्रितैः + अटव्याम्। तैः ब्राह्मणकुमारैः। ततश्चैकेनाभिहितम् - ततः + च + एकेन + अभिहितम्। विद्याप्रत्ययः विद्यायां विश्वासः। पठितां विद्यां परीक्षितुम्। सत्वं मृगम्। जीवसहितं सजीवम्। करोमि - डुकृञ् करणे-पर-लट्-उपु-ए व। करोमि - कुर्वः - कुर्मः।

**संक्षिप्तः आशयः -** तृतीयब्राह्मणकुमारः वदति। एषः अज्ञः अपि अस्माभिः सह आगच्छतु। तेषां गमनसमये अटव्यां कस्यचन मृतसिंहस्य अस्थीनि ते अपश्यन्। तदा एकः एवमवदत् - पठितां विद्यां प्रवृत्तिपथमानेतुम् अयमवसरः प्राप्तः। मम विद्यापाटवेन तं मृतं सिंहं सजीवं करिष्यामः। अहम् अस्थीनि सञ्चयामि।

**गद्यम् - ५**

ततश्चैकेनौत्सुक्यादस्थिसञ्चयः कृतः। द्वितीयेन चर्ममांसरुधिरं संयोजितम्। तृतीयोऽपि यावज्जीवं संचारयति तावत् सुबुद्धिना निषिद्धः - भोस्तिष्ठतु भवान्। एष सिंहो निष्पाद्यते। यद्येवं सजीवं करिष्यसि ततः सर्वानपि व्यापादयिष्यति इति तेनाभिहितः।

**व्याख्या -** तत इति।

औत्सुक्यात् तात्पर्यात्। संयोजितं समायोजितम्। यावज्जीवं - यावत् + जीवम्। भवान् - त-पु-प्र-ए व। भवान् - भवन्तौ - भवन्तः। निष्पाद्यते निर्मीयते। सजीवं जीवेन युक्तम्। जीवेन सह वर्तते इति सजीवम्। व्यापादयिष्यति हनिष्यति। अभिहितः उक्तः।

**संक्षिप्तः आशयः** - एकः तात्पर्यपूर्वम् अस्थीनि सञ्चितवान्। द्वितीयः चर्ममांसरक्तं समायोजितवान्। तृतीयः यदा सिहाय प्राणान् संचालयितुमारब्धवान् तदा सुबुद्धिः तं निरोधितवान्। सः अवदत् - एषः सिंहः जीवति तर्हि अस्मान् सर्वान् सः हनिष्यति इति।

**गद्यम् - ६**

स आह - धिङ्मूर्ख, नाहं विद्यायाः विफलतां करोमि। ततस्तेनाभिहितम् - तर्हि प्रतीक्षस्व क्षणं यावदहं वृक्षमारोहामि। तथानुष्ठिते यावत्सजीवः कृतस्तावत्ते त्रयोऽपि सिंहेन व्यापादिताः। स च पुनर्वृक्षादवतीर्य गृहे गतः। अतोऽहं ब्रवीमि।

**व्याख्या -** स इति।

सः तृतीयः ब्राह्मणकुमारः धिङ्मूर्ख - धिक् + मूर्ख। तेनाभिहितं (कर्मणिप्रयोगः)। सः अभिहितवान्। क्षणम् अल्पसमयम्। यावत्सजीवः कृतः यदा सजीवमकरोत्। व्यापादिताः हताः पुनर्वृक्षादवतीर्य - पुनः + वृक्षात् + अवतीर्य। अतोऽहम् - अतः + अहम्। अहं सुवर्णसिद्धिः। (सुवर्णसिद्धिः इमां कथां चक्रधरं वदति)।

**श्लोकः - ३**

**वरं बुद्धिर्न सा विद्या विद्यया बुद्धिरुत्तमा।**
**बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः।।**

**पदच्छेदः** - बुद्धिर्न - बुद्धिः + न।
बुद्धिरुत्तमा - बुद्धिः + उत्तमा।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| बुद्धिः वरं, न सा विद्या | - | मतिः श्रेष्ठं, न तु सा विद्या |
| बुद्धिहीनाः विनश्यन्ति | - | बुद्धिरहिताः नाशं प्राप्नुवन्ति |
| ते सिंहकारकाः इव | - | सिहाय जीवदातारः ते इव। |

**सारः** - केवलया पुस्तकस्थया विद्यया प्रयोजनं न। (बुद्धिरेव श्रेष्ठम्) बुद्धिरहिताः सिंहाय जीवदातारः विद्यावन्तः इव नाशं प्राप्नुवन्ति। अतः परमुक्तं च (पुनरपि सुवर्णसिद्धिरुवाच)

**श्लोकः - ४**

**अपि शास्त्रेषु कुशला लोकाचारविवर्जिताः।**
**सर्वे ते हास्यतां यान्ति यथा ते मूर्खपण्डिताः।।**

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| शास्त्रेषु कुशला अपि | - | शास्त्रनिपुणाः अपि |
| लोकाचारविवर्जिताः | - | लोकाचारं ये न जानन्ति |
| ते सर्वे हास्यतां यान्ति | - | ते सर्वे परिहास्यतां प्राप्नुवन्ति। |
| ते मूर्खपण्डिताः यथा | - | ते मूढपण्डिताः इव। |

सारः - शास्त्रे निपुणाः सन्त्यपि ये लोकाचारं न जानन्ति ते सर्वेषां परिहास्यतां प्राप्नुवन्ति। मूर्खपण्डिताः इव।
चक्रधरः आह - कथमेतत्? सोऽब्रवीत्।
चक्रधरः मूर्खपण्डितकथामधिकृत्य श्रोतुं तात्पर्यं प्रकटयति।
(सा कथा अस्माकं पाठ्यक्रमे पठनाय न वर्तते)

## पुनरावृत्तिः (Recap)

- एकस्मिन् नगरे चत्वारः ब्राह्मणकुमाराः मित्रत्वेन अवसन्।
- दरिद्राः ते धनसम्पादनाय देशान्तरं गन्तुं निश्चिकायुः।
- ब्राह्मणकुमारेषु त्रयः शास्त्रपारङ्गताः, किन्तु बुद्धिरहिताः।
- एकः शास्त्रपराङ्मुखः किन्तु बुद्धिमान् आसीत्।
- गमनवेलायां प्रथमः द्वितीयश्च ब्राह्मणकुमारौ शास्त्रपराङ्मुखं ब्राह्मणकुमारं स्वगृहं गन्तुं निर्बन्धितवन्तौ।
- तृतीयस्य ब्राह्मणकुमारस्य अभ्यर्थनया चत्वारोऽपि यात्रामकुर्वन्।

- यात्रामध्ये मृतस्य सिंहस्य अस्थीनि दृष्ट्वा प्रथमः ब्राह्मणकुमारः तानि सञ्चितवान्।
- द्वितीयस्तु चर्ममांसादिरुधिरं समायोजितम्।
- तृतीयस्तु प्राणान् दातुं यदा आरभत, तदा सुबुद्धिः तन्निरुद्धवान्।
- तृतीयः सुबुद्धेः वचनं तिरस्कर्तुं यदा आरब्धवान् तदा मम वृक्षारोहणसमयं यावत् विलम्बः क्रियताम् इति अपेक्ष्य वृक्षमारुरोह।
- तृतीयः यदा सिंहं सजीवं चकार, तदा सिंहः त्रीनपि जघान।
- अतः केवलया पुस्तकस्थया विद्यया प्रयोजनं न। बुद्धिरेव श्रेष्ठा।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. केषां वसुधैव कुटुम्बकम् भवति?
२. अयं निजः परो वेति गणना केषां भवति?
३. 'त्वं विद्याहीनः, गृहं गच्छ' इति। कः कं प्रति कथयति?
४. प्रथमः ब्राह्मणकुमारः कानि सञ्चितवान्?
५. ब्राह्मणकुमारेषु त्रयः कीदृशाः आसन्?
६. द्वितीयः किं समायोजितम्?
७. नगरे कति ब्राह्मणकुमाराः मित्रत्वेन अवसन्?
८. तृतीयः प्राणान् दातुं यदा आरभत तदा कः तन्निरुद्धवान्?
९. तृतीयः कस्य वचनं तिरस्करोति?
१०. ब्राह्मणकुमारः किमर्थं देशान्तरं गतवन्तः?

## एकैकया खण्डिकया उत्तराणि लिखत।
## (Answer the following questions in a paragraph)

१. चतुर्णां ब्राह्मणकुमाराणां स्वभावः कीदृशः?
२. शास्त्रपराङ्मुखं प्रतिनिवर्तयितुं यतन्तौ ब्राह्मणकुमारौ कः? कथं सान्त्वयामास?

## निर्दिष्टाभ्यासः (Assignments)

१. शास्त्रपराङ्मुखः ब्राह्मणकुमारः।

| |
|---|
| २. केवलया पुस्तकस्थया विद्यया प्रयोजनं न, बुद्धिरेव श्रेष्ठा- विशदयत |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. उदारचरितानाम्।
२. लघुचेतसाम्।
३. द्वितीयः शास्त्रज्ञानरहितं प्रति।
४. सिंहस्य अस्थीनि।
५. शास्त्रपण्डिताः सन्त्यपि बुद्धिरहिताः।
६. चर्ममांसरुधिरं समायोजितम्।
७. चत्वारः।
८. सुबुद्धिः।
९. सुबुद्धेः।
१०. अर्थोपार्जनाय।

## सूचनाग्रन्थौ (References)

१. विष्णुशर्मा, पञ्चतन्त्रम्, चौखम्बा संस्कृतसीरीस्, वाराणसी।
२. विष्णुशर्मा, पञ्चतन्त्रम्, पञ्चमं तन्त्रम्, अपरीक्षितकारकम्, व्याख्या, राधालक्ष्मी, कार्तिका बुक्स्, तिरुवनन्तपुरम्, २०१९

## अधिकवाचनग्रन्थौ (Suggested Readings)

१. आचार्य लोकमणि दहालः, संस्कृतसाहित्येतिहासः, नीतिकथा - लोककथा, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी २०१६, पुटानि ३७० - ३७८।
२. Arthur w Ryder trans *The Panchatantra* of Vishnu Sharma, University of Chicago press, Chicago,1925

# Unit- 2

## भारुण्डपक्षिकथा

### उद्देश्यानि (Learning Outcomes)

- संस्कृतमण्डले गद्यकाव्यानां सामान्यपरिचयः।
- पञ्चतन्त्राध्ययनेन पशुपक्षिकथापरिचयः, मूल्यबोधं च।
- गद्यांशानाम् अर्थग्रहणम्।
- कल्पनाशक्तेः विकासः।

### प्राग्व्यपेक्षाः (Prerequisites)

अयि छात्राः,
अस्मिन् एकके वर्तमाना द्वितीया कथा भवति भारुण्डपक्षिकथा। पूर्वां कथाम् इव इयं कथापि सुवर्णसिद्धिः चक्रधरं वदति। अस्यां कथायां चत्वारः गद्यभागाः त्रयः श्लोकाश्च सन्ति।

### मुख्याशयाः (Key Concepts)

पक्ष्येकोदरः - पृथग्ग्रीवः - प्रथममुखाय अमृततुल्यं फलमेकं लब्धम् - द्वितीयमुखेन तत् याचितम्, प्रथममुखेन तत् तिरस्कृतम् - द्वितीयमुखम् उत्कण्ठाकुलं सविषादं चावर्तत - द्वितीयमुखेन एकं विषफलं प्राप्तम् - विषफलं यदा भक्षितुमारभत तदा प्रथममुखेन निवारितम् - सः फलं भक्षितवान् - द्वावपि मरणं प्रापतुः।

## Discussion

**गद्यम् - १**

कस्मिंश्चित्सरोवरे भारुण्डनामा पक्ष्येकोदरः पृथग्ग्रीवः प्रतिवसति स्म। तेन च समुद्रतीरे परिभ्रमता किंचित्फलममृतकल्पं तरङ्गात्क्षिप्तं संप्राप्तम्। सोऽपि भक्षयन्निदमाह - अहो बहूनि मयामृतप्रायाणि समुद्रकल्लोलाहतानि फलानि भक्षितानि - परमपूर्वोऽस्यास्वादः - तत्किं पारिजातहरिचन्दनतरुसम्भवं किं वा किंचिदमृतमयफलमव्यक्तेनापि विधिनापतितम्।

**व्याख्या - कस्मिंश्चिदिति।**

एकोदरः समानोदरः। पृथग्ग्रीवः ग्रीवाद्वयं यस्य सः। पृथक् ग्रीवा पृथग्ग्रीवा। प्रतिवसति स्म प्रत्यवसत्। प्रतिवसति स्म इत्यत्र लट् स्मे इति सूत्रेण भूतकालार्थे लट्लकारः। समुद्रतीरे समुद्रस्य तीरे। अमृतकल्पम् अमृततुल्यम्। भक्षयन्निदमाह - भक्षयन् + इदम् + आह। भक्षयन् खादयन्। मयामृतप्रायाणि - मया + अमृतप्रायाणि।

अमृतप्रायाणि अमृततुल्यानि। अपूर्वोऽस्यास्वादः - अपूर्वः + अस्य + आस्वादः। अपूर्वः असाधारणः। पारिजातहरिचन्दनतरुः पारिजातवृक्षस्य हरिचन्दनवृक्षस्य । अव्यक्तेन अदृशशक्तिना।

**संक्षिप्तः आशयः** - कस्यांश्चित् नद्यां भारुण्डनामकः पक्षी अवसत्। तस्य एकः उदरः द्वे ग्रीवे च सन्ति। एकदा समुद्रतीरात् तस्मै अमृततुल्यमेकं फलं लब्धम्। तत्फलं भक्षयन् सः तस्य फलस्य गुणातिरेकमास्वाद्य विधिना दत्तमिति कथितवान्।

**गद्यम् - २**
एवं तस्य ब्रुवतो द्वितीयमुखेनाभिहितम् - भोः यद्येवं तन्ममापि स्तोकं प्रयच्छ येन जिह्वासौख्यमनुभवामि। ततो विहस्य प्रथमवक्त्रेणाभिहितम् - आवयोस्तावदेकम् उदरमेका तृप्तिश्च भवति। ततः किं पृथग्भक्षितेन? वरमनेन शेषेण प्रिया तोष्यते। एवमभिधाय तेन शेषं भारुण्ड्याः प्रदत्तम्। सापि तमास्वाद्य प्रहृष्टतमालिङ्गनचुम्बनसंभावनाद्यनेकचाटुपरा बभूव। द्वितीयं मुखं तद्दिनादेव प्रभृति सोद्वेगं सविषादं च तिष्ठति।

**व्याख्या - एवमिति।**
एवम् अनेन प्रकारेण। स्तोकम् अल्पम्। जिह्वासौख्यम् रसनासुखम्। ततः अनन्तरम्।
तृप्तिश्च - तृप्तिः + च। पृथग्भक्षितेन - पृथक् + भक्षितेन। प्रिया तोष्यते प्रियायै दत्वा सन्तोषयामि। शेषं फलस्याशम्। प्रहृष्टतमालिङ्गनचुम्बनसंभावनाद्यनेकचाटुपरा नितान्तम् आलिङ्ग्य चुम्बनादिभिः कामुकं प्रोत्साहनाय तत्परा। तद्दिनादेव - तत् + दिनात् + एव। सोद्वेगम् उत्कण्ठापूर्वम्।

**संक्षिप्तः आशयः** - भारुण्डस्य प्रथममुखवचनमाकर्ण्य द्वितीयमुखं फलस्यांशं तस्य मुखस्यापि आवश्यकं, स्तोकं प्रयच्छ इत्यभ्यर्थितवान्। किन्तु आवयोरेकोदरः, तेन तृप्तिरायाति। अवशिष्टं फलं प्रियायै दास्यामीत्युवाच। भारुण्डायै दत्तं च। भारुण्डी तत् मुखं चुम्बनादिभिः तोषयामास। तद्दिनादारभ्य द्वितीयमुखम् उत्कण्ठापूर्वं विषादपूर्वं च अवर्तत।

**गद्यम् -३**
अथान्येद्युर्द्वितीयमुखेन विषफलं प्राप्तम्। तद्दृष्ट्वापरमाह - भो निस्त्रिंश, पुरुषाधम, निरपेक्ष, मया विषफलमासादितम्। तत्तवापमानात् भक्षयामि। अपरेणाभिहितम् - 'मूर्ख, मा मैवं कुरु। एवं कृते द्वयोरपि विनाशो भविष्यति'। अथैवं वदता तेनापमानेन फलं भक्षितम्। किं बहुना? द्वावपि विनष्टौ। अतोऽहं ब्रवीमि -

**व्याख्या - अथेति।**
विषफलं विषयुक्तं फलम्। आह अवदत्। आह - ब्रूञ् व्यक्तायां वाचि-पर-लट्-प्रपु-ए व।
आह - आहतुः - आहुः। निस्त्रिंशः क्रूरः। निरपेक्षः इतरेषाम् अभ्यर्थनां यः न परिगणयति सः। भक्षयामि खादामि। मैवम् - मा + एवम्। द्वयोरपि - द्वयोः + अपि।

तेनापमानेन - तेन + अपमानेन। किं बहुना? अधिकतया कथनस्यावश्यकता न। विनष्टौ मरणं प्रापतुः। ब्रवीमि वदामि। ब्रवीमि - ब्रूञ् व्यक्तायां वाचि-पर-लट्-उ पु-ए व।
ब्रवीमि - ब्रूवः - ब्रूमः।

**संक्षिप्तः आशयः -** एकदा द्वितीयमुखस्य पुरतः एकं विषफलं प्राप्तम्। तदहं खादामि। अपरमुखमाह - 'हे मूढ, मा मैवं कुरु। एवं कृते उभयोरपि विनाशः भविष्यति'इति। किन्तु द्वितीयमुखेन फलं भक्षितम्। उभावपि विनष्टौ। अतः सुवर्णसिद्धिः वदति –

**श्लोकः - १**

**एकोदराः पृथग्ग्रीवा अन्योन्यफलभक्षिणः।**
**असंहता विनश्यन्ति भारुण्डा इव पक्षिणः।।**

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| एकोदराः पृथग्ग्रीवाः | - | समानोदराः पृथग्ग्रीवाः (ग्रीवाद्वयं वर्तमानाः) |
| अन्योन्यफलभक्षिणः | - | परस्परं फलाशिनः |
| अहंसताः | - | परस्परं वैरं वर्तमानाः |
| विनश्यन्ति | - | नाशं प्राप्नुवन्ति |
| भारुण्डाः पक्षिणः इव | - | भारुण्डाः खगाः इव। |

**सारः -** एकोदराः पृथग्ग्रीवाः परस्परं फलाशिनः सन्तः अपि परस्परं वैरं वर्तमानाः चेत् भारुण्डपक्षिणः इव नाशं प्राप्नुवन्ति।

**गद्यम् - ४**
चक्रधर आह - सत्यमेतत्। तद्गच्छ गृहम्। परमेकाकिना त्वया न गन्तव्यम्। उक्तं च-

**व्याख्या** - चक्रधर इति।
चक्रधरं प्रति सुवर्णसिद्धिः इमां कथां कथयति। चक्रधरकथाम् एतत् सविस्तरं सूचयति। गृहं गन्तुं चक्रधरः सुवर्णसिद्धिं प्रेरयति।

**संक्षिप्तः आशयः** - चक्रधरः वदति - भवता उक्तं सत्यमेव। त्वं गृहं गच्छ। किन्तु एकाकिना न गन्तव्यम् इति।

**श्लोकः - २**

**एकः स्यादु न भुञ्जीत नैकः सुप्तेषु जागृयात्।**
**एको न गच्छेदध्वानं नैकश्चार्थान्प्रचिन्तयेत्।।**

**पदच्छेदः** - नैकः - न + एकः। एको न - एकः + न। गच्छेदध्वानम् - गच्छेत् + अध्वानम्। नैकश्चार्थान् - न + एकः + च + अर्थान्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| एकः स्वादु न भुञ्जीत | - | साधु भक्षणम् एकाकिना न भुक्तव्यम् |
| सुप्तेषु एकः न जागृयात् | - | सर्वेषु सुप्तेषु एकस्य जागरणं नोचितम् |
| एकः अध्वानं न गच्छेत् | - | एकाकिना दीर्घयात्रा न कार्या |
| अर्थान् एकः न प्रचिन्तयेत् | - | गौरवयुक्तान् कार्यान् एकाकिना न चिन्तनीयम्। |

**सारः** - साधु भक्षणम् एकाकिना न भुञ्जीत। सर्वेषु सुप्तेषु एकेन जागरणं नोचितम्। एकाकिना दीर्घयात्रा न कार्या। गौरवयुक्तं कार्यम् अन्यैरालोच्य करणीयम् अपि -

**श्लोकः - ३**

**अपि कापुरुषो मार्गे द्वितीयः क्षेमकारकः।**
**कर्कटेन द्वितीयेन जीवितं परिरक्षितम्।।**

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| कापुरुषः अपि मार्गे द्वितीयः | - | निन्दितपुरुषोऽपि गमनवेलायां साहाय्यकः |
| क्षेमकारः | - | ऐश्वर्यदायकः भवेत्। |
| द्वितीयेन कर्कटेन | - | साहाय्यकेन कुलीरेण |
| जीवितं परिरक्षितम् | - | जीवितं सुरक्षितमकरोत्। |

**सारः** - निन्दितपुरुषोऽपि कश्चन मार्गे साहाय्यकः भवेत्। साहाय्यकेन कुलीरेण जीवितं परिरक्षितम्। (साहाय्यकेन वर्तमानः कर्कटकः सर्पं जघान)

सुवर्णसिद्धिराह - कथमेतत्? सोऽब्रवीत् - (सा कथा भवति ब्राह्मणिदत्त कर्कटकः इति कथा)

## पुनरावृत्तिः (Recap)

- कस्मिंस्चित् सरोवरे भारुण्डपक्षी अवर्तत।
- सः एकोदरः पृथग्ग्रीवः च अवर्तत।
- एकदा प्रथममुखाय अमृततुल्यं फलमेकं लब्धम्।
- तस्य फलस्य अपूर्वाम् आस्वाद्यतामधिकृत्य द्वितीयमुखमवदत्।
- स्तोकभागं मह्यं देहीति द्वितीयमुखेन याचितम्। किन्तु प्रथममुखेन तत् निरस्कृत्य सः भारुण्डायै दत्वा तस्याः आलिङ्गनादिसुखं प्राप।
- ततः आरभ्य द्वितीयं मुखम् उत्कण्ठाकुलं सविषादं चावर्तत।
- एकदा द्वितीयमुखेन एकं विषफलं प्राप्तम्।
- अपमानितः सः विषफलं यदा भक्षितुमारभत तदा प्रथममुखेन निवारितम्।
- तद् तिरस्कृत्य सः फलं भक्षितवान्। द्वावपि मरणं प्रापतुः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

| |
|---|
| १. भारुण्डनाम पक्षिः कीदृशः आसीत्? |
| २. कस्मै अमृतफलं लब्धं? |
| ३. कः उद्वेगं विषादं च अवर्तत? |
| ४. केन विषफलं प्राप्तम् ? |
| ५. 'हे मूढ, मा मैवं कुरु। एवं कृते उभयोरपि विनाशः भविष्यति'इति। कः कं प्रति कथयति? |
| ६. कः मार्गो क्षेमकारकः भवेत्? |
| ७. केन जीवितं परिरक्षितम्? |
| ८. विषफलं कः भक्षितवान्? |
| ९. अपूर्वोऽस्यास्वादः - कस्य? |

## एकैकया खण्डिकया उत्तराणि लिखत।
**(Answer the following questions in a paragraph)**

| |
|---|
| एकोदराः पृथग्ग्रीवाः अन्योन्यफलभक्षिणः कुतः विनश्यन्ति? |

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| १. भारुण्डपक्षिकथा संक्षिप्य लिखत। |
| २. भारुण्डपक्षिकथायाः गुणपाठं विशदयत। |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

| |
|---|
| १. एकोदरः पृथग्ग्रीवः। |
| २. प्रथममुखायै। |
| ३. द्वितीयमुखः। |
| ४. द्वितीयमुखेन। |
| ५. प्रथममुखः द्वितीयमुखं प्रति। |
| ६. कापुरुषः। |
| ७. द्वितीयेन कर्कटेन। |
| ८. भारुण्डपक्षिणः द्वितीयमुखम्। |
| ९. तरङ्गक्षिप्तस्य फलस्य। |

## सूचनाग्रन्थौ (References)


| |
|---|
| १. विष्णुशर्मा, पञ्चतन्त्रम्, चौखम्बा संस्कृतसीरीस्, वाराणसी। <br> २. विष्णुशर्मा, पञ्चतन्त्रम्, पञ्चमं तन्त्रम्, अपरीक्षितकारकम्, व्याख्या, राधालक्ष्मी, कार्तिका बुक्स्, तिरुवनन्तपुरम्, २०१९ |


## अधिकवाचनग्रन्थौ (Suggested Readings)


| |
|---|
| १. आचार्य लोकमणि दहालः, संस्कृतसाहित्येतिहासः, नीतिकथा - लोककथा, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी २०१६ <br> २. Arthur w Ryder trans *The Panchatantra* of Vishnu Sharma, University of Chicago press, Chicago,1925 |

# Unit - 3

## मत्स्यमण्डूककथा

### उद्देश्यानि (Learning Outcomes)

- संस्कृतमण्डले गद्यकाव्यानां सामान्यपरिचयः।
- पञ्चतन्त्राध्ययनेन पशुपक्षिकथापरिचयः, मूल्यबोधं च।
- गद्यांशानाम् अर्थग्रहणम्।
- कल्पनाशक्तेः विकासः।

### प्राग्व्यपेक्षाः (Prerequisites)

अयि छात्राः,
अस्मिन् एकके वर्तमाना तृतीया कथा भवति मत्स्यमण्डूककथा। अस्यां कथायां षट् पद्यभागाः, श्लोकषड्कं च सन्ति। श्रद्धया पठन्तु। इमां कथां चक्रधरः सुवर्णसिद्धिं कथयति।

### मुख्याशयाः (Key Concepts)

शतबुद्धिः - सहस्रबुद्धिः - एकबुद्धिः जलाशये अवसत् - केचन धीवराः जलाशयसमीपं आगताः - जलचरान् ग्राहयिष्यामः इति धीवरवचनं मत्स्यौ मण्डूकः च श्रुतवन्तः - ते आलोचितवन्तः - जलाशयं त्यक्तुं विमुखौ आस्ताम् - एकबुद्धिः जलाशयं परित्यज्य अन्यत्र गन्तुमैच्छत् - धीवराः आगत्य सर्वान् जलचरान् गृहीत्वा गताः - मत्स्यौ यावच्छक्यं गतिविशेषैः रक्षां प्राप्तुं यतितौ - बुद्धिवैभवेन रक्षां प्राप्तुं न शक्यते - अमितः आत्मविश्वासः न कार्यः।

## Discussion

**गद्यम् -१**

कस्मिंश्चिज्जलाशये शतबुद्धिः सहस्रबुद्धिश्च द्वौ मत्स्यौ निवसतः। अथ तयोरेकबुद्धिर्नाम मण्डूकः मित्रतां गतः। एवं ते त्रयोऽपि जलतीरे कंचित्कालं वेलायां सुभाषितगोष्ठीसुखमनुभूय भूयोऽपि सलिलं प्रविशन्ति। अथ कदाचित्तेषां गोष्ठीगतानां जालहस्तधीवरः प्रभूतैः मत्स्यैर्व्यापादितैर्मस्तके विधृतैरस्तमनवेलायां तस्मिञ्जलाशये समायाताः। ततः सलिलाशयं दृष्ट्वा मिथः प्रोचुः। 'अहो, बहुमत्स्योऽयं ह्रदो दृश्यते स्वल्पसलिलश्च। तत्प्रभातेऽत्रागमिष्यामः'। एवमुक्त्वा स्वगृहं गताः। मत्स्याश्च विषण्णवदना मिथो मन्त्रं चक्रुः। ततो मण्डूक आह - 'भोः शतबुद्धे, श्रुतं धीवरोक्तं भवद्भ्याम्। तत्किमत्र युज्यते कर्तुं पलायनमवष्टम्भं वा। यत्कर्तुं युक्तं भवति

तदादिश्यतामद्य'। तच्छ्रुत्वा सहस्रबुद्धिः प्रहस्य प्राह - 'भोः मित्र, मा भैषीर्यतो वचनस्मरणमात्रादेव भयं न कार्यम्। न भेतव्यम्'। उक्तं च -

**व्याख्या** - कस्मिंश्चिदिति।

शतं बुद्धयः यस्य सः शतबुद्धिः। सहस्रं बुद्धयः यस्य सः सहस्रबुद्धिः।

तयोरेकबुद्धिर्नाम - तयोः + एकबुद्धिः + नाम। एकबुद्धिः एका बुद्धिः यस्य सः एकबुद्धिः। मण्डूकः भेकः। वेलायां समये। गोष्ठी सभा। सुभाषितगोष्ठीसुखं सभायां सुभाषितपारायणानन्दम्। व्यापादितैः हतैः। विधृतैः धारयन्तैः। दृष्ट्वा दर्शनं कृत्वा (पश्यन्)।

बहुमत्स्योऽयम् - बहुमत्स्यः + अयम्। बहुमत्स्यः बहवः मत्स्याः यस्मिन् सः। ह्रदः जलाशयः। आगमिष्यामः - आङ् पूर्व गम् (गम्लृ)-पर-लृङ्-उ पु-ब व। आगमिष्यामि - आगमिष्वावः - आगमिष्यामः। स्वगृहं स्वस्य गृहम्। गृहं भवनम्। विषण्णवदनाः दुःखिताः। आह अवदत्। धीवरोक्तं धीवरैः उक्तम्। अवष्टभयम् अत्रैव स्थितिः। आदिश्यताम् उपदिश्यताम्। प्रहस्य सपरिहासम्। मा भैषीः इत्यत्र माङः योगे लुङ्लकारः, माङि लुङ् इति सूत्रेण। भेतव्यं भेतुं योग्यम्।

**संक्षिप्तः आशयः** - कस्मिंश्चित् जलाशये द्वौ मीनौ एकः भेकः च सपरिवारं वसन्ति स्म। मीनयोः नाम शतबुद्धिः, सहस्रबुद्धिः चेति। भेकस्य नाम एकबुद्धिरिति। ते सुहृदः भवन्ति। प्रतिदिनं ससन्तोषं मिलन्ति। एकस्मिन् दिने सायंकाले केचन धीवराः तत्रतः अगच्छन्। तेषां हस्ते वर्तमाने जाले तैः गृहीताः अनेके मीनाः सन्ति। अमुं जलाशयं दृष्ट्वा ते परस्परमेवमवदन्। 'बहुमत्स्योऽयं ह्रदः स्वल्पसलिलश्च। आगामिनि दिने अत्रागमिष्यामः'इति। एकदाकर्ण्य विषण्णान् मत्स्यान् मण्डूकः आह। धीवरोक्तं श्रुतं वा? किं करणीयम्? पलायनम्, अत्रैव स्थितिः वा? यद् युक्तं तद् वदतु इति। एतदाकर्ण्य सहस्रबुद्धिः सपरिहासमवदत् - हे मित्र, मा भैषीः। केवलेन वचनश्रवणेन भयं न कार्यम्। हि -

**श्लोकः - १**

**सर्पाणां च खलानां च सर्वेषां दुष्टचेतसाम्।**
**अभिप्रायः न सिद्ध्यन्ति तेनेदं प्रवर्तते जगत्।।**

**पदच्छेदः** - तेनेदम् — तेन + इदम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| सर्पाणां खलानां सर्वेषां दुष्टचेतसां च | - | नागानां, दुष्टानां, सर्वेषां दुर्बुद्धीनां च अभिप्रायः न |
| सिद्ध्यन्ति | - | वचनानि न साधितप्रायाणि |
| तेन इदं जगत् प्रवर्तते | - | तत्कारणादेव लोकमिदं प्रवर्तते। |

**सारः** - सर्पाणां दुष्टानां दुष्प्रवृत्तिमाचर्यमाणानां च वचनानि कदापि साधितप्रायाणि न भवन्ति। तत एव लोकमिदं प्रवर्तते।

**गद्यम् - २**

तत् तावत् तेषामागमनमपि न संपत्सये। भविष्यति वा तर्हि बुद्धिप्रभावेनात्मसहितं रक्षयिष्यामि, यतोऽनेकां सलिलगतिचर्यामहं जानामि। तदाकर्ण्य शतबुद्धिराह - 'भोः, युक्तमुक्तं भवता। सहस्रबुद्धिरेव भवान्'। अथवा साध्विदमुच्यते -

**व्याख्या - तदिति।**

तेषां धीवराणाम्। संपत्सये संभावयामि। आत्मसहितम् आत्मना सह। सलिलगतिचर्यां जलावासशीलम्।

**संक्षिप्तः आशयः** - अतः धीवराः नागमिष्यन्ति। यदि ते आगमिष्यन्ति, तर्हि अहं (सहस्रबुद्धिः) त्वां रक्षयिष्यामि। स्वयं रक्षां च प्राप्नोमि। एतदाकर्ण्य शतबुद्धिः एवमवदत् - सत्यमेव तव वचनम्। त्वं सहस्रबुद्धिरसि। इदं साधु भवति यत् -

**श्लोकः - २**

**बुद्धेर्बुद्धिमतां लोके नास्त्यगम्यं हि किञ्चन।**
**बुद्ध्या यतो हता नन्दाश्चाणक्येनासिपाणयः।।**

**पदच्छेदः -** बुद्धेर्बुद्धिमतां - बुद्धेः + बुद्धिमताम्।

नास्त्यगम्यम् - न + अस्ति + अगम्यम्।

नन्दाश्चाणक्येनासिपाणयः - नन्दाः + चाणक्येन + असिपाणयः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| हि लोके बुद्धिमतां बुद्धेः | - | हि प्रपञ्चेऽस्मिन् मतिवरां मतेः |
| किञ्चन अगम्यं न अस्ति | - | किञ्चन गमनाभावः न वर्तते। |
| | | (बुद्धिमतां बुद्धिः सर्वत्र प्रविशति) |
| यतः बुद्ध्या चाणक्येन | - | हि मत्या कौटिल्येन |
| असिपाणयः नन्दाः हताः | - | आयुधधारिणः नन्दाः हताः।(चाणक्यस्य बुद्धौ नन्दाः हताः) |

**सारः** - लोकेऽस्मिन् बुद्धिमतां बुद्धिः सर्वत्र प्रसरति प्रविशति च। चाणक्यस्य बुद्धिवैभवेन आयुधधारिणः नन्दाः हताः।

तथा च - (अपि च)

**श्लोकः - ३**

**न यत्रास्ति गतिर्वायोः रश्मीनां च विवस्वतः।**
**तत्रापि प्रविशत्याशु बुद्धिर्बुद्धिमतां सदा।।**

**पदच्छेदः** - यत्रास्ति - यत्र + अस्ति।

गतिर्वायोः - गतिः + वायोः।

तत्रापि - तत्र + अपि।

प्रविशत्याशु - प्रविशति + आशु।

बुद्धिर्बुद्धिमताम् - बुद्धिः + बुद्धिमताम्।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| वायोः गतिः | - | वायोः प्रवेशनं |
| विवस्वतः रश्मीनां च यत्र न अस्ति | - | सूर्यस्य किरणानां गमनं यत्र न वर्तते |
| तत्रापि बुद्धिमतां बुद्धिः | - | तस्मिन् स्थलेऽपि मतिवरां मतिः |
| सदा आशु प्रविशति | - | सदा सहसा प्रविशति। |

**सारः** - यत्र वायुरपि न प्रविशति, यत्र सूर्यकिरणानामपि प्रवेशः न वर्तते, तत्रापि बुद्धिमतां मतिः सहसा प्रविशति।

**गद्यम् - ३**

ततो वचनश्रवणमात्रादपि पितृपर्यायागतं जन्मस्थानं त्यक्तुं न शक्यते। उक्तं च -

**व्याख्या - तत इति।**

पितृपर्यायागतं - पैतृकलब्धं (परम्परया प्राप्तम्)

**संक्षिप्तः आशयः -** श्वः मत्स्यग्रहणाय आगमिष्यामः इति वचनम् आकर्ण्य पैतृकप्राप्तस्य जलाशयस्य जलस्थानस्य त्यागः न करणीयः। हि -

**श्लोकः - ४**

**न तत्स्वर्गेऽपि सौख्यं स्याद्दिव्यस्पर्शेन शोभने।**
**कुस्थानेऽपि भवेत्पुंसां जन्मनो यत्र संभवः।।**

**पदच्छेदः** - स्वर्गेऽपि - स्वर्गे + अपि।

स्याद्दिव्यस्पर्शेनशोभने - स्यात् + दिव्यस्पर्शेनशोभने।

कुस्थानेऽपि - कुस्थाने + अपि।

जन्मनो यत्र - जन्मनः + यत्र।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| यत्र पुंसां जन्मनः संभवः | - | यत्र मानवानां जन्मोत्पत्तिः |
| कुस्थानेऽपि भवेत् | - | कुत्सितस्थलेऽपि संभवेत् |
| तत् सौख्यं | - | तादृशः सुखानुभवः। |
| स्वर्गेऽपि दिव्यस्पर्शेनशोभने | - | देवलोकेऽपि देवाङ्गनानां स्पर्शनेऽपि |
| न मिलिष्यति | - | न लभते। |

**सारः -** मानवानां जन्मस्थानं यस्मिन् कस्मिन्नापि कुग्रामे भवतु, तदानीं तादृशं सौख्यं लभते, तादृशं सुखं स्वर्गे देवाङ्गनानां स्पर्शनेनापि न लभते।

**गद्यम् - ४**

तन्न कदाचिदपि गन्तव्यम्। अहं त्वां सुबुद्धिप्रभावेन रक्षयिष्यामि। मण्डूक आह - 'भद्रौ, मम तावदेकैव बुद्धिः पलायनपरा। तदहमन्यं जलाशयमद्यैव सभार्यो यास्यामि'। एवमुक्त्वा स मण्डूको रात्रावेवान्यजलाशयं गतः।

**व्याख्या - तदिति।**

तन्न - तत् + न। सुबुद्धिप्रभावेन सुबुद्धेः प्रभावेन (शक्त्या)। तावदेकैव - तावत् + एका + एव। पलायनपरा प्राणरक्षार्थं धावनपरा। सभार्यः भार्यया सह वर्तते इति सभार्यः।

रात्रावेवान्यजलाशयम् - रात्रौ + एव + अन्यजलाशयम्।

**संक्षिप्तः आशयः** - अतः जन्मस्थलं न त्यक्तव्यम्। अहं त्वां रक्षयिष्यामि। भेकः अवदत् - 'भवन्तौ, अहम् एकबुद्धिः। केवलं पलायनं एव जानामि। अद्यैवाहम् अन्यत् जलाशयं सभार्यः गमिष्यामि'। भेकः अन्यत् जलाशयमगच्छत्।

**गद्यम् - ५**

धीवरैरपि प्रभात आगत्य जघन्यमध्यमोत्तमजलचरमत्स्यकूर्ममण्डूककर्कटादयो गृहीताः। तावपि शतबुद्धिसहस्रबुद्धी सभार्यौ पलायमानौ चिरमात्मानं गतिविशेषविज्ञानैः रक्षन्तौ जले पतितौ व्यापादितौ च। अथापराह्नसमये प्रहृष्टास्ते धीवराः स्वगृहं प्रस्थिताः। गुरुत्वाच्चैकेन शतबुद्धिः स्कन्धे कृतः। सहस्रबुद्धिः प्रलम्बमानो नीयते। ततश्च वापीकण्ठोपगतेन मण्डूकेन तौ तथा नीयमानौ दृष्ट्वाभिहिता स्वपत्नी प्रिये पश्य
पश्य -

**व्याख्या** - धीवरैरिति।

प्रभात आगत्य - प्रभाते + आगत्य। जघन्यमध्यमोत्तमजलचराः ह्रस्वसामान्यविपुलजलजीविनः। जघन्यम् अन्त्यम्। शतबुद्धिः च सहस्रबुद्धिः च शतबुद्धिसहस्रबुद्धी। गतविशेषविज्ञानं गमनतन्त्रप्रयोगः। प्रहृष्टास्ते - प्रहृष्टाः + ते। प्रकर्षेण हृष्टाः सन्तुष्टाः। गुरुत्वाच्चैकेन - गुरुत्वात् + च + एकेन।
गुरुत्वात् भारत्वात्। स्कन्धः अंसः (भुजशिरः)। नीयते ह्रियते। नीयते णीच् प्रापणे-कर्मणि-आत्म-लट्-प्र पु-एव। नीयते - नीयेते - नीयन्ते। वापीकण्ठोपगतेन वापीकण्ठस्य समीपं प्राप्तेन। वापी दीर्घिका।

**संक्षिप्तः आशयः** - प्रभाते धीवराः आगत्य सर्वान् मत्स्यान् कूर्मान् मण्डूकान् कुलीरान् च गृहीताः। शतबुद्धिः सहस्रबुद्धिः च सभार्यौ विविधैः गमनतन्त्रैः रक्षां प्राप्तुम् अयेताम्। किन्तु धीवराणां जाले पतिताः हताश्च। शतबुद्धेः भारत्वात् एकः धीवरः स्कन्धे गृहीतवान्। अपरः धीवरः प्रलम्बमानरूपेण सहस्रबुद्धिम् अनयत्। दीर्घिकायाः कण्ठसमीपं वर्तमानः मण्डूकः तद् दृष्ट्वा स्वभार्याम् एवमवदत्।

**श्लोकः - ५**

**शतबुद्धिः शिरस्थोऽयं लम्बते च सहस्रधीः।**
**एकबुद्धिरहं भद्रे क्रीडामि विमले जले।।**

**पदच्छेदः** - शिरस्थोऽयम् - शिरस्थः + अयम्।
एकबुद्धिरहम् - एकबुद्धिः + अहम्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| अयं शतबुद्धिः शिरस्थः | - | (एकः) अमुं शतबुद्धिं शिरसि धरति। |
| सहस्रधीः लम्बते च | - | (अपरः) सहस्रबुद्धिं लम्बमानत्वेन नयति। |
| भद्रे, एकबुद्धिः अहं (मण्डूकः) | - | भार्ये, एकबुद्धिरहं विमले जले क्रीडामि |
| | - | निर्मले तोये विहरामि। |

**सारः** - हे प्रिये, शतबुद्धिम् एकः धीवरः शिरसि वहति। अपरः सहस्रबुद्धिं लम्बमानत्वेन नयति। एकबुद्धिरहं निर्मले जले क्रीडामि।

**गद्यम् - ६**
अतोऽहं ब्रवीमि। नैकान्ते बुद्धिरपि प्रमाणम्। सुवर्णसिद्धिराह - यद्यप्येतदस्ति तथापि मित्रवचनं न उल्लङ्घनीयम्। परं किं क्रियते? निवारितोऽपि मया न स्थितोऽतिलौल्याद्विद्याहंकारच्च। साध्विदमुच्यते -

**व्याख्या** - अत इति।
अहं चक्रधरः। नैकान्ते बुद्धिरपि न प्रमाणं केषुचिदवसरेषु केवलेन बुद्धिना प्रयोजनं न।
यद्यप्येतदस्ति - यदि + अपि + एतत् + अस्ति। यद्यपि तत् सत्यं, तथापि। क्रियते - डुकृञ् करणे - कर्मणि-लट्-प्र पु-ए व। क्रियते - क्रियेते - क्रियन्ते। निवारितोऽपि मया। अहं भवन्तं निरुद्धवान् अपि। अतिलौल्यात् अतिलोभात्।

**संक्षिप्तः आशयः** - सुवर्णिद्धिं प्रति चक्रधरः अवदत् यत् सर्वत्र बुद्धिः न प्रयोजनप्रदा। तथा सुवर्णसिद्धिः अवदत् यत् कदापि सुहृद्वचनं न त्यक्तव्यम्। अहं भवन्तं बहुवारं निवारितवान्। अतिलोभात् अहङ्कारात् च भवान् मम वचनम् उपेक्षितवान्।

**श्लोकः - ६**
**साधु मातुल गीतेन मया प्रोक्तोऽपि न स्थितः।**
**अपूर्वोऽयं मणिर्बद्धः संप्राप्तं गीतलक्षणम्।।**

**पदच्छेदः** - प्रोक्तोऽपि - प्रोक्तः + अपि।
अपूर्वोऽयम् - अपूर्वः + अयम्।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| मातुल, साधु गीतेन | - | हे मातुल, साधु गानेन अलम् |
| मया प्रोक्तः अपि न स्थितः | - | इति अहम् उक्तवानपि भवता न श्रुतम्। |

अयम् अपूर्वः मणिर्बद्धः - तव कण्ठे अत्यपूर्वं रत्नं बद्धं
सम्प्राप्तं गीतलक्षणं (भवति) - तेन संप्राप्तं गानसम्मानमेव।

**सारः** - हे मातुल, भवतः गानेन अलम् इति मया उक्तः अपि त्वं पुनरपि गायसि। तव कण्ठे वर्तमानोऽयं मणिबद्धः तेन संप्राप्तं गानसम्मानमेव।

चक्रधरः आह - कथमेतत्? सुवर्णसिद्धिः तां कथां वक्तुमारभत।
(सा कथा भवति रासभश्रृगालकथा। सा कथा अस्माकं पठनाय न वर्तते।)

## पुनरावृत्तिः (Recap)

- एकस्मिन् जलाशये शतबुद्धिः सहस्रबुद्धिः इति द्वौ मत्स्यौ, एकबुद्धिः इति मण्डूकः च सकुटुम्बम् अवसन्।
- ते सुहृदः सुभाषितगोष्ठीसुखमनुभूय वसन्ति स्म। एकदा केचन धीवराः तेषां जलाशयसमीपेन आगताः। तेषां हस्ते वर्तमानेषु जालेषु व्यापादिताः मत्स्याः आसन्।
- बहुमत्स्योऽयं ह्रदः अल्पसलिलश्च। अतः श्वः अत्रतः जलचरान् ग्राहयिष्यामः इति धीवरवचनं मत्स्यौ मण्डूकः च श्रुतवन्तः।
- किं करणीयम् इति ते आलोचितवन्तः।
- सहस्रबुद्धिः शतबुद्धिः च परम्परागतं जलाशयं त्यक्तुं विमुखौ आस्ताम्। अपि च तयोः बुद्धिवैभवेन धीवराः आगमिष्यन्त्यपि रक्षां प्राप्तुं शक्यते, मण्डूकमपि संरक्ष्यामि इत्येवं रूपेण कथितवन्तौ।
- एकबुद्धिः मण्डूकः जलाशयं परित्यज्य अन्यत्र गन्तुमैच्छत्। तथा च अकरोत्।
- आगामिनि दिने धीवराः आगत्य सर्वान् जलचरान् जघन्यमध्यमोत्तमान् मत्स्यान् कूर्मान् मण्डूकान् कर्कटकान् च गृहीत्वा गताः।
- शतबुद्धिः सहस्रबुद्धिश्च यावच्छक्यं गतिविशेषैः रक्षां प्राप्तुं यतितौ, किन्तु धीवराणां जाले पतितौ व्यापादितौ च।
- कस्यचन धीवरस्य स्कन्धे वर्तमानं भारयुक्तं शतबुद्धिं प्रलम्बमानं सहस्रबुद्धिं च वापीकण्ठोपगतः मण्डूकः अपश्यत्।
- सर्वत्र बुद्धिवैभवेन रक्षां प्राप्तुं न शक्यते। अपि च अमितः आत्मविश्वासः न कार्यः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. मातुलः इत्यस्य कोऽर्थः?
२. मत्स्ययोः नामौ कौ?
३. एकबुद्धिः कः ?

४. मा भैषीः इत्यत्र भैषीः इति पदस्य लकारः कः?
५. सलिलाशयं दृष्ट्वा धीवराः किमवदत् ?
६. केषां वचनानि कदापि साधितप्रायाणि न भवन्ति ?
७. केन कारणात् जगत् इदं प्रवर्तते ?
८. कुत्र बुद्धिमतां बुद्धिः सर्वत्र प्रसरति प्रविशति च?
९. चाणक्यस्य बुद्धिवैभवेन के हताः ?
१०. मानवानां सौख्यं कुत्र लभते?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

१. चाणक्येन नन्दाः कथं हताः?
२. जन्मस्थलस्य प्राधान्यं किम्?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a paragraph)**

१. एकबुद्धिः।
२. सहस्रबुद्धिः।

## निर्दिष्टाभ्यासः (Assignments)

१. मत्स्यमण्डूककथां संक्षिप्य लिखत।
२. 'अमितः आत्मविश्वासः न कार्यः' विवृणुत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. मातुः सोदरः।
२. शतबुद्धिः सहस्रबुद्धिः च।
३. मण्डूकः।
४. लुङ्।

५. ‘अहो, बहुमत्स्योऽयं ह्रदो दृश्यते स्वल्पसलिलश्च। तत्प्रभातेऽत्रागमिष्यामः’।
६. सर्पाणां खलानां सर्वेषां दुष्टचेतसां
७. सर्पाणां खलानां सर्वेषां दुष्टचेतसां अभिप्रायाः सिद्ध्यन्ति तेन इदं जगत् प्रवर्तते।
८. अस्मिन् लोके।
९. नन्दाः।
१०. यत्र पुंसां जन्मनः संभवः कुस्थानेऽपि भवेत् तत्र मानवानां सौख्यं लभते।

## सूचनाग्रन्थौ (References)


१. विष्णुशर्मा, पञ्चतन्त्रम्, चौखम्बा संस्कृतसीरीस्, वाराणसी।
२. विष्णुशर्मा, पञ्चतन्त्रम्, पञ्चमं तन्त्रम्, अपरीक्षितकारकम्, व्याख्या, राधालक्ष्मी, कार्तिका बुक्स्, तिरुवनन्तपुरम्, २०१९


## अधिकवाचनग्रन्थौ (Suggested Readings)


१. आचार्य लोकमणि दहालः, संस्कृतसाहित्येतिहासः, नीतिकथा - लोककथा, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी २०१६
२. Arthur w Ryder. *The Panchatantra* of Vishnu Sharma (trans), University of Chicago press, Chicago,1925

# Unit- 4

## लोभाविष्टचक्रधरकथा

### उद्देश्यानि (Learning Outcomes)

- संस्कृतमण्डले गद्यकाव्यानां सामान्यपरिचयः।
- पञ्चतन्त्राध्ययनेन पशुपक्षिकथापरिचयः, मूल्यबोधं च।
- गद्यांशानाम् अर्थग्रहणम्।
- कल्पनाशक्तेः विकासः।

### प्राग्व्यपेक्षाः (Prerequisites)

अयि छात्राः,
द्वितीये सत्रे गद्यं नाटकं च इत्यस्मिन् पत्रे भागचतुष्टयं वर्तते। प्रथमे भागे (खण्डे) कथासाहित्यमधिकृत्य सामान्यज्ञानं, पञ्चतन्त्रस्य कथामुखं, पुनः चन्द्रभूपतिकथा च पठनाय वर्तन्ते। एतत्खण्डमस्माभिः पठितम्। द्वितीये खण्डे एककचतुर्थं वर्तते। चतुर्थे एकके चक्रधरकथा वर्तते। इयं कथा विष्णुशर्मणः पञ्चतन्त्रस्य पञ्चमतन्त्रात् उद्धृता भवति।

विष्णुशर्माणं पञ्चतन्त्रं चाधिकृत्य पूर्वमेव पठिताः। इदानीं चक्रधरकथां पठन्तु। अस्मिन् एकके एकादश गद्यभागाः, चतुर्दश श्लोकाः च सन्ति। श्रद्धया पठन्तु।

### मुख्याशयाः (Key Concepts)

चत्वारः ब्राह्मणपुत्राः - दरिद्रस्य दयनीयामवस्थां वर्णयति - चिन्ताकुलः स्वबान्धवान् स्वदेशं च त्यजति - अवन्तीं प्राप्य भैरवानन्ददर्शनं भाषणं च - साहसिकाः पुरुषाः शरीरं प्राधान्येन न गणयन्ति - पुरुषस्य कठिनप्रयत्नेन अप्राप्यं किमपि न - क्लेशेनैव (प्रयत्नेनैव) सुखं लभते - बुद्धिरेव श्रेष्ठा।

### Discussion

**चत्वारः ब्राहमणपुत्राः।**

कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मणपुत्राः परस्परं मित्रतां गताः वसन्ति स्म। ते चापि दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः। अहो धिगियं दरिद्रता। उक्तं च -

**व्याख्या - कस्मिंश्चिदिति।**

मित्रतां - सौहार्दम्। वसन्ति स्म - अवसन्। स्म इत्यस्य योगे भूतकाले लट्।

मन्त्रं चक्रुः - मन्त्रयामासुः। अहो आश्चर्यसूचकः निपातः।

**संक्षेपः** - कस्मिंश्चित् ग्रामे चत्वारः ब्राह्मणपुत्राः आसन्। ते सुहृदः। किन्तु दरिद्राः। एकदा ते दारिद्र्यमधिकृत्य चिन्तयामासुः।

**श्लोकः - १**

**बन्धुमध्ये दरिद्रस्य वासात् श्रेष्ठमेव वनवासः।**

**वरं वनं व्याघ्रगजादिसेवितं**
**जलेन हीनं बहुकण्टकावृतम्।**
**तृणानि शय्या परिधानवल्कलं**
**न बन्धुमध्ये धनहीनजीवनम्।**

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| बन्धुमध्ये | - | बान्धवेषु मध्ये |
| धनहीनजीवनं वरं न | - | दरिद्रस्य जीवनं श्रेष्ठं न |
| व्याघ्रगजादिसेवितं जलेन हीनं | - | क्रूरजन्तुसहिते जलरहिते |
| बहुकण्टकाकीर्णं | - | बहुभिः कण्टकैर्युक्तं |
| वनं वरं | - | अरण्यमेव श्रेष्ठम्। |
| (तत्र) शय्या तृणानि | - | शय्या तृणानि (भवन्तु) |
| वल्कलं परिधानं भवतु | - | वृक्षत्वक् वस्त्रं भवतु। |

**सारः** - बान्धवजनानां मध्ये धनहीनस्य दरिद्रस्य जीवितं दुष्करं भवति। तस्मादपि वरं भवति व्याघ्रगजादियुक्ते निर्जले कण्टकावृते वने निवासः। तत्र तृणानि शय्या भवतु, वस्त्रं वृक्षत्वक् च भवतु। तथा च -

**श्लोकः - २**

**दरिद्रस्य दयनीयामवस्थां वर्णयति।**

**स्वामी द्वेष्टि सुसेवितोऽपि सहसा प्रोज्झन्ति सद्बान्धवा**
**राजन्ते न गुणास्त्यजन्ति तनुजाः स्फारिभवन्त्यापदः।**
**भार्या साधुसुवंशजापि भजते नो यान्ति मित्राणि च**
**न्यायारोपितविक्रमाण्यपि नृणां येषु न हि स्याद्धनम्।।**

**पदच्छेदः** - सुसेवितोऽपि - सुसेवितः + अपि।
गुणास्त्यजन्ति - गुणाः + त्यजन्ति।
स्फारीभवन्त्यापदः - स्फारीभवन्ति + आपदः।
साधुसुवंशजापि - साधुसुवंशजा + अपि।
न्यायारोपितविक्रमाण्यपि - न्यायारोपितविक्रमाणि +अपि। स्याद्धनम् - स्यात् + धनम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| येषां नृणां धनं न स्यात् | - | येषां नराणां धनं न स्यात् |
| सुसेवितः अपि स्वामी द्वेष्टि | - | स्वामिनं सम्यक् सेवते, तथापि यजमानः द्वेषं प्रकटयति |
| सहसा सद्बान्धवाः प्रोज्झन्ति | - | सद्य एव बान्धवाः त्यजन्ति |
| गुणाः न राजन्ते | - | सद्गुणाः सन्त्यपि इतरेषां पुरतः न शोभन्ते |
| तनुजाः त्यन्ति | - | पुत्राः परित्यजन्ति |
| आपदः स्फारीभवन्ति | - | विपदः वर्धन्ते |
| साधुसुवंशजा भार्या अपि न भजन्ते | - | साध्वी उन्नतकुलजाता पत्नी अपि निर्धनं भर्तारं न सेवते |
| न्यायारोपितविक्रमाणि | - | न्यायशीलाः विक्रमाश्च |
| मित्राणि अपि (त्यजन्ति) | - | सुहृदः अपि त्यजन्ति। |

**सारः -** यः नरः दरिद्रः तं सर्वे त्यजन्ति। यजमानं सम्यक् सेवितवानपि सेवकः दरिद्रश्चेत् यजमानः द्वेष्टि। बान्धवाः त्यजन्ति। दरिद्रस्य गुणाः न शोभन्ते। पुत्राः त्यजन्ति। आपदः संवर्धन्ते। उन्नतकुलजाता साध्वी अपि भार्या दरिद्रं भर्तारं न सेवते। मित्राणि त्यजन्ति।

**श्लोकः - ३**

**दरिद्रस्य मानं यशश्च मानवाः न गणयन्ति।**

**शूरः सुरूपः सुभगश्च वाग्मी**
**शस्त्राणि शास्त्राणि विदांकरोतु।**
**अर्थं विना नैव यशश्च मानं**
**प्राप्नोति मर्त्योऽत्र मनुष्यलोके।।**

पदच्छेदः - नैव - न + एव।
यशश्च - यशः + च।
मर्त्योऽत्र - मर्त्यः + अत्र।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| अत्र मनुष्यलोके मर्त्यः | - | अस्मिन् मानवकुले मानवः |
| शूरः सुरूपः सुभगश्च | - | पराक्रमशीलः सुन्दरः आरोग्यवान् च |
| वाग्मी शस्त्राणि शास्त्राणि विदांकरोतु | - | पण्डितः आयुधधारी वेदशास्त्राणि च ज्ञातवान् भवतु |
| अर्थं विना | - | धनं विना |
| यशः मानं च नैव प्राप्नोति | - | कीर्तिम् अभिमानं च नैव सिद्ध्यति। |

**सारः** - अस्मिन् लोके धनरहितः मानवः पराक्रमी सुन्दरः आरोग्यवान् पण्डितः आयुधप्रयोगे तत्परः शास्त्रज्ञः च भवतु तस्य यशः मानं च न प्राप्नोति। सर्वे गुणाः सन्त्यपि धनरहितः चेत् यशो मानं च न लभते।

**श्लोकः - ४**

**जितेन्द्रियत्वं बुद्धिमत्वं वाग्मित्वादिगुणाः धनरहितावस्थायां विपरीतरूपेण सम्भविष्यन्ति।**

**तानीन्द्रियाण्यविकलानि तदेव नाम**
**सा बुद्धिरप्रतिहता वचनं तदेव।**
**अर्थोष्मणा विरहितः पुरुषः स एव**
**बाह्यः क्षणेन भवतीति विचित्रमेतत्।।**

**पदच्छेदः** - तानीन्द्रियाण्यविकलानि - तानि + इन्द्रियाणि + अविकलानि।

तदेव - तत् + एव।

बुद्धिरप्रतिहता - बुद्धिः + अप्रतिहता।

भवतीति - भवति + इति।

| **अन्वयः** | **-** | **अन्वयार्थः** |
|---|---|---|
| एतत् विचित्रं भवति इति | - | एतदद्भुतं भवति यत् |
| तानि अविकलानि इन्द्रियाणि | - | तानि दोषरहितानि इन्द्रियाणि |
| तदेव नाम | - | तान्येव भवन्तु, नाम च तदेवास्तु, |
| सा अप्रतिहता बुद्धिः | - | सा साध्वी मतिः |
| तदेव नाम | - | सा एव भवतु, नाम च तदेव, |
| वचनं तदेव | - | यद् उचितं वचनं |
| अर्थोष्मणा विरहितः पुरुषः | - | धनतापेन रहितः मानवः |
| स एव | - | स पुरुष एव |
| क्षणेन बाह्यः | - | अल्पकालेन बहिर्भूतः भविष्यति। |

**सारः** - यस्य पुरुषस्य दोषरहितानि इन्द्रियाणि, सुबुद्धिः, साधु वचनं च धनाभावे विकलेन्द्रियत्वेन, कुबुद्धित्वेन असाधुवचनत्वेन च परिणमन्ति। एतत् विचित्रं कार्यम् अल्पेन कालेनैव सम्भवति।

**गद्यम् - २**

**स्वदेशत्यागः कार्यः इति।**

तद्गच्छामः कुत्रचिदर्थाय इति संमन्त्र्य स्वदेशं पुरं च स्वसुहृत्सहितं बान्धवयुतं गृहं च परित्यज्य प्रस्थिताः।

**व्याख्या - तदिति**। कुत्रचित् - यत्रकुत्रापि। स्वस्य देशं स्वदेशं - जन्मभूमिं जन्मस्थलं वा।
साधु + इदम् - साध्विदम्। साधु योग्यम्।

**संक्षेपः** - धनसम्पादनाय यत्रकुत्रापि गच्छामः। इत्येवं मिथः आलोच्य स्वगृहं बान्धवान् जन्मदेशं च त्यक्त्वा अगच्छन्। एतत् साधु भवति -

**श्लोकः - ५**

**चिन्ताकुलः स्वबान्धवान् स्वदेशं च त्यजति।**

**सत्यं परित्यजति मुञ्जति बन्धुवर्गं**
**शीघ्रं विहाय जननीमपि जन्मभूमिम्।**
**संत्यज्य गच्छति विदेशमभीष्टलोकं**
**चिन्ताकुलीकृतमतिः पुरुषोऽत्र लोके।।**

**पदच्छेदः -** पुरुषोऽत्र - पुरुषः + अत्र।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| अत्र लोके | - | अस्मिन् प्रपञ्चे |
| चिन्ताकुलीकृतमतिः पुरुषः | - | चिन्तया दुःखमनुभवन् जनः |
| सत्यं परित्यजति | - | सत्यसन्धतां त्यजति |
| बन्धुवर्गं मुञ्जति | - | बान्धवान् त्यजति |
| जननीं जन्मभूमिमपि | - | मातरं जन्मदेशं च |
| शीघ्रं विहाय | - | सहसा त्यक्त्वा |
| अभीष्टलोकं संत्यज्य | - | इष्टजनमपि उपेक्ष्य |
| विदेशं गच्छति | - | विदेशाय गच्छति। |

**सारः** - अस्मिन् लोके चिन्तया दुःखितः जनः सत्यं त्यजति। बान्धवान् परित्यजति। मातरं जन्मभूमिं अभीष्टजनमपि त्यक्त्वा विदेशं गच्छति।

**गद्यम् - ३**

**अवन्तीं प्राप्य भैरवानन्ददर्शनं भाषणं च।**

एवं क्रमेण गच्छन्तोऽवन्तीं प्राप्ताः। तत्र सिप्राजले कृतस्नानाः महाकालं प्रणम्य यावन्निर्गच्छन्ति तावत् भैरवानन्दो नाम योगी संमुखो बभूव। ततस्तं ब्राह्मणोचितविधिना संभाव्य तेनैव सह तस्य मठं जग्मुः। अथ तेन ते पृष्टाः - 'कुतो भवन्त; समानताः? क्व यास्यथ? किं प्रयोजनम्?' ततस्तैरभिहितम् - वयं सिद्धियात्रिकास्तत्र यास्यामो यत्र धनाप्तिः मृत्युर्वा भविष्यतीत्येष निश्चयः। उक्तं च -

**व्याख्या** - एवमिति।

गच्छन्तोऽवन्तीम् - गच्छन्तः + अवन्तीम्। अवन्तिनामकं देशम्। महाकालं शिवं।
सम्भाव्य - विचिन्त्य। तेन सह - सह इत्यव्ययस्य योगे तृतीया। तेन ते पृष्टाः (कर्मणिप्रयोगः) सः तान् अपृच्छत्। भवन्तः कस्मात् देशात् आगच्छन्ति। क्व यास्यथ - कुत्र गमिष्यथ?
किं प्रयोजनं - केन कारणेन। ततस्तैरभिहितम् - ततः + तैः + अभिहितम्। ततः ते उक्तवन्तः। यास्यामः - गमिष्यामः।

**संक्षेपः** - एवं विचिन्त्य ब्राह्मणकुमाराः अवन्तीं प्रापुः। तत्र सिप्रानद्यां स्नात्वा शिवम् अर्चयित्वा गमनसमये भैरवानन्दं नामकं योगिवर्यं ददर्शुः। योगिमर्चयित्वा ते ब्राह्मणाः भैरवाचार्येण साकम् अगच्छन्। तदा कस्मात् यूयम्

आगच्छत, कुत्र गमिष्यथ, किमर्थमागमनम् इत्यदिकमपृच्छत् भैरवानन्दः। तदा यत्रतः अस्मभ्यं धनलाभः अथवा मरणं सम्भवतु तत्रतः गच्छामः। वयं कार्ययसिद्धिं वाञ्छामः।

**श्लोकः - ६**

**साहसिकाः पुरुषाः शरीरं प्राधान्येन न गणयन्ति।**
**दुष्प्राप्यानि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि।**
**अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम्।।**

**पदच्छेदः** - अवसरतुलिताभिरलम् - अवसरतुलिताभिः + अलम्।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| साहसिकपुरुषाणां | - | साहसकर्मसु व्यापृतानां पुरुषाणां |
| बहूनि दुष्प्राप्यानि | - | अनेकानि दुर्लभानि कार्याणि |
| वाञ्छितानि द्रविणानि च | - | अभिलषितानि धनानि च |
| लभ्यन्ते | - | लभन्ते |
| अवसरतुलाभिः तनुभिः अलम् | - | अवसरेण तुलनाय योग्यैः शरीरैः नास्ति प्रयोजनम्। |

**सारः -** साहसिकेभ्यः पुरुषेभ्यः बहुविधाः दुष्प्राप्याः भाग्याः लभन्ते। अभीप्सितकार्यं तैः सम्पादयितुं शक्यते। साहसिककर्माचरणेन शरीरकार्यं न चिन्तनीयम्।

व्याकरणकार्यम् - तनुभिरलम् इत्यत्र निषेधार्थकस्य अलम् इत्यस्य योगे तृतीया।

**श्लोकः - ७**

**साहसिकस्य पुरुषस्य यत्नः कदाचित् विधिमपि अतिक्रामते।**
**पतति कदाचिन्नभसः खाते पातालतोऽपि जलमेति।**
**दैवमचिन्त्यं कारणबलवान्ननु पुरूषाकारोऽपि।।**

**पदच्छेदः -** कदाचिन्नभसः - कदाचित् + नभसः।
पातालतोऽपि - पातालतः + अपि।
पुरूषाकारोऽपि - पुरूषाकारः + अपि।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| कदाचित् नभसः जलमेति | - | कदाचित् आकाशात् वृष्टिना जलं लभते |
| खाते पातालतोऽपि (जलमेति) | - | भूमिखननेन पातालतः अपि जलं लभते |
| दैवम् अचिन्त्यं | - | भाग्यं चिन्तातीतमेव (चिन्तितुं योग्यं चिन्त्यं, न चिन्त्यम् अचिन्त्यम्) |
| पुरुषाकारः कारणबलवान् ननु | - | पुरुषस्य प्रयत्नः कदाचित् भाग्यमपि अतिक्रमितुं योग्यः खलु। |

**सारः -** भाग्यागमनरीतिः अचिन्त्या। किन्तु पुरुषस्य प्रयत्नः कदाचित् भाग्यमप्यतिरिच्यते। आकाशात् कदाचित् वृष्टिः जायते। जलं सुकरया रीत्या लभते। किन्तु भूखननेन भूमिमध्यादपि जलं लभते।

**श्लोकः - ८**

**पुरुषस्य कठिनप्रयत्नेन अप्राप्यं किमपि न।**

**अभिमतसिद्धिरशेषा भवति हि पुरुषस्य पुरुषाकारेण।**
**दैवमिति यद्यपि कथयामि पुरुषगुणाः सोऽप्यदृष्टाख्यः।।**

**पदच्छेदः -** अभिमतसिद्धिरशेषा - अभिमतसिद्धिः + अशेषा।
यद्यपि - यदि + अपि।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| पुरुषस्य पुरुषाकारेण | - | पुरुषस्य पौरुष्येण |
| अशेषा अभिमतसिद्धिः | - | सम्पूर्णतया सर्वान् अभिलाषान् सफलीकर्तुं |
| भवति हि | - | शक्यते एव |
| यद्यपि दैवमिति कथयामि | - | यद्यपि कार्यसिद्धेः कारणत्वेन दैवमिति वदाम्यपि |
| पुरुषस्य (अतीतजन्मकर्मफलं) | - | पुरुषस्य अतीते जन्मनि आर्जितस्य कर्मणः फलमेव। |

**सारः** - पुरुषः स्वपौरुषानुसारं कर्म करोति चेत् सम्पूर्णा फलप्राप्तिरेव जायते। कार्यसिद्धेः कारणं दैवमित्युच्यते चेत् तत्रापि पुरुषस्य अतीतकर्मफलमेव कारणम्।

**श्लोकः - ९**

**साहसिकाः स्वप्राणान् तृणमिव गणयन्ति।**

**भयमतुलं गुरुलोकात्तृणमिव तुलयन्ति साधुसाहसिकाः।**
**प्राणानद्भुतमेतच्चरितं चरितं ह्युदाराणाम्।।**

**पदच्छेदः** - एतच्चरितम् - एतत् + चरितम्।
ह्युदाराणाम् - हि + उदाराणाम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| साहसिकाः तृणमिव प्राणान् | - | साहसिकाः पुरुषाः निस्सारः इव स्वप्राणान् |
| साधु तुलयन्ति | - | सम्यक् गणयन्ति |
| गुरुलोकात् भयम् अतुलम् | - | गुरुतुल्यजनेभ्यः (अर्थात् गुरुभ्य; मातृपितृभ्यः च) तुलनातीतं भयं वर्तते। |
| हि उदाराणाम् एतच्चरितं | - | हि उदारशीलानां तेषां एतत् चरितं |
| अद्भुतं चरितम् | - | अद्भुतचरितमेव |

**सारः -** साहसिकाः स्वप्राणान् तृणमिव निस्सारत्वेन गणयन्ति। किन्तु गुरुजनेषु मातृपितृषु नितान्तं भयं वर्तते। एतदेव अद्भुतं चरितम्।

**श्लेकः -१०**

**क्लेशेनैव (प्रयत्नेनैव) सुखं लभते।**

**क्लेशस्याङ्गमदत्वा सुखमेव सुखानि नेह लभ्यन्ते।**
**मधुभिन्मथनायैराश्लिष्यति बाहुभिर्लक्ष्मीम्।।**

**पदच्छेदः -** क्लेशस्याङ्गम् - क्लेशस्य + अङ्गम्।

नेह - न + इह।

मधुभिन्मथनाय - मधुभित् + मथनायः।

तैराश्लिशयति - तैः + आश्लिष्यति।

बाहुभिर्लक्ष्मीम् - बाहुभिः + लक्ष्मीम्।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| क्लेशस्याङ्गमदत्वा (वर्तमानं सुखं) | - | क्लेशं विना वर्तमानं सुखं |
| इह सुखानि न लभ्यन्ते | - | अस्मिन् लोके तादृशानि सुखानि न लभन्ते |
| मधुभित् मथनाय स्तैः बाहुभिः | - | विष्णुः मथनाय स्तैः यैः बाहुभिः |
| लक्ष्मीम् आश्लिष्यति | - | लक्ष्मीदेवींम् आलिङ्गति। |

**सारः** - प्रयत्नेन एव उद्दिष्टं सुखं लभते। क्लेशं विना उद्दिष्टकार्यसम्पादनं, सुखप्राप्तिः च न लभते। क्षीरोधिं मथनश्रान्तैः बाहुभिरेव विष्णुः लक्ष्मीदेवीमालिङ्गति। क्षीरमथनेनैव लक्ष्मी अगता।

**श्लोकः - ११**

**प्रयत्नशीलं लक्ष्मी इच्छति।**

**तस्य कथं न चला स्यात्पत्नी विष्णोर्नृसिंहकस्यापि।**
**मासांश्चतुरो निद्रां सः सेवति जलगतः सततम्।।**

**पदच्छेदः** - विष्णोर्नृसिंहकस्यापि - विष्णोः + नृसिंहकस्य + अपि।

मासांश्चतुरः - मासान् + चतुरः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| यः जलगत; चतुरो मासान् | - | यः क्षीरसागरे चतुर्मासान् |
| सततं निद्रां सेवते तस्य | - | नितान्तं स्वापं करोति तस्य |
| नृसिंहकस्यापि विष्णोरपि | - | पुरुषश्रेष्ठस्य विष्णोरपि |
| पत्नी कथं न चला स्यात् | - | भार्या केन प्रकारेण चञ्चला (अस्थिरा) न स्यात् (निश्चयं चपला भविष्यति) |

**सारः** - लक्ष्मी चञ्चला एव। हि तस्याः भर्ता विष्णुः चतुर्मासान् समुद्रे (क्षीरसागरे) नितान्तं स्वापं करोति। प्रयत्नशीलं लक्ष्मी इच्छति।

**श्लोकः - १२**

**पौरुषप्रकटनेनैव उत्कर्षत्वं लभते।**

**दुरधिगमः परभागो यावत्पुरुषेण पौरुषं न कृतम्।**
**जयति तुलामधिरूढः भास्वानिह जलदपटलानि।।**

**पदच्छेदः** - भास्वानिह - भास्वान् + इह।

**अन्वयः** - **अन्वयार्थः**

| | | |
|---|---|---|
| यावत् पुरुषेण पौरुषं न कृतं | - | यावत्कालं यः पौरुषं न प्रकटयति तावत् |
| परभागः दुरधिगमः | - | शत्रुजयं दुःखेनैव प्राप्तुं योग्यमेव |
| इह भास्वान् | - | इह सूर्यः |
| तुलामधिरूढः (सन्) | - | तुलाराशिं प्रविशन्नेव |
| जलदपटलानि जयति | - | मेघसमूहानि विजयति। |

**सारः** - यावत्कालं यः पुरुषः पौरुषं न प्रकटयति तावत्कालं शत्रुजयः न सिद्ध्यति। सूर्यः तुलाराशिं प्रविशति। अनन्तरमेव मेघसमूहानि जयन्ति।

**गद्यम् - ४**

**धनसम्पादनाय अस्माभिः किं कर्तव्यमिति ब्राह्मणकुमाराः भैरवानन्दम् अपृच्छन्।**

तत्कथ्यतामस्माकं कश्चिद्धनोपायो विवरप्रवेशशाकिनीसाधन-श्मशानसेवन-महामांसविक्रय साधकवर्तिप्रभृतीनाम् एकतम इति। अद्भुतशक्तिर्भवाञ्श्रूयते। वयमप्यतिसाहसिकाः। उक्तं च-

**व्याख्या - तदिति।**

अस्माकं - ब्राह्मणकुमाराणां। अस्माकम् - द-त्रिषु लिङ्गेषु समानः-ष-ब व।

मम (मे) - आवयोः (नौ) - अस्माकं (नः)।

अद्भुतशक्तिर्भवाञ्श्रूयते - अद्भुतशक्तिः +भवान् +श्रूयते। भवान् भैरवानन्दः।

अतिसाहसिकाः - साहसिककर्मसु तत्पराः।

**संक्षेपः** - (ब्राह्मणकुमाराः भैरवानन्दमवदन्) हे महाशय, धनसम्पादनोपायः कः? काननप्रवेशनं कार्यं वा? शकिनीदेवीपूजा कार्या वा? श्मशानभूमौ दुर्मन्त्राचरणं कार्यम् उत मांसविक्रयणं कार्यम् उत काचित् सिद्धिवर्तिका वर्तते वा? एषु अन्यतममुपदिशतु। भवति अद्भुतशक्तिः वर्तते इति श्रूयते। वयं साहसिककर्माणि कर्तुं सन्नद्धाः। अपि च-

**श्लोकः - १३**

**महद्भिरेव महाकार्यं साधयितुं शक्यते।**

**महान्त एव महतामर्थं साधयितुं क्षमाः।**
**ऋते समुद्रादन्यः को बिभर्ति बडवानलम्।।**

**पदच्छेदः** - समुद्रादन्यः - समुद्रात् + अन्यः।

| **अन्वयः** | - | **अन्वयार्थः** |
|---|---|---|
| महतामर्थं साधयितुं | - | महाकार्याणि कर्तुं |
| महान्त एव क्षमाः | - | महज्जनाः एव समर्थाः |
| समुद्रात् ऋते अन्यः कः | - | समुद्रेण विना कः जनः |
| बडवानलं बिभर्ति | - | समुद्रे वर्तमानमग्निं बडवानलं धारयितुं शक्तः? |

**सारः** - महाकार्यं महद्भिरेव कर्तुं शक्यते। समुद्रेण विना न केनापि बडवानलं धर्तुं न शक्यते। व्याकरणकार्यम् - ऋते समुद्रात् इत्यत्र ऋते इत्यस्य योगात् पञ्चमीविभक्तिः।

**गद्यम् - ५**

**भैरवाचार्यः ब्राह्मणकुमारेभ्यः सिद्धिवर्तिचतुष्टयं ददाति।**

भैरवानन्दोऽपि तेषां सिद्ध्यर्थं बहूपायं सिद्धिवर्तिचतुष्टयं कृत्वाऽपर्यत्। आह च - 'गम्यतां हिमालयदिशि। तत्र संप्राप्तानां यत्र वर्तिः पतिष्यति तत्र निधानं प्राप्स्यथासंदिग्धम्। तत्र स्थानं खनित्वा निधिं गृहीत्वा व्याघूर्ण्यताम्'। तथानुष्ठिते तेषां गच्छतामेकतमस्य हस्ताद्वर्तिर्निपपात। अथासौ यावत्तं प्रदेशं खनति तावत्ताम्रमयी भूमिः। ततस्तेनाभिहितम् - 'अहो गृह्यतां स्वेच्छया ताम्रम्'। अन्ये प्रोचुः - 'भोः मूढ, किमनेन क्रियते। तत्प्रभूतमपि दारिद्र्यं न नाशयति। तदुत्तिष्ठाग्रतो गच्छामः'। सोऽब्रवीत् - 'यान्तु भवन्तः नाहमग्रे यास्यामि'। एवमभिधाय ताम्रं यथेच्छया गृहीत्वा प्रथमो निवृत्तः।

**व्याख्या - भैरवानन्देति।**

सिद्धिवर्तिचतुष्टयं - चत्वारि सिद्धिवर्तिनः (four wicks made of cotton lighted cloth which have magic power) अर्पयत् - समर्पयत्। आह - अवदत्। गम्यतां - गच्छ। गम्यताम् - गम्लृ गतौ-कर्मणि-आत्म-लोट्-प्रपु-ए व। निधानं - निधिः। तत्र - वर्तिपतनस्थले।

हस्ताद्वर्तिर्निपपात - हस्तात् + वर्तिः + निपपात। वर्तिः -wick यावत् - तावत् - यदा - तदा। माता यावत् अन्नं दत्तं तावत् भुक्तम्। ततस्तेनाभिहितम् - ततः तेन अभिहितम्। ततः - तदा। अहो - आश्चर्यसूचकः निपातः। ताम्रं - शुल्बं (copper) अन्ये इतरे ब्राह्णकुमाराः। अनेन - अनेन ताम्रेण दारिद्र्यं - दरिद्रावस्थां। गच्छामः - यामः। सोऽब्रवीत् - सः + अब्रवीत्। अब्रवीत् - उवाच।

नाहम् - न + अहम्। अहम् - चतुर्षु ब्राह्मणकुमारेषु अन्यतमः (ताम्रसिद्धिः)
यथेच्छया - इच्छानुसारम्।

**संक्षेपः** - भैरवानन्दः ब्राह्मणकुमाराणां वचांसि श्रुत्वा धनसम्पादनाय बहून् उपायान् सूचयन् सिद्धिवर्तिचतुष्टयं तेभ्यः अदात्। पुनः एवमुपदिदेश। हिमालयदिशं प्रति गच्छ। तत्र संप्राप्य कुत्र युष्माकं वर्तिः हस्तात् पतति तत्र खननं क्रियताम्। तत्र निधिः भविष्यति। तद् स्वीकृत्य प्रतिनिवर्तन्तु। एतदाकर्ण्य ते कुमाराः गताः। एकस्य हस्तात् वर्तिः पपात। अत्र खननं चकार। तदा ताम्रमयीं भूमिं ददर्शुः। तदानीं प्रथमः अवदत्। अयि मित्राणि, यथेच्छं ताम्राणि स्वीक्रियन्ताम्। तदा अन्ये अवदन् - हे मूढ, अनेन ताम्रेण किं प्रयोजनम्? गच्छामः। दरिद्रतां दूरीकर्तुं ताम्रलाभेन न श्क्यते इति। तदा प्रथमः अवदत् - भवन्तः गच्छन्तु। अहं तृप्त; भवामि। सः प्रभूतं ताम्रं सम्पाद्य प्रतिनिवृत्तवान्।

**गद्यम् - ६**

**त्रयाणां ब्राह्मणकुमाराणां गमनम्। ते त्रयोऽप्यग्रे प्रस्थिताः।**

अथ किञ्चिन्मात्रं गतस्याग्रेसरस्य वर्तिर्निपपात। सोऽपि यावत्खनितुमारब्धः तावद्रूप्यमयी क्षितिः। ततः प्रहर्षितः प्राह - 'यद् भोः गृह्यतां यथेच्छया रूप्यम्। नाग्रे गन्तव्यम्'। तावूचतुः - 'भोः, पृष्टतस्ताम्रमयी भूमिरग्रतो रूप्यमयी। तन्नूनमग्रे सुवर्णमयी भविष्यति। तदनेन प्रभूतेनापि दारिद्र्यनाशो न भवति। तदावामग्रे यास्यावः'। एवमुक्त्वा द्वावप्यग्रे प्रस्थितौ। सोऽपि स्वशक्त्या रूप्यमादाय निवृत्तः।

**व्याख्या** - त इति।

त्रयोप्यग्रे - त्रयः + अपि + अग्रे। अग्रे - पुरतः। गतस्याग्रेसरस्य - गतस्य +अग्रेसरस्य। अग्रेसरस्य - पुरतः गच्छतः। खनितुं - खननाय। रूप्यं - रजतम्। ततः - तदा। यथेच्छया - इच्छानुसारम्। नाग्रे - न + अग्रे। अग्रे - पुनरपि गमनाय। तावूचतुः - तौ + ऊचतुः। ऊचतुः - अवदताम्। भूमिः - वसुधा। सुवर्णमयी - स्वर्णमयी। प्रभूतेनापि - प्रभूतेन + अपि। यास्यामः - गमिष्यामः। द्वावप्यग्रे - द्वौ + अपि + अग्रे। आदाय - गृहीत्वा।

**संक्षेपः -** अवशिष्टाः त्रयः ब्राह्मणकुमाराः यात्रामकुर्वन्। किञ्चिद्गमनानन्तरं द्वितीयस्य हस्तात् वर्तिः पपात। सः तत्र खननं चकार। तदा रजतमयीं भूमिं दृष्ट्वा यथेच्छं रजतं गृहीत्वा प्रतिनिवर्तुम् आह्वानं चकार। अहं पुनरपि गन्तुं न तत्परः। इतरौ द्वौ रजतेन असंतृप्तौ अभूताम्। 'पुनरपि गमिष्यामः तर्हि सुवर्णमयी भूमिः भविष्यति। आवाम् अग्रे यास्यावः'इत्युक्त्वा तौ अगच्छताम्। रजतसिद्धिः स्वशक्त्यनुसारं रजतं स्वीकृत्य स्वगृहाय अगच्छत्।

**गद्यम् - ७**

**सुवर्णेनापि कश्चन ब्राह्मणकुमारः न तृप्तः।**

तयोरपि गच्छतोरेकस्याग्रे वर्तिः निपात। खनिते सुवर्णमयी भूमिः। सः आह - 'गृह्यतां यथेच्छया सुवर्णम्। सुवर्णादन्यन्न किञ्चिदुत्तमं भविष्यति'। स प्राह - 'मूढ, न किञ्चिद्वेत्सि। प्राक्ताम्रं ततो रूप्यं ततः सुवर्णं, तन्नूनमतः परं रत्नानि भविष्यन्ति, येषामेकतमेनापि दारिद्र्यनाशो भवति। तदुत्तिष्ठाग्रे गच्छावः। किमनेन भारभूतेनापि प्रभूतेन'। स आह - 'गच्छतु भवान्। अहमत्र स्थितस्त्वां प्रतिपालयिष्यामि'।

**व्याख्या -** तयोरिति।

गच्छतोरेकस्याग्रे - गच्छतोः + एकस्य +अग्रे। तयोः ब्राह्मणकुमारयोरेकस्य पुरतः। भूमिः - धरा। सः - यस्य हस्तात् वर्तिः निपपात, सः (सुवर्णसिद्धिः) सुवर्णं - स्वर्णं (हिरण्यम्)। सुवर्णादन्यन्न - सुवर्णात् + अन्यत् + न। सुवर्णवत् मूल्ययुक्तं लोहं नास्ति। प्राह - अवदत्। किञ्चिद्वेत्सि - किञ्चित् + वेत्सि। किञ्चित् - किमपि। ततः -अनन्तरम्। तदुत्तिष्ठाग्रे - तत् + उत्तिष्ठ + अग्रे। अग्रे - पुरतः। भारभूतेनापि - भारभूतेन न अपि। भारभूतेन - भारयुक्तेन। स आह - स्वर्णलाभेऽपि असन्तुष्टः अवदत्। गच्छतु - यातु। स्थितस्त्वाम् - स्थितः + त्वाम्। स्थितः - स्थितिं कुर्वन्।

**संक्षेपः** - अवशिष्टौ द्वौ ब्राह्मणकुमारौ पुनरपि अगच्छताम्। तदा एकस्य हस्तात् वर्तिः पपात। सः वर्तिपतितं स्थलम् अखनत्। तदा प्रभूतं सुवर्णम् अपश्यत्। तदा स्वसुहृदमपि इच्छानुसारं सुवर्णं ग्रहीतुमवदत्। तदा

परिहासपूर्वं तमवदत् - प्रथमं ताम्रं, पुनः रूप्यं, पुनः सुवर्णम्। अतः परं रत्नानि भविष्यन्ति। अहं रत्नानि इच्छामि। सुवर्णेन किं प्रयोजनम्? केवलं भारभूतमेव। रत्नानि तु अमूल्यानि भवन्ति। एतदाकर्ण्य सः सुहृदुवाच - 'भवान् गच्छतु। अहं सुवर्णेन तृप्तः भवन्तं प्रतीक्ष्य अत्रैव वर्तिष्ये'इति।

**गद्यम् - ८**

**सुवर्णेनापि अतृप्तस्य ब्राह्मणकुमारस्यावस्था।**

तथानुष्ठिते सोऽपि गच्छन्नेकाकी ग्रीष्मार्कप्रतापसंतप्ततनुः पिपासाकुलितः सिद्धिमार्गच्युतः इतश्चेतश्च बभ्राम। अथ भ्राम्यन्स्थलोपरि पुरुषमेकं रुधिरप्लावितगात्रं भ्रमच्चक्रमस्तकम् अपश्यत्। ततो द्रुततरं गत्वा तमवोचत् - 'भोः , को भवान् किमेवं चक्रेण भ्रमता शिरसि तिष्ठसि। तत्कथय मे यदि कुत्रचिज्जलमस्ति'। एवं तस्य प्रवदस्तच्चक्रं तत्क्षणात्तस्य शिरसो ब्राह्मणमस्तके चटितम्।

**व्याख्या** - तथेति।

सोऽपि - सः + अपि। सः अतृप्तः ब्राह्मणकुमारः। भ्राम्यन् - भ्रमणं कुर्वन्। गत्वा - (क्त्वान्तमव्ययम्) गमनं कृत्वा। भवान् - अत्र चक्रधरः। चक्रेण - रथाङ्गेन। मे - मह्यम्।

प्रवदतस्तच्चक्रम् - प्रवदतः + तत् + चक्रम्। प्रवदतः भाषणं कुर्वतः।

**संक्षेपः** - चतुर्थः ब्राह्मणकुमारः (सुवर्णेनापि अतृप्तः) रत्नानि मिलिष्यति इति चिन्तया एकाकी सन् पुनरपि चचाल। ग्रीष्मकालस्य अत्यधिकेन आतपेन पीडितः सन् दह्यमानः भूत्वा पिपासया आकुलितः भ्रंशितमार्गः इतस्ततः बभ्राम। तदा कञ्चन पुरुषं ददर्श। तस्य पुरुषस्य शिरसि एकं चक्रं वर्तते। तच्चक्रं भ्रमति। शरीरमासकलं रक्तधाराः प्रवहन्ति। कठिनां वेदनामनुभवति। तदा महता वेगेन तस्य समीपमेत्य 'भवान् कः? किमर्थं चक्रं धरसि? अत्र यत्र कुत्रापि जलम् अस्ति वा?'इत्येवमपृच्छत्। तदैव तस्य पुरुषस्य शिरसः तच्चक्रं ब्राह्मणकुमारस्य शिरसि निपतितम्।

**गद्यम् - ९**

**पूर्वतनस्य चक्रधरस्य लोभिनः ब्राह्मणकुमारस्य च सम्भाषणम्।**

स आह - 'भद्र, किमेतत्?' स आह - 'यन्ममाप्येवमेवैतच्छिरसि चटितम्। तत्कथय कदैतदुत्तरिष्यति। महती मे वेदना वर्तते'। स आह - 'यदा त्वमिव कश्चिद्धृतसिद्धिवर्तिरेवागत्य त्वामालापयिष्यति तदा तस्य मस्तके चटिष्यति'। स आह - 'कियान्कालस्तवैवं स्थितस्य?' स आह - 'साम्प्रतं को राजा धरणीतले?' स आह - 'वीणावत्सराजः'। स आह - 'अहं तावत्कालसंख्यां न जानामि। परं यदा रामो राजासीत्तदाहं दारिद्र्योपहतः सिद्धिवर्तिमादायानेन पथा समायातः। ततो मयान्यो नरो मस्तकधृतचक्रो दृष्टः पृष्टश्च। ततश्चैतज्जातम्'। स आह - 'भद्र, कथं तवैवं स्थितस्य भोजनजलप्राप्तिरासीत्'? स आह - 'भद्र धनदेन निधानहरणभयात्सिद्धानामेतद्भयं दर्शितम्। तेन कश्चिदपि नागच्छति। यदि कश्चिदायाति स क्षुत्पिपासानिद्रारहितो

जरामरणवर्जितः केवलमेवं वेदनाम् अनुभवतीति। तदाज्ञापय मां मुक्तोऽस्मि। साम्प्रतं स्वगृहं यास्यामि'इत्युक्त्वा गतः।

**व्याख्या** - स इति।

सः - ब्राह्मणकुमारः। भद्र - हे मान्य।

यन्ममाप्येवमेवैतच्छिरसि - यत् + मम + अपि + एव + एतत् + शिरसि।

कदैतदुत्तरिष्यति - कदा + एतत् +उत्तरिष्यति। कथय - वद। महती वेदना मे वर्तते। कश्चिद्धृतसिद्धिवर्तिरेवमागत्य - कश्चित् + धृतसिद्धिवर्तिः + एवम् +आगत्य। सिद्धवर्तिधारिणः कश्चन पुरुषः एवमत्रागत्य। कियान्कालस्तवैवम् - कियान् + कालः + तव + एवम्। कति कालं त्वमनेन रूपेण वर्तसे। राजा - भूपतिः। वीणावत्सराजः - वत्सराजः वीणावादने अतिसमर्थः। कालसंख्यां न जानामि - कति कालमतीतमिति न जानामि। परं - किन्तु। दारिद्र्योपहतः - दारिद्र्येण अवशः भूत्वा। पृष्टश्च - पृष्टः + च। ततश्चैतज्जातम् - ततः + च + एतत् + जातम्। तदानीमेव अनेन रूपेण संजातम्।

भोजनजलप्राप्तिः - भोजनस्य जलस्य च प्राप्तिः। धनदः - कुबेरः। सिद्धानां सन्यासिनः सकाशात् सिद्धिप्राप्तानाम्। एतद्भयं - चक्रपतनभयं निधानहरणभयात् - निधिमपहरिष्यतीति भयात्। कश्चिदपि - कश्चित् +अपि। कश्चिदपि - कोऽपि। क्षुत्पिपासानिद्रारहितः - क्षुधां पिपासां निद्रां च रहितः। पातुमिच्छा पिपासा। जरामरणवर्जितः - जरां मरणं च रहितः। तदाज्ञापय - तत् +आज्ञापय। मह्यं मोचनाय अनुमतिं च दीयतु। साम्प्रतं - सहसा।

**संक्षेपः -** अविचार्यसमये स्वशिरसि चक्रपातेन व्याकुलः ब्राह्मणकुमारः एवमवदत् - किमेतत् इति। पूर्वतनचक्रधारी एवमपृच्छत् - मम शिरसि अनेन रूपेण चक्रपतनं संजातम्। ब्राह्मणः - कदा एतच्चक्रं मम शिरसः निर्गच्छति? महती वेदना वर्तते। पूर्वतन चक्रधारी - त्वामिव कश्चन सिद्धवर्तिकः कदा आगत्य सम्भाषणं करिष्यति तत्कालपर्यन्तं तव शिरसि इदं चक्रं भ्रमति। ब्राह्मणः - कति कालं त्वं अत्रावर्तथाः? पूर्वतनचक्रधारी - इदानीं कः राज्यं बिभर्ति? ब्राह्मणः - वीणावादने प्रवीणः वत्सराजः। पूर्वतनचक्रधारी - कति कालमिति न जानामि। यदा रामः राजा आसीत् तदा अहमत्रमागतः। कस्यचन पुरुषस्य शिरसि भ्रमन्तं चक्रं दृष्ट्वा अहमभाषम्। तदा एतत् संजातम्। ब्राह्मणः - भवन्, तव भोजनं जलं च कथं सिद्धम्? पूर्वतनचक्रधारी - सन्यासिनः सकाशात् सिद्धिंप्राप्ताः पुरुषाः निधिम् अपहरिष्यन्ति इति भयात् कुबेरेण एतत् चक्रपतनयन्त्रं निर्मितवान्। अतः न कोऽपि अत्रागमिष्यति। अपि च यदि कश्चनागमिष्यति तर्हि सः क्षुत्पिपासारहितः निद्रारहितः जरामरणवर्जितः भविष्यति। केवलं सदा वेदनामेव अनुभविष्यति।

हे मान्य, अतः गृहं गन्तुं मह्यम् अनुमतिं दीयताम् इत्युक्त्वा सः अगच्छत्।

**गद्यम् - १०**

**सुवर्णसिद्धिः स्वसुहृदं ब्राह्मणकुमारं अन्विष्य पश्यति, तयोः मिथः सम्भाषणम्।**

अथ तस्मिंश्चिरयति स सुवर्णसिद्धिस्तस्यान्वेषणपरस्तत्पदपङ्क्त्या यावत्किञ्चिद्वनान्तरमागच्छति तावद्रुधिरप्लावितशरीरस्तीक्ष्णचक्रेण मस्तके भ्रमता सवेदनः क्वणन्नुपविष्टस्तिष्ठति। ततः समीपवर्तिना भूत्वा सबाष्पं पृष्टः - 'भद्र, किमेतद्?' स आह - 'विधिनियोगः'। स आह - 'कथं तत्? कथय कारणमेतस्य'।

सोऽपि तेन पृष्टः सर्वं चक्रवृत्तान्तमकथयत्। तच्छ्रुत्वासौ तं विगर्हयन्निदमाह - 'भोः निषिद्धस्त्वं मयानेकशो न श्रृणोषि मे वाक्यम्। तत्किं क्रियते? विद्यावानपि कुलीनोऽपि बुद्धिरहितः।' अथवा साध्विदमुच्यते।

**व्याख्या** - अथेति।

सुवर्णसिद्धिस्तस्यान्वेषणपरस्तत्पदपङ्क्त्या - सुवर्णसिद्धिः तस्य अन्वेषणपरः तत्पदपङ्क्त्या। तस्य पादस्पर्शेन सूचितेन मार्गेण। तस्य पादयोः पङ्क्तिः तत्पादपङ्क्तिः, तया। तीक्ष्णचक्रेण - तीक्ष्णेन चक्रेण। क्वणन् - शब्दायमानः सन्। समीपे वर्तत इति समीपवर्ति, तेन समीपवर्तिना। निकटस्थेन। एतत् भयानकं रूपम्। विधेः नियोगः - विधिनियोगः। कथं तत् - कथम् एतत्प्राप्तम्। कथय - वद। अकथयत् - कथितवान्। तेन पृष्टः सः - सः तमपृच्छत्।

विगर्हयन्निदम् - विगर्हयन् + इदम्। मे - मम। वाक्यं भवान् बहु वारं निषिद्धवान्। तत्किं क्रियते? इदानीम् किमपि कर्तुं न शक्यते। कुलीनः - कुले जातः। साध्विदम् - साधु + इदम्।

**संक्षेपः** - चतुर्थस्य ब्राह्मणकुमारस्यागमनं प्रतीक्ष्य सुवर्णसिद्धिः बहुसमयमवर्तत। अतः तमन्वेष्टुं सः सुहृदः पादचिह्नमवलोक्य गतवान्। वनान्तरे प्राप्ते रुधिरप्लावितशरीरं भ्रमन्तं, तीक्ष्णचक्रं मस्तके धृत्वा वेदनाम् अनुभवन् शब्दायमानं मित्रं दृष्ट्वा किमेतत् इति समीपवर्ती भूत्वा अपृच्छत्। सविस्तरं कथनाय प्रेरितवान्। मित्रं तु सर्वं चक्रवृत्तान्तं सुवर्णसिद्धये निवेदितवान्। वृत्तान्तं श्रुत्वा सुवर्णसिद्धिरेवमवदत्। भवन्तं बहुवारं सुवर्णैः तृप्तिं प्राप्तुं पुनरपि गमनं न कार्यमिति सूचितवान्। त्वं न श्रृणोषि। भवान् पण्डितः भवति। उन्नतकुलजातश्च। किन्तु बुद्धिरहितः। अथवा इदं वचनं साधु एव।

**श्लोकः - १४**

**बुद्धिरेव श्रेष्ठा।**

**वरं बुद्धिर्न सा विद्या विद्याया बुद्धिरुत्तमा।**
**बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः।।**

**पदच्छेदः** - बुद्धिर्न - बुद्धिः + न।
बुद्धिरुत्तमा - बुद्धिः + उत्तमा।

| अन्वयः | - | अन्वयार्थः |
|---|---|---|
| बुद्धिः वरं | - | मतिः श्रेष्ठं |
| न सा विद्या | - | न तु पाण्डित्यं |
| विद्यया बुद्धिरुत्तमा | - | विद्यामपेक्ष्य मतिरेव श्रेष्ठा |
| बुद्धिहीना विनश्यन्ति | - | बुद्धिरहिताः नश्यन्ति |
| ते सिंहकारकाः यथा | - | ते सिंहस्य पुनर्जन्मदातारः इव। |

**सारः** - बुद्धिरेव श्रेष्ठा। विद्यामपेक्ष्य बुद्धिः कार्या। पण्डिताः अपि बुद्धिहीनाः चेत् ते नश्यन्ति। यथा सिंहस्य पुनर्जन्मदातारः इव।

**गद्यम् - ११**

**सिंहकारककथां श्रोतुं चक्रधरः तात्पर्यं प्रकटयति।**

चक्रधर आह - 'कथमेतत्?' सुवर्णसिद्धिः आह।

**व्याख्या** - चक्रधर इति।

चक्रधरः सिंहकारककथां श्रोतुं तात्पर्यं प्रकटयति। सुवर्णसिद्धिः कथां कथयितुं उत्सुकः भवति।

**संक्षेपः** - बुद्धिरेव श्रेष्ठा इति समर्थनाय सिंहकारककथां श्रोतुं चक्रधरस्य तात्पर्यं, कथां कथयितुं सुवर्णसिद्धिः उत्सुकश्च भवति।

## पुनरावृत्तिः (Recap)

- कस्मिंश्चित् ग्रामे दरिद्राः चत्वारः ब्राह्मणकुमाराः आसन्। ते एकत्र सम्मिल्य दारिद्र्यविषये चिन्चयामासुः। अतः स्वदेशं विहाय धनं सम्पादयितुम् ते अवन्तीं प्रापुः।
- तत्र भैरवानन्दनामानं योगिवर्यं अपश्यन्।
- योगीवर्यस्य उपदेशानुसारं चत्वारः हिमालयदिशां प्रति अगच्छन्।
- अत्रान्तरे अन्यतमस्य हस्तात् वर्तिः निपपात। सः अत्र खननं कृत्वा यथेष्टं ताम्रं गृहीत्वा निवृत्तः।
- अत्रान्तरे द्वितीयस्य हस्तात् वर्तिः पपात। तत्र खननं कृत्वा रूप्यमयीं वसुधाम् अपश्यन् स्वशक्त्या रुप्यमादाय प्रतिनिवृत्तः।
- तदा तृतीयस्य हस्तात् वर्तिः अपतत्। सः तत्र खननं कृत्वा सुवर्णमयीं भूमिं ददर्श।
- चतुर्थः ब्राह्मणकुमारः एकाकी सन् सञ्चचार अत्यातपेन क्षीणितः तदा एकं पुरुषं ददर्श।
- विस्मयाकुलः ब्राह्मणः किमेतत् इति पूर्वतनचक्रधारिणमपृच्छत्। सः सर्वं वृत्तान्तमकथयत्।
- मस्तके भ्रमन्तं चक्रं, देहमासकलं रक्तेन निर्भरं स्वमित्रं दृष्ट्वा तस्य समीपमेत्य किमिदमिति अपृच्छत्। चतुर्थः ब्राह्मणः सर्वं वृत्तान्तं कथितवान्।
- तदा सुवर्णसिद्धिरवदत्। पाण्डित्यात् श्रेष्ठा भवति बुद्धिः।
- सिंहकारककथाम् इव त्वं बुद्धिरहितः इति।
- सिंहकारककथां श्रोतुं तत्परं चक्रधरं तां कथां कथयितुं उत्सुकः बभूव सुवर्णसिद्धिः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. बाह्यः क्षणेन भवतीति विचित्रमेतत् - विचित्रं किम्?
२. के स्वप्राणान् तृणमिव गणयन्ति?
३. ब्राह्मणकुमारेषु कः अतीव लोभी?
४. ब्राह्मणकुमाराः अवन्तीं प्राप्य कञ्चन योगिनमपश्यन्। तस्य योगिनः नाम किम्?
५. कस्य यशः मानं न मानवाः न मानयन्ति?
६. साहसिकाः पुरुषाः कीदृशाः भवन्ति?
७. मासांश्चतुरो निद्रां यः सेवती - कः?
८. गच्छतु भवान् अहमत्र स्थितस्त्वां प्रतिपालयिष्यामि - कस्येदं वचनम्?
९. निधिरक्षार्थं कुबेरः किं कृतवान्?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

१. ब्राह्मणकुमाराणां भैरवानन्ददर्शनम्।
२. कुतः ब्राह्मणाः स्वदेशत्यागाय सन्नद्धाः अभवन्?
३. भैरवानन्दः ब्राह्मणेभ्यः दत्ताः उपदेशाः के?
४. सुवर्णसिद्धिः चक्रधरं किमवदत्?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a Paragraph)**

१. दारिद्र्योपहताः परस्परं मन्त्रं चक्रुः। के ते? किं मन्त्रयामासुः?
२. लोभाविष्टचक्रधरकथायाः गुणपाठं विशदयत।
३. सिद्धानामेतच्चक्रपतनरूपभयं दर्शितम्। केन? कुतः?

**II. आशयं विशदयत।**

१. ऋते समुद्रादन्यः को बिभर्ति बडवानलम्।
२. भोः गृह्यतां यथेच्छया रूप्यम्।

## निर्दिष्टाभ्यासः (Assignments)

१. लोभाविष्टचक्रधरकथां संक्षिप्य लिखत।
२. बुद्धिरेव श्रेष्ठा समर्थयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. जितेन्द्रियत्वम्।
२. साहसिकाः।
३. चतुर्थः ब्राह्मणकुमारः।
४. भैरवानन्दः।
५. दरिद्रस्य।
६. साहसिकाः पुरुषाः शरीरं तृणतुल्यं मन्यन्ते, तेषां कर्माणि कदाचित् विधिमपि अतिक्रमन्ते।
७. विष्णुः क्षीरसागरे चतुरो मासान् निद्रां सेवते।
८. सुवर्णसिद्धिः स्वसुहृदं चतुर्थं ब्राह्मणमवदत्।
९. सन्यासिनां साकाशात् सिद्धिं प्राप्ताः जनाः निध्यपहरणाय आगमिष्यन्तीति भयात् कुबेरः मस्तके भ्रमन्तं चक्रं निर्मितवान्।

## सूचनाग्रन्थौ (References)


१. विष्णुशर्मा. पञ्चतन्त्रम्, चौखम्बा संस्कृतसीरीस्, वाराणसि।
२. विष्णुशर्मा. पञ्चतन्त्रम्, पञ्चमं तन्त्रम्, अपरीक्षितकारकं, व्याख्या राधालक्ष्मी, कार्तिका बुक्स्, तिरुवनन्तपुरम्, २०११


## अधिकवाचनग्रन्थौ (Suggested Readings)


१. आचार्य लोकमणि दहालः, संस्कृतसाहित्येतिहासः, नीतिकथा - लोककथा, चौखम्बा कृष्णदास् अक्कादमी, वाराणसी २०१६
२. Arthur w Ryder. *The Panchatantra* of Vishnu Sharma (trans), University of Chicago press, Chicago,1925

BLOCK -3

# नाटकसाहित्याविर्भावः, विकासः, सांकेतिकपदानि, रूपकविभागश्च इत्येतेषां सामान्यावगमनम्

# Unit - 1

## रूपकविभागाः

### उद्देश्यानि (Learning Outcomes)

संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।

नाट्यप्रयोगपरिचयः प्राप्नोति।

- भारतीयरूपकाणां ज्ञानं प्रप्नोति।
- संस्कृतसौन्दर्यसङ्कल्पपरिज्ञानं लभते।

  संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।

  संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभ
- नाट्यप्रयोगपरिचयः प्राप्नोति।
- नाटकप्रभृतीनां आस्वादनक्षमतोत्पादनम्

  संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।

  ºÉÆºEÞòiÉºÉÉèxnùªÉÇ¶ÉÉºjÉ{ÉÊ®úYÉÉxÉÆ ±É¦ÉiÉ

  xÉÉ]õ¬|ÉªÉÉäMÉ{ÉÊ

### प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतसाहित्ये काव्यानां अद्वितीयं स्थानमस्ति। ततः साहित्यं नाम किमिति चिन्त्यताम्। साहित्यं इति पदस्य सहितभावःइत्यर्थः। तत्र शब्दार्थयोःसहभावः एव साहित्यं इति उच्यते।

काव्यं तावत् द्विविधम्। दृश्यकाव्यं, श्रव्यकाव्यं चेति। तत्र किन्नाम काव्यमिति विचारे 'कवयति इति कविः, तस्य कर्म काव्यम्'इति विद्याधरः। 'कौति शब्दायते विमृशति रसभावानिति कविः। तस्य कर्म काव्यमिति' भट्टगोपालः। 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'इति काव्यप्रकाशकारः मम्मटभट्टः।

‘प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनुप्राणनाज्जीवेत् वर्णनानिपुणः कविः।।
तस्य कर्म काव्य’मिति भामहाचार्यः। एवं आचार्यवरैः कविभिः काव्यलक्षणानि उक्तानि।

## मुख्यपदानि (Key terms)

नाटकम्, प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथिः, अङ्कः, ईहामृगः।

## Discussion

तत्र काव्यस्य द्वैविध्ये द्रष्टुं योग्यं दृश्यम्। श्रोतुं योग्यं श्रव्यं च। रूपकादयः दृश्यकाव्ये अन्तर्भवन्ति। श्रव्यकाव्यं तु गद्यं, पद्यं, मिश्रं अथवा चम्पूकाव्यञ्चेति त्रिधा भवति।

दृश्यं दर्शनीयप्राधान्यमभिनेयं भवति। अभिनययोग्यमिति दृश्यकाव्यम्। रूपाणां रामादिस्वरूपाणाम् आरोपात् वेषाभिनयाभ्यां तदारोपस्य बोधनात् रूपकमुच्यते। रूपकाणि दश।

**नाटकमथ प्रकरणं भाणः प्रहसनं डिमः।**
**व्यायोगसमवकारवीथ्यङ्केहामृगाः मताः।**।इति।

नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथि, अङ्कः, ईहामृगः इति दशरूपकाणि।

### १. नाटकम्।

रूपकाणां सम्पूर्णं लक्षणं नाटकम् एव विद्यते। नाटके नानारसानां अङ्गाङ्गिभावेन प्राचुर्यं वर्तते। नाटकस्य प्रारंभः परिसमाप्तिश्च मङ्गलपूर्वको भवितव्य इति व्यवस्था वर्तते। नाटकारंभे रङ्गविघ्नोपशमाय नान्दी कार्या। नाटकान्ते विश्वशान्त्याशंसापूर्वकं आशंसावाक्यं भवति भरतवाक्यम्।नटैः क्रियमाणेन चतुर्विधाभिनयेन सहैव नृत्तगीतवाद्यरूपस्य तैर्यत्रिकस्य च समञ्जससन्निवेशो पि नाटके विद्यते। नाटकं ख्यातवृत्तं स्यात्। पञ्चसन्धिसमन्वितं भवेत्। आधुनिकाः नाटकं कविकल्पितवृत्तम् इति। पञ्च वा पञ्चाधिकाः वा अङ्काः, प्रख्यातवंशः, धीरोदात्तः, प्रतापवान्, दिव्यः, दिव्यादिव्यः, गुणवान् नायकः भवेत्। श्रृङ्गारः, वीरो वा अङ्गी रसः स्यात्। एवं नाटके नानारूपाणां कलानामास्वादनायाप्यवसरो विद्यत इत्यतः काव्येषु नाटकं रम्यम् इति सहृदयसम्मतिरजायत। कालिदासस्य अभिज्ञानशाकुन्तलम् उदाहरणम्।

### २. प्रकरणम्।

कथावस्तु कविकल्पितं लौकिकं च भवेत्। धीरप्रशान्तो नायकः ब्राह्मणः, अमात्यः, वणिक् वा भवेत्। नायिका कुलस्त्री गणिका वा। नायिकाभेदानुसारेण प्रकरणस्या त्रैविध्यम् - नायिका कुलस्त्री चेत् शुद्धप्रकरणः,गणिका चेत् विकृतप्रकरणः, उभे पि नायिके चेत् सङ्कीर्णप्रकरणञ्च। अङ्गीरसः श्रृङ्गारः। पञ्चाधिका दशपराः अङ्काः। मृच्छकटिकम्, मालतीमाधवमादिः उदाहरणम्।

### ३. भाणः।

एकाङ्कः। कश्चन बुद्धिमान् द्यूतकरः, चोरः, धूर्तः, विटो वा, आत्मना अन्यैर्वा कृतं उपवर्णयति इत्येवंरूपो भवति भाणः। नटः स्वस्य अन्यानां चानुभववर्णनं करोति। उक्तिप्रत्युक्तयः आकाशभाषितद्वारा सम्बोधनादिभिः क्रियन्ते। श्रृङ्गारो वीरो वा रसः। भाणे दश लास्याङ्गान्यपि प्रयुज्यन्ते। वररुचेः उभयाभिसारिका प्रसिद्धः भाणः।

**४. प्रहसनम्।**

हास्यरसप्रधानम् रूपकं भवति प्रहसनम्।कविकल्पितमितिवृत्तम्। प्रकृष्टं हसति इति प्रहसनम्। विष्कम्भप्रवेशकरहितम्। प्रहसनस्य शुद्धं, वैकृतं,सङ्करं चेति त्रयः प्रकाराः सन्ति। पाषण्डितः, विप्राः, चेटचेटीविटादयश्च अस्मिन् प्राचुर्येण भवेयुः। तेषां चरितैः, वेषभाषादिभिश्च सङ्कुलं हास्यप्रधानञ्चापि भवति शुद्धम् प्रहसनम्। कामुकादीनां वचोवेषादिकं स्वीकृतवतां नपंसक-कञ्चुकि-तापसादीनां चरितैर्युक्तं भवति वैकृतं प्रहसनम्। वीथ्याख्यास्याङ्गैः मिश्रितं धूर्तसङ्कुलं च भवति सङ्कीर्णम् । महेन्द्रविक्रमस्य मत्तविलासप्रहसनं प्रहसनस्योदाहरणम्।

**५. डिमः।**

प्रख्यातेतिवृत्तः। चतुरङ्कः। रौद्ररसः अङ्गी। अन्ये रसाः अङ्गाः। उद्धतनायकाः, देवगन्धर्वयक्षरक्षोरगादयः षोडश नायकाः। मायाभिः, इन्द्रजालैः, सङ्ग्रामैः, क्रोधोद्भ्रान्तादिचेष्टितैः, चन्द्रसूर्यग्रहणादिदृश्यैश्च व्याप्तं भवति इदम् रूपकम्। वि.राघवस्य प्रतापरुद्रविजयः, रासाख्यकवेः मन्मथोन्मथनम् च उदाहरणे।

**६. व्यायोगः।**

व्यायुज्यन्ते बहवः पुरुषाः अस्मिन्निति व्यायोगः। पुराणेतिहासादिप्रसिद्धं वृत्तं अस्य इतिवृत्तं स्यात्। एकाङ्कः स्वल्पस्त्रीजनसंयुतः बहुपुरुषपात्रता च स्यात्। प्रख्यातः, राजर्षिः, दिव्यः धीरोदात्तः च नायकः भवेत्। श्रृङ्गारहास्यशान्तभिन्नाः रसाः। भासस्य मध्यमव्यायोगः उदाहरणम्।

**७. समवकारः।**

समवकीर्यन्ते अर्थाः अस्मिन्निति समवकारः। देवासुराश्रयं प्रसिद्धेतिवृत्तं समवकारे। त्रयः अङ्काः। प्रख्याताः देवमानवाः द्वादशनायकाः उदात्ताः। मुख्यो रसः वीरः। अन्ये रसाः अपि अङ्गाः। भासस्य पञ्चरात्रम् उदाहरणम्।

**८. वीथिः।**

वीथी एकपात्रप्रयोजिता। वीथ्यामेकाङ्को भवेत्। नायकः कल्प्यते। आकाशभाषितैः चित्रां प्रत्युक्तिमाश्रितः नटः श्रृंगारो हि अङ्गी रसो भवति, अन्येषां रसानामपि स्पर्शः स्यात्। माधवीवीथी उदाहरणम्।

**९. अङ्कः।**

उत्सृष्टिकाङ्कःइति नामान्तरेण प्रसिद्धं रूपकं भवति अङ्कः। नाटकाद्यङ्कात् भेदः प्रदर्शयितुं उत्सृष्टिकाङ्कःइति नामान्तरं उपयुज्यते। एकाङ्कः। प्रकृताः नराः नायकाः। प्रख्यातमितिवृत्तम्। स्थायीरसः करुणः। बहुस्त्रीणां विलापः भवेत्। युद्धं जयपराजयौ च वाचा अत्र प्रकाश्यन्ते। भासस्य ऊरुभङ्गम् उदाहरणम्।

**१०. ईहामृगः।**

मृगवदलभ्यां नायिकां नायको स्मिन्नीहते इतीहामृगः। ख्यातं कल्पितं किञ्चित् इतिवृत्तम्। चत्वारो अङ्काः। संकर्षसंकुलं कथानकम्। देवमानवयोः एकस्य नायकत्वे, अपरे प्रतिनायकः कार्यः। उभावपि इतिहासप्रसिद्धौ धीरोद्धतौ भवितव्यौ। प्रतिनायकः बुद्धिविपर्यासादेव अनुचितकर्मसु व्यापृतो भवति। वत्सराजस्य रुक्मिणीहरणम् उदाहरणम्।

इति रूपकप्रकारः।

## पुनरावृत्तिः (Recap)

- काव्यं द्विविधम्। दृश्यकाव्यं, श्रव्यकाव्यं चेति।
- नाटकं, प्रकरणं, भाणः, प्रहसनं, डिमः, व्यायोगः, समवकारः, वीथि, अङ्कः, ईहामृगः इति दशरूपकाणि।
- नाटकं ख्यातवृत्तं स्यात्। पञ्चसन्धिसमन्वितं भवेत्।
- प्रकरणम् कथावस्तु कविकल्पितं लौकिकं च भवेत्।
- भाणः एकाङ्कः धूर्तनायकचरितः।
- प्रहसनम् कविकल्पितमितिवृत्तम्। प्रकृष्टं हसति इति प्रहसनम्।
- डिमः प्रख्यातेतिवृत्तः। चतुरङ्कः।
- व्यायोगः पुराणेतिहासादिप्रसिद्धं वृत्तं अस्य इतिवृत्तं स्यात्। एकाङ्कः
- समवकारः देवासुराश्रयं प्रसिद्धेतिवृत्तं समवकारे। त्रयः अङ्काः।
- वीथिः वीथ्यामेकाङ्को भवेत्। नायकः कल्प्यते।
- अङ्कः एकाङ्कः। प्रकृताः नराः नायकाः। प्रख्यातमितिवृत्तम्।
- ईहामृगः ख्यातं कल्पितं किञ्चित् इतिवृत्तम्। चत्वारो अङ्काः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. द्रष्टुं योग्यं किम् ?
२. के दृश्यकाव्ये अन्तर्भवन्ति?
३. कति रूपकाणि सन्ति?
४. ख्यातवृत्तं पञ्चसन्धिसमन्वितं स्यात्। किम्?
५. प्रकरणस्य उदाहरणानि कानि?
६. भाणस्य रसः कः?
७. प्रकृष्टं हसति इति किम्?
८. पुराणेतिहासादिप्रसिद्धं वृत्तं कस्य इतिवृत्तं स्यात्?
९. समवकारे कति अङ्काः?
१०. प्रकृताः नराः नायकाः भवन्ति। रूपकं किम्?
११. ईहामृगे कति अङ्काः?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

१. रूपकं नाम किम्? तानि कानि?
२. प्रकरणं नाम किम्?
३. वीथी नाम का?
४. अङ्कस्य नामान्तरं किम्?
५. समवकारः कः?

## निर्दिष्टाभ्यासः (Assignments)

१. रूपकाणि कानि उदाहरणसहितं विशदयत ।
२. रूपकेषु नाटकस्य स्थानमधिकृत्य निरूपणं कुरुत।
३. कैरलीयकलायां संस्कृतरूपकाणां स्वाधीनमधिकृत्य निरूपयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. दृश्यम्।
२. रूपकादयः।
३. दश।
४. नाटकम्।
५. मृच्छकटिकम्, मालतीमाधवमादिः।
६. श्रृङ्गारो वीरो वा रसः।
७. प्रहसनम्।
८. व्यायोगः।
९. त्रयः अङ्काः।
१०. अङ्कः।
११. चत्वारो अङ्काः।

## सूचनाग्रन्थौ (References)


1. Dhananjaya.*Dasarupaka*. Chapter III, Chowkhambha Sanskrit Series,Varanasi.2014

२. T.K. Ramachandra Iyer.*A short History of Sanskrit Literature*, R.S. Vadyar &Sons, Kalpathy,Palakad.2018

## अधिकवाचनग्रन्थौ (Suggested Readings)

1. Dr. Makkad .*The types of Sanskrit drama,* Charotar Book Stall, Gujarat.1936
2. A B Keith. *The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice*, Motilal Banarasidass Publishers, Delhi.1924

# Unit - 2
## नाटकसाहित्यं विकासश्च

### उद्देश्यानि (Learning Outcomes)

- संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।
- नाट्यप्रयोगपरिचयः प्राप्नोति।
- नाटकप्रभृतीनां आस्वादनाय क्षमतोत्पादनम्।

### प्राग्व्यपेक्षाः (Prerequisites)

दृश्यकाव्यं रूपकमिति नाम्ना व्यवह्रियते। धनञ्जयस्य रूपके नाटकम्, प्रकरणम्, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः इति दशविभागाः सन्ति। सर्वेषां रूपकाणां मूलं नाटकमेव। रूपकाणां सम्पूर्णं लक्षणं नाटक एव विद्यते। इदानीं नाटकसाहित्यम् अधिकृत्य पठामः।

### मुख्यपदानि (Key terms)

अभिनयः, नान्दी, सूत्रधारः, स्थापकः, प्रस्तावना, इतिवृत्तम्, नायकः, विष्कम्भकः, प्रवेशकः

## Discussion

नाटयति विचित्रं रञ्जनाप्रवेशेन सभ्यानां हृदयं नर्तयति इति नाटकम्। नाटकं वेदजन्यमिति भरतमुनिः नाट्यशास्त्रे। देवाः ब्रह्माणमुपेत्य 'क्रीडनकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्'इत्यभ्यर्थयामासुः। ततः ब्रह्मा ऋग्वेदात् सम्भाषणं, सामवेदात् गानं, यजुर्वेदादभिनयं, अथर्ववेदात् रसञ्च स्वीकृत्य पञ्चमवेदं रचितवानिति। तदेव नाट्यवेदमिति प्रथितम्। उक्तं च –

**नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्।**
**जग्राह पाठ्यमृग्वेदात् सामेभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानथर्वणादपि।। इति।**

ततो ब्रह्मा नाट्यवेदं भरतमुनये उपदिदेश। भरतमुनिः नाट्यशास्त्रं चकार चेति कथा।

ऋग्वेदगताः यमयमीसंवादाः, सरमापाणिसंवादाः, उर्वशीपुरूरवस् सम्भाषणं, रामायणादि कथानां भाषणम् आदिकं आङ्गिकेन कृतमिति दृश्यकाव्यानां प्रारम्भमिति वक्तुं शक्यते। भारतीयनाटकानाम् उद्भवमधिकृत्य पाश्चात्यपण्डितानां मतान्यपि द्रष्टव्यानि। डा. कीथ् महोदयः- 'प्राकृतिकपरिवर्तनानां मूर्तरूपं साधारणजनसमक्षं अवतारयितुमेव नाटकानामुदयो जातः। महाभाष्यनिर्दिष्टे कंसवधे नामके नाटके कृष्णपक्षीयाः रक्तमुखाः कंसपक्षीयाः च श्याममुखाः भवन्ति। तत्र वसन्तस्य हेमन्तोपरि विजय एव दर्शयितुमभिलषितः। कृष्णविजयेन प्रकृतिकोपं प्रति प्रकाश अधीयत'इत्यादयः अभिप्रैति। डा. पिशेल् महोदयः पुत्तलिकानृत्यमूलं नाटकानामुदयं वदति। नाटकेषु प्रचलिताः सूत्रधारशब्दाः एतत्प्रबलयन्ति। सूत्रधारः सूत्रमादाय पुत्तलिकां नर्तयति। पुत्तलिका नृत्यमूला नाटकप्रवृत्तिः इति। रिजवे महाशयः वीरपूजामूलकं भारतीयनाटकस्य उद्भवं मन्यते। रामलीला, कृष्णलीला च उदाहरणे।

भारतीयनाटकानामुत्पत्तिः पोल् नृत्याधारमिति अन्ये केचित्पाश्चात्यपण्डिताः अभिप्रयन्ति। तस्मिन् देशे शीतमासे ध्वजाकारं वंशमारोप्य तस्याधः स्त्रीपुरुषाः नृत्यन्ति स्म। नाटकस्याविर्भावे एतदाधार इति तेषां मतम्। एवं नाटकस्य उत्पत्तौ मतभेदाः सन्ति।

पतञ्जलिमुनेः महाभाष्ये द्वयोः नाटकयोः सूचना अस्ति। तावेव कंसवधः, बालिबन्धः च। नाटकयोरेतयोः अवतारणमपि शोभनिकाः कृतवन्तः। भरतस्य नाट्यशास्त्रेऽपि 'लक्ष्मीस्वयंवरम्'इति नाटकस्य रङ्गावतरणमधिकृत्य सूचना भवति। कथावस्तुनः स्वभावः, नाटकस्य दैर्घ्यं, नायिकानायकयोः स्वभावः, रसाः इत्यादीनाधारीकृत्य भरतः नाटकान् दशप्रकारान् चकार। किन्तु अधुना न लब्धाः एते।

### 3.2.1 नाटके वस्तुप्रपञ्चनम्।

नाटकस्य नायकः प्रतापवान् धीरोदात्तः, वेदरक्षकश्च राजा भवितव्यः। इतिहासप्रसिद्धं इतिवृत्तं चाधिकारिकं कर्तव्यम्। नाटकं ख्यातवृत्तं स्यात् इति सिद्धान्तयन् आचार्यविश्वनाथोऽपि नाटकस्येतिवृत्तं इतिहासपुराणादिषु प्रसिद्धमेव भवितव्यमिति स्पष्टयति। वैदिकानामाशयानां जनहृदयेषु सङ्क्रमणं, तद्वारा जनानां मोक्षमार्गनिदेशनञ्च काव्यानां लक्ष्येषु मुख्यतया गण्येते। नायकस्य रसस्य वा विरुद्धं किमपि तत्र न स्यात्। तदर्थं इतिवृत्ते परिवृत्तिं कर्तुं कवेरधिकारोऽस्ति। कथावस्तु पूर्णतयैव मनसि कृत्वा इतिवृत्तं पञ्चसन्धिषु विभज्य च नाटके वस्तुप्रपञ्चनं कार्यमिति निष्कर्षः।

### 3.2.2 सांकेतिकपदानि।

**अभिनयः** - अवस्थानुकारः अभिनयः। वास्तविकानां रामादेः धर्माणां अनुकरणं सदृशीकरणं अवस्थानुकारः। स अभिनयः चतुर्विधः। आङ्गिकः, वाचिकः, आहार्यः, सात्विकः चेति। अङ्गेन निष्पन्नः आङ्गिकः। वचसा प्रतिपाद्यः वाचिकः। आहारणीयमुकुटकेयूरादिरचनानिष्पाद्यः आहार्यः। स्तम्भभेदादिरूपः सात्विकः।

**नान्दी** - नन्दयति स्तुत्या देवानानन्दयति इति नान्दी।

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता।।

देवद्विजगुर्वादीनां आशंसाप्रतिपादकेन वचनेन संयुक्ता स्तुतिः यस्मात् प्रवर्तते नटैः श्राव्यते तत्सम्बन्धात् नान्दीति संज्ञिता।

**सूत्रधारः** - सूत्रं धारयतीति सूत्रधारः।

**नाट्योपकरणानि सूत्रमित्यभिधीयते।**
**सुत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते।।**

अन्यदपि -

**नाटकीयकथासूत्रं प्रथमं येन सूच्यते।**
**रङ्गभूमिं समासाद्य सूत्रधार स उच्यते।।** इति।

**स्थापकः** - काव्यार्थस्य स्थापनात् स्थापकः। भरतः 'स्थापकः प्रविशेत्तत्र सूत्रधारगुणाकृतिः'इति। स स्थापकः भारतीं वृत्तिमाश्रितः सन् काव्यार्थः - दृश्यकाव्यवृत्तान्तः तत्सूचकैः मधुरैः श्लोकैः रंगं प्रसाद्य सामाजिकगणं प्रीणयित्वा अभिनेयदृश्यकाव्यस्य कवेश्च नाम कवेः गोत्रं च कथयेत्। सूत्रधारसदृशत्वात् स्थापकोऽपि सूत्रधार उच्यते।

**प्रस्तावना** - नटः, विदूषकः, पारिपार्श्विकः वा सूत्रधारेण सहिता स्वस्वकर्तव्यविषयमाश्रित्य उपयुक्ताः प्रस्तुतं दृश्यकाव्यविषयं सूचयन्ति तैः चित्रैः वाक्यैः मिथः संलापं कुर्वते आमुखम् इति विज्ञेयम्। नाम्ना प्रस्तावयति प्रकृताभिनयविषयं सूचयति या सा प्रस्तावना।

**इतिवृत्तम्**- अभिनेतव्य वृत्तान्तः इतिवृत्तम्।

**नायकः** - त्यागी, धीरकर्मकुशलः, कुलीनः, बुद्धिमान्, सुन्दरः, युवा, उत्साही, दक्षः, अनुरक्तलोकः, तेजोयुक्तः, वैदग्ध्यशीलवान् च नायकः। नायकः चतुर्विधः धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरशान्तः च ।

**विष्कम्भकः** - अतीतानां वृत्तानां वर्तिष्यमाणानां कथांशानां निदर्शकः संक्षिप्तार्थः अङ्कस्यारम्भे प्रयोजितः विष्कम्भः स्यात्। शुद्धः संकीर्णः चेति विष्कम्भकः द्विविधः।

**प्रवेशकः** - अङ्कद्वयस्य मध्ये अनुदात्तोक्त्या संस्कृतेतरभाषया नीचेन नीचाभ्यां पात्राभ्यां नीचैर्वा प्रयोजितः रूपकांशविशेषः अप्रत्यक्षार्थान् सामाजिकहृदये प्रवेशयति स प्रवेशकः।

**भरतवाक्यम्** - नाटकान्ते विश्वशान्त्याशंसापूर्वकं प्रायः नायकेनैव प्रयुज्यमानं आशंसावाक्यं भवति भरतवाक्यम्।

## पुनरावृत्तिः (Recap)

- भरतमुनिः नाट्यशाास्त्रे नाटकं वेदजन्यमिति ।

- ब्रह्मा ऋग्वेदात् सम्भाषणं, सामवेदात् गानं, यजुर्वेदादभिनयं, अथर्ववेदात् रसञ्च स्वीकृत्य पञ्चमवेदं रचितवानिति। तदेव नाट्यवेदमिति प्रथितम्।
- ततो ब्रह्मा नाट्यवेदं भरतमुनये अदात्। भरतमुनिः नाट्यशास्त्रं चकार।
- भारतीयनाटकानाम् उद्भवमधिकृत्य पाश्चात्यपण्डितानां मतभेदाः सन्ति।
- भरतस्य नाट्यशास्त्रेऽपि कथावस्तुनः स्वभावः, नाटकस्य दैर्घ्यं, नायिकानायकयोः स्वभावः, रसाः इत्यादीनाधारीकृत्य भरतः नाटकान् दशप्रकारान् चकार।
- अवस्थानुकारः अभिनयः।
- नन्दयति स्तुत्या देवानानन्दयति इति नान्दी।
- सूत्रं धारयतीति सूत्रधारः।
- काव्यार्थस्य स्थापनात् स्थापकः।
- प्रस्तावयति प्रकृताभिनयविषयं सूचयति या सा प्रस्तावना।
- अभिनेय वृत्तान्तंइतिवृत्तम्।
- नायकः चतुर्विधः धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरशान्तः च ।
- अङ्कस्यारम्भे प्रयोजितः विष्कम्भः स्यात्।
- अप्रत्यक्षार्थान् सामाजिकहृदये प्रवेशयति स प्रवेशकः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. नायकः कतिविधः?
२. अङ्कस्यारम्भे प्रयेजिताः कः स्यात्?
३. प्रवेशकः कः ?
४. वेदजन्यं किम्?
५. ब्रह्मा कस्मै नाट्यं अदात्?
६. कः नाट्यशास्त्रं चकार?
७. नान्दी का?
८. अभिनयः कः?
९. सूत्रं धारयती कः?
१०. अभिनेय वृत्तान्तं किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

१. भारतीयनाटकानाम् उद्भवमधिकृत्य पाश्चात्यपण्डितानां मतभेदाः विशदयत-
२. कथं भरतमुनिः नाटकान् दशप्रकारान् चकार ?
३. भरतवाक्यम् किम्?
४. नायकाः कति विधाः? तेषां नामानि कानि ?

## निर्दिष्टाभ्यासः (Assignments)

१. नाटकस्य संकेतिकपदानि विशदयत।
२. काव्येषु नाटकं रम्यम् - विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. चतुर्विधः।
२. विष्कम्भः।
३. अप्रत्यक्षार्थान् सामाजिकहृदये प्रवेशयति स प्रवेशकः।
४. नाटकम्।
५. भरतमुनये।
६. भरतमुनिः।
७. नन्दयति स्तुत्या देवानानन्दयति इति नान्दी।
८. अवस्थानुकारः अभिनयः।
९. सूत्रधारः।
१०. इतिवृत्तम्।

## सूचनाग्रन्थाः (References)


1. T.K.Ramachandra Iyyer *A short History of Sanskrit Literature* R S Vadhyar &Sons Palakad
2. A Macdonnel. *A History of Sanskrit Literature* Motilal Banarasidass, Delhi
3. Dr.K.Kunjunniraja , *Sanskrit on the stage*, University of Madras, Madras


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Acharya.Lokamani Dahal, *Samskruthasahityethihasa*, Choukamba Krishnadas Academy,Varanasi. 2019

2. R Dr. Makkad .*The types of Sanskrit drama*, Charotar Book Stall, Gujarat.1936
3. A B Keith. *The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice,* Motilal Banarasidass Publishers, Delhi.1924

# Unit- 3

## भासनाटकचक्रम्

### उद्देश्यानि (Learning Outcomes)

- विश्वप्रसिद्धनाटकानां ज्ञानं लभते।
- संस्कृतनाटके भासस्य महत्वं अवगच्छति।
- भासस्य त्रयेदशनाटकानां परिचयः प्राप्नोति।
- समाजे भासरूपकाणां स्वाधीनतां आस्वादनं च जानाति।

### प्राग्व्यपेक्षाः (Prerequisites)

भोः छात्राः
संस्कृतभाषायां बहवः रूपककाराः सन्ति। सर्वे अपि ज्ञातव्याः एव। अस्मिन् भागे मुख्यरूपककारस्य परिचयः दीयते। रूपककाराणां मध्ये प्रथमः कः? नात्र संशयः। भास एव। अस्तु, भासस्य विषये अत्र चिन्तयामः।

### मुख्यपदानि (Key words)

स्वप्नवासवदत्तम्, प्रतिज्ञायौगन्धरायणम्, चारुदत्तम् , अविमारकम्, प्रतिमानाटकम्, अभिषेकनाटकम्, कर्णभारम्, दूतवाक्यम् ,दूतघटोत्कचम्, मध्यमव्यायोगः पञ्चरात्रम्, ऊरुभङ्गम्, बालचरितम्

### Discussion

प्राचीननाटकेषु अधुना लब्धानि भासनाटकानि भवन्ति। तानि 'Trivandrum plays'इति नाम्ना प्रथितानि सन्ति। नाटकस्य कर्तृत्वे कवेः कालनिर्णये च मतभेदाः दृश्यन्ते। तस्मिन् प्राचां कवीनां लेखकानां च लेखाः अवलम्बाः। तत्र कालिदासस्य - 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां'इति परामर्शः प्रसिद्धः। अतः भासस्य कालः क्रिस्तोः पूर्वं भवेत् इति वक्तुं शक्यते। द्वादशशताब्द्यां जातो जयानको नाम कविः स्वस्य 'पृथिवीराजविजयम्' नाम ग्रन्थेऽपि भासस्य परामृशति।अभिनवगुप्तस्य अभिनवभारतीग्रन्थे भासम् पुरस्कृत्यएवमुक्तम् -

**त्रैतायुगं तदिह हन्त न मैथिली सा**
**रामस्य रागपदवी मृदु चास्य चेतः।**
**लब्धा जनस्तु यदि रावणमस्य कायं**
**प्रोत्कृत्य तत्र तिलशो न वितृप्तिगामी।।** इति।

बाणभट्टः स्वकीये हर्षचरिते भासस्य विषये 'सूत्रधारकृतारम्भैः'इति उक्तवान्। राजशेखरः स्वकविविमर्शे भासमधिकृत्य एवं लिखितवान् -

**भासो रामिलसौमिल्लौ वररुचिः श्रीसाहसाङ्कः कवि-**
**मेण्ठो भारविकालिदासतरलास्कन्धः सुबन्धुश्च यः।**
**दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः**
**सिद्धा यस्य सरस्वती भगवती के तस्य सर्वे वयम्।।**

कारणं तु कवित्वस्य न सम्पन्नकुलीनता।
धावकोऽपि हि यद् भासः कवीनामग्रिमोऽभवत्।।

पाणिनीयनियमाः भासेन नाचरिताः इत्यतः पाणिन्यपेक्ष्य भासस्य प्राचीनत्वम्। एवमादिना भासस्य जीवनकालः क्रिस्तोः पूर्वं तृतीयशतकं यथा वा चतुर्थशतकं भवेत् इति वक्तुं शक्यते।

**भासनाटकानि। (भासनाटकचक्रम्)**

महाकवेः भासस्य त्रयोदशनाटकानि प्रसिद्धानि। एतानि भासनाटकचक्रमिति प्रसिद्धिं आप्नुवन्। नाटकानि तु -

१. स्वप्नवासवदत्तम्।
२. प्रतिज्ञायौगन्धरायणम्।
३. चारुदत्तम्।
४. अविमारकम्।
५. प्रतिमानाटकम्।
६. अभिषेकनाटकम्।
७. कर्णभारम्।
७. दूतवाक्यम्।
९. दूतघटोत्कचम्।
१०. मध्यमव्यायोगम्।
११. पञ्चरात्रम्।
१२. ऊरुभङ्गम्।
१३. बालचरितम्। इति।

एषु नाटकेषु स्वप्नवासवदत्तं, प्रतिज्ञायौगन्धरायणम्, अविमारकञ्च बृहत्कथामधिकृत्य रचितानि। प्रतिमानाटकम्, अभिषेकनाटकञ्च रामयणमूले। मध्यमव्यायोगः, कर्णभारं, दूतवाक्यं, दूतघटोत्कचं पञ्चरात्रम्, ऊरुभङ्गं च महाभारतसंबद्धानि। बालचरितं भागवताश्रयम्। चारुदत्तं कल्पितकथायुक्तञ्च।

### १. स्वप्नवासवदत्तम्–

नाटकेऽस्मिन् षडङ्काः। अस्मिन् नाटके षडङ्काः सन्ति। उदयनस्य वासवदत्तायाश्च कथा अत्र प्रतिपादिता। वत्सराजो उदयनः उज्जयिनीपतेः पुत्रीं वासवदत्तां परिणिनाय। तयोर्विवाहः उज्जियिन्यां समभवत्। तस्मिन् काले आरुणिर्नाम कश्चन राजा उदयनस्य कौशाम्बीनगरम् आक्रम्य स्वायत्तीकृतवान्। वत्सराजस्य प्रधानामात्यो यौगन्धरायणः मगधराजस्य साहाय्यं विना नगरस्य पुनः प्राप्तिः दुष्करेवेति विचिन्त्य मगधराजमैत्र्यर्थमुपायमचिन्तयत्। मगधराजकुमारी पद्मावती उदयनस्य पत्नी भविष्यतीति सिद्धवाक्यमनुस्मरन् यौगन्धरायणः तदर्थमुपायमचिन्तयत्। किन्तु वासवदत्तायां जीवत्यां वत्सराजः तदर्थं सन्नद्धोन भवेदिति जानाति यौगन्धरायणः। सः वासवदत्तया सहापि परिचिन्त्य कामपि पद्धतिंआविष्कृतवान्। तदनुसारं, राज्ञि मृगयार्थं गते सति अग्निग्रस्ते भवने वासवदत्ता, तद्रक्षणोद्युक्तो यौगन्धरायणश्च दग्धाविति वार्ता सर्वत्र प्रसारिता।

ब्राह्मणवेषधारी यौगन्धरायणः तत्सोदरीभावेन वासवदत्तां पद्मावत्याः गृहे राजमातुरनुज्ञया न्यासरूपेण अवासयत्। वासवदत्तायाः अभावे दुःखितः उदयनः किञ्चित्कालानन्तरं अमात्यादिभिः प्रेरितस्सन् पद्मावतीं परिणीतवान्। एकदा वासवदत्ता पद्मावत्याः गृहे शयानं राजानं अपश्यत्। शय्यायाः बहिर्लम्बितं राज्ञः करं दृष्ट्वा, तदसहमाना वासवदत्ता झटित्येव तं करं यथास्थानं नीत्वा ततः सत्वरं पलायिता। पूर्वानुभवस्मृत्या वासवदत्तायाः करस्पर्शप्रत्यभिज्ञाय राजा प्रबुद्धः। ततः सत्वरं गच्छन्ती वासवदत्ता तेन अस्पष्टतया दृष्टा च किन्तु तद्दर्शनं सत्यं वा मिथ्या वा स्वप्नो वा इति निर्णेतुं न स शशाक। राजा स्वस्य पद्मावतीदर्शनं प्रति विदूषकमवदत्। स च तत् स्वप्नदर्शनमेवेति तं दृढमबोधयत्। अनन्तरं महासेनस्य कञ्चुकी रैभ्यः, वासवदत्तायाः धात्री वसुन्धरा च उदयनं द्रष्टुं आजग्मतुः । धात्री वासवदत्तां प्रत्यभिजानाति स्म। तदानीं यौगन्धरायणः अपि आगत्य सर्वमपि वृत्तान्तं स्पष्टमुक्त्वा राज्ञो मनोव्यथायै क्षमामपृच्छत् । अमुं स्वप्नवृत्तान्तमाधारीकृत्य नाटकस्य स्वप्नवासवदत्तमिति शीर्षकं दत्तं भासेन।

### २. प्रतिज्ञायौगन्धरायणम् -

अस्मिन् नाटके चत्वारः अङ्काः सन्ति। अत्रापि राजा उदयन एव नायकः। तस्य प्राक्कालकथा वर्णिता भवति। उदयनस्य वासवदत्तायाश्च परस्परानुरागकथाऽत्र प्रतिपादिता। वासवदत्ता उदयनेऽनुरागबद्धा भवतीति वार्तां श्रुत्वा तस्याः पिता उज्जयिनीपतिः प्रद्योतः वत्सराजं बद्धुमैच्छत्। 'बद्धस्य वत्सराजस्य मुक्तिः मया क्रियते'इति यौगन्धरायणेन प्रतिज्ञा क्रियते। सुहृदः रुमण्वतः विदूषकस्य वसन्तकस्य च साहाय्यमवलम्ब्य यौगन्धरायणः बहुप्रयत्नानामन्ते वासवदत्तया सह वत्सराजं व्यमोचयत्। एवं यौगन्धरायणस्य प्रतिज्ञा सफलीकृता। एतेन अस्य रूपकस्य प्रतिज्ञायौगन्धरायणमिति नामधेयमकरोत् भासः।

### ३. चारुदत्तम् -

चारुदत्तं प्रकरणविभागे अन्तर्भवति। एतस्य इतिवृत्तं कविकल्पितं भवति। अत्र चारुदत्तस्य वसन्तसेनायाश्च प्रेमकथा वर्णिता। चारुदत्तः दानधर्मादिना दरिद्रो जातः कश्चन ब्राह्मणः। वसन्तसेना तु गणिकाकुलजाताऽपिसौशील्यादिगुणसम्पन्ना काचित् धनिका च। स्वभावमहिम्ना प्रसिद्धे चारुदत्ते वसन्तसेना अनुरागिणी अभवत्। तयोः परस्परानुरागस्य कथा अस्मिन् नाटके सुमधुररूपेण कविना आविष्क्रियते। चतुर्ष्वङ्केषु विभक्तेऽस्मिन्प्रकरणे कथायाः परिसमाप्तिर्न दृश्यते। अतः रूपकास्यास्य परिसमाप्तेः पूर्वमेव भासो दिवमगादिति निर्णयेऽपि पण्डितेष्वस्ति।पश्चात् शूद्रको नाम कविः चारुदत्तकथामाश्रित्य मृच्छकटिकं नाम दशाङ्कोपेतं सहृदयहृदयामृतायमानं प्रकरणमेकं रचितवानित्येतत् कथायाः अस्याः जनसम्मतिं प्रकाशयति।

### ४. अविमारकम् -

षडध्यायनिबद्धोऽस्मिन् नाटके काशिराजपत्न्याः सुदर्शनायाः अग्निदेवाज्जातोऽविमारको नायकः कुन्तिभोजराजस्य पुत्री कुरङ्गी नायिका च कथापात्रे भवतः। बृहत्कथायां उपवर्णिता तयोऽरनुरागकथा अत्र इतिवृत्तरूपेण स्वीकृता। अविमारकःसौवीरराजपत्न्या सुलोचनया पोषितः। कदाचित्सौवीरराजः चण्डभार्गवाख्यमुनेः एकवर्षोपभोग्येनशापेन सकुटुम्बं चण्डालैः सह कुन्तिभोजस्य राज्ये अन्यैरविदितः सन् जीवति स्म। एकदा कश्चन मत्तगजः उद्यानात् प्रतिनिवर्तमानायाः कुरङ्ग्याः समीपमागता। तदा उद्यानपार्श्वेन गच्छताअविमारकेन गजं धावयित्वा कुमारी संरक्षिता। ततस्तौ परस्परानुरागबद्धावजायताम्। किन्तुचण्डालाय अविमारकाय कुमारीं दातुं राजा नैच्छत्। एवं तयोरनुरागे

बहुविधाः विघ्नाः आगताः। एतस्मिन्नन्तरे सौवीरकुटुम्बस्य शापकालः परिसमाप्तः। कुन्तिभोजसौवीरयोः परस्परदर्शनमजायत। किन्तु कुरङ्गीं प्रति भग्नाशतया तत्र तत्र विचरन्तं अविमारकं प्रति न कोऽपि किञ्चिदपि जानाति स्म। स्वस्वाभिनिवेशपूरणाय मार्गं अपश्यन्तौ नायिकानायकौ प्राणत्यागायापि कृतनिश्चयाभवतां इत्येतत् सहृदयान् सोद्वेगान् विधत्ते। अनन्तरं नारदमुनेः वचनादविमारकः कुन्तिभोजराजधान्यामेवास्ति इति जानन् राजा तयोः पाणिग्रहणं कारयामास।

### ५. प्रतिमानाटकम् -

रामायणादस्य नाटकस्येतिवृत्तं स्वीकृतम्। अयोध्यायाः अधिपतिः दशरथः। तस्य चतुर्षु पुत्रेषु ज्येष्ठः श्रीरामः। काले प्राप्ते दशरथः तं रामं यौवराज्ये अभिषेक्तुं कृतनिश्चयोऽभवत्। तदर्थं सर्वं सज्जमभवत्। किन्तु दशरथपत्नीष्वन्यतमा कैकेयी, यौवराज्ये भरतं अभिषेक्तुं, रामं चतुर्दशवर्षोपभोग्याय वनवासाय प्रेषितुञ्च ऐच्छत्। रामस्य वनगमनकृतेन शोकेन दशरथः दिवमगात्। कैकेय्याःइङ्गितानुसारं राजाभिषेकाय, सूतः भरतं मातुलगेहादानयति स्म। कृत्तिकाविषये अयोध्याप्रवेशे न युज्यत इत्युपाध्यायो निरदिशत्। तदनुसारं, रोहिणीप्रारंभार्थं एकनाडिकां यापयितुं भरतः देवकुलबुद्ध्या दिवङ्गतानां इक्ष्वाकुणां प्रतिमागृहं प्रविशति। देवकुलिकामुखात् तत्रदिवङ्गतानां इक्ष्वाकुणां प्रतिमाः स्थापिताःइति भरतो जानाति।तत्र च क्रमशः दिलीपं, रघुं, अजं च दृष्ट्वा तदनन्तरं दशरथस्यापि प्रतिमां दृष्ट्वा भरतः स्वपितुः मृत्युवार्तां जानाति।आस्वादकचित्तं नानाभावसङ्घर्षभूयिष्ठं विधातुं प्रभविष्यन्तं सन्दर्भममुमाधारीकृत्य नाटकस्यास्य नामदत्तं भासेन। स्वमातरं बहु निन्दन् भरतः रामं द्रष्टुं वनं गतः। चतुर्दशवर्षावसाने राज्यं स्वीकर्तुं सः रामं बहुजनसाक्षिकां प्रतिज्ञामकारयत्। रावणवधानन्तरं चतुर्दशवर्षावसाने तिसृणामपि मातृणां पुरतः रामस्य राजाभिषेकेण नाटकस्य शुभपरिसमाप्तिः।

### २. अभिषेकनाटकम् -

षडङ्कयुक्तस्य अभिषेकनाटकस्यापि इतिवृत्तं रामायणकथायाः एव स्वीकृतम्। त्रयाणामभिषेकानां सुसमञ्जससन्निवेशोत्रऽद्रष्टुं शक्यते। रामायणस्य किष्किन्धा - सुन्दर - युद्धकाण्डेषु परामृष्टा कथा संक्षिप्य, ईषद्भेदेनात्रोपवर्ण्यते। रावणवधाय अयोध्यां गच्छते रामाय, वरुणाज्ञया समुद्रः स्वयमेव मार्गं ददाति, तदर्थं सेतुबन्धनं न करोति रामःइत्येषो भेदः मुख्यतया नाटकेऽस्मिन् भासेन कृतः। बालिना किष्किन्धायाः निष्कासितस्य, हतपत्नीकस्य च सुग्रीवस्य, रावणेन अपहृतपत्नीकस्य श्रीरामस्य च मिथः सख्यं कृतम्। तदनुसारेण रामो बालिनं हन्तुं कृतनिश्चयः। तज्जनितेन कोलाहलेन नाटकं प्रारभते।

एकेनैव शस्त्रेण सप्तसालान् विच्छेदितवतो रामस्य पराक्रमे संजातविश्वासः सुग्रीवः बालिनं युद्धाय आह्वायति। पत्न्या तारया निवार्यमाणोऽपि बाली सुग्रीवेण योद्धुमारभते। सुग्रीवस्य पराजयो निश्चित एवेति मन्वानस्य हनुमतः प्रार्थनया रामः शस्त्रेणैकेन बालिनं गतसंज्ञं करोति। अनन्तरं लब्धसंज्ञो बाली रामेण यत् कृतं तन्न न्याय्यमिति रामं भर्त्सयते। अगम्यां भ्रातृवधूं हृतवतोऽपराधिनो दण्डनं राज्ञः कर्तव्यमेवेति रामस्तं निरुद्धवाचं करोति। बाली च सुग्रीवेण संभूतं वैरं पूर्णतया विस्मृत्य, स्वपुत्रमङ्गदं तस्मिन् समर्प्य च दिवं गच्छति। रामाज्ञया लक्ष्मणः सुग्रीवं किष्किन्धाधिपतित्वेनाभिषिञ्चति।

सुग्रीवाज्ञया सीतान्वेषणाय वानराः सर्वस्वपि दिक्षु गच्छन्ति। दक्षिणस्यां दिशि गतो हनुमान्समुद्रमुल्लंघ्य लङ्कां प्राप्नोति। सीतां प्रलोभ्य स्ववशमानेतुं यत्नं कुर्वन्रावणः पराजितो भवतीति, अशोकवृक्षोपरि निलीय तिष्ठन्हनुमान् पश्यति। रावणं हत्वा रामः सीतां नेष्यतीति स तां सान्त्वयति।

हनुमान् आत्मानं प्रति रावणस्य श्रद्धामाकर्ष्टुं, तस्याऽशोकवनिकां भग्नप्रायं करोति। रावणाज्ञयातत्पुत्र इन्द्रजित्, हनुमन्तं बद्ध्वा तत्पुरतो नयति। सीतां रामाय प्रत्यर्पयितुं हनूमान् दशाननं निर्दिशति। विभीषणोऽप्येतदेव ज्येष्ठं रावणं निवेदयति। रावणस्तु रामं विभीषणञ्च बहु निन्दन् स्वानुजं विभीषणं सभायाः निष्कासयति। रामः शरणागतं विभीषणं लङ्काधिपत्येऽभिषिञ्चति।

तुमुले सङ्ग्रामे रामो रावणं हन्ति। सीता अग्निं प्रविश्य निर्विकार बहिरागच्छति। दिवङ्गतो दशरथः देवादयो ऋषयश्च तदानीं तत्र सन्निहिता भवन्ति। यो दशरथः पूर्वं मङ्गलसूत्रं बद्ध्वा स्वपुत्रं रामं अभिषेकाय तत्र पूर्णतां नीयत इत्यभिषेकत्रसंयुक्तस्य अभिषेकनाचकस्य समङ्गलपरिसमाप्तिः।

### ३. कर्णभारम् -

कर्णभारम् एकमेकाङ्ककं नाटकंभवति। अस्येतिवृत्तंमहाभारतात् स्वीकृतम्।नाटकेऽस्मिन् भासःमूलकथायाः नाऽत्यन्तं व्यतिचलति। ततोऽपि नाटकीयमुहूर्त्ताणां अविष्काराय केचिदधिकांशाः भासेन परिकल्पिताः।दानवीरस्य कर्णस्य दानकर्मणि अस्खलितगतित्वं, दानस्य माहात्म्यञ्च नाटकेऽस्निम् प्रतिपादितम्। कर्णस्य कवचकुण्डलापहारेण तं प्रणष्टप्रभावं कृत्वा, महाभारतसङ्ग्रामे स्वपुत्रस्यार्जुनस्य विजयाय मार्गमुद्घाटयितुं यतते देवेन्द्रः। सः स्वीकृतब्राह्मणवेषः सन् कर्णं महत्तरां भिक्षां याचते। कर्णस्य कवचकुण्डले विहाय अन्यत्किमपि तस्य न स्वीकार्यं भवति। तत् प्रतारणैवेति सूतेन शल्येन अभिधीयमानोऽपि कर्णः स्वस्य व्रतान्न व्यतिचलति। कर्णस्य विजयसर्वस्वायमाने कवतकुण्डले स्वीकुर्वन्निन्द्रः, तदनन्तरं पश्चातापतप्तो भवति। सः ब्रह्मणवेषधारिणा स्वसुहदा केनचिदस्त्रमेकं कर्णाय प्रददाति। दत्तस्य प्रतिग्रहणमनिच्छन्नपि कर्णः, ब्राह्मणवचःइति कृत्वा तत्स्वीकरोति, युद्धाय प्रतिष्ठते च।

### ४. दूतवाक्यम् –

महाभारतात् इतिवृत्तं स्वीकृत्य रचितमेकं एकाङ्कनाटकं भवति दूतवाक्यम् ऊाण्डवानां द्वादशवर्षोपभोगस्य वनवासस्य, एकवर्षोपभोग्यस्य अज्ञातवासस्य च परिसमाप्तावपि तेषामर्हं यदर्धराज्यं तद्दातुं कौरवाः न सन्नद्धाः भवन्ति। ततस्तद्दातव्यमिति पाण्डवदौत्यमादाय कौरवराजधानीं गतवन्तं श्रीकृष्णमवगन्तुं बद्धुञ्च निश्चिनोति कुरुराजः। श्रीकृष्णे बद्धे सति पाण्डवाः बद्धनयना भवेयुरिति स चिन्तयति। श्रीकृष्णस्य समागमे यदि कश्चिदित्तिष्ठति चेत्सः द्वादशसुवर्णभारेण दण्ड्यो भवतीति विभीषिकाञ्च प्रयुङ्क्ते दुर्योधनः। कृष्णं पश्यतः स्वस्य च चाञ्चल्यमाशङ्कमानः स चित्रफलके द्रौपदीकेशाम्बराकर्षणचित्रं विलोकयन् तिष्ठति च।

यदा कृष्णः सभां प्रविशति तदा दुर्योधनः स्वस्यासनात् पतति। तावताऽपि कृष्णप्रभावमङ्गीकर्तुं विमुखः सः तमवमन्तुं बद्धुञ्च प्रारभते। किन्तु दुर्योधननिर्देशानुसारं कृष्णं बद्धुमुद्युक्ताः सर्वेऽपि राजानः स्वयमेव बद्धा जायन्ते। कृष्णः तदानीं स्वस्य दिव्यास्त्राणि स्मरति। ततः सुदर्शनादीन्यस्त्राणि, गरुडश्च कृष्णस्य साहाय्यं कर्तुं आगच्छन्ति। सन्दर्भेऽस्मिन् सुदर्शनमपि कथापात्रपमेव। तत् भागवतोऽवतारलक्ष्यं भगवन्तं प्रतिबोधयति। कृष्णः सर्वाण्यपि दिव्यास्त्राणि प्रतिप्रेषयति। अन्ते धृतराष्ट्रः स्वयमेवागत्य भगवते श्रीकृष्णाय युक्तां सत्कारविधिमनुतिष्ठन्, स्वपुत्रस्यापराधाय तं क्षमां याचते।

### ५. दूतघटोत्कचम् -

दूतघटोत्कचमपि एकाङ्कनाटकमेव। भीमपुत्रो घटोत्कचः दूतरूपेण कौरवसभां प्रविशतीति कथाऽत्रोपवर्ण्यते। किन्त्वेषः कथाभागः महाभारते न दृश्यते। ततः नाटकस्यास्य कथाबीजं भासकल्पितमेवेति मन्यन्ते विद्वांसः।

महाभारतयुद्धे चक्रव्यूहं प्रविष्टमभिमन्युं हतवन्तः कौरवमुख्याः, अर्जुनस्य प्रतिकाराद्भीताः, अर्जुनेन गतां दिशमेवेमाणाः स्वस्वनिवेशनानि प्रविशन्ति। वार्तामिमां श्रुत्वा धृतराष्ट्रः शिशोरभिमन्योः हत्यया कलङ्कितस्य स्वकुलस्य विनाशः समुपस्थित इत्याशङ्कते। अभिमन्योः हत्या अत्युग्रसङ्ग्रामस्य हेतुरजायतेत्यभिप्रैति गान्धारी। अबिमन्युघातकस्य जयद्रथस्य पत्नी दुश्शला च स्वस्या वैधव्यमचिरभावीति वदति। धृतराष्ट्रः अभिमन्युवधमधिकृत्य विशदतया श्रुत्वा नितान्तं दुःखमनुभवति।

अत्रान्तरे तत्रागत्य आत्मानं अभिवादयन्तं दुर्योधनं, दुश्शासनं, शकुनिञ्च धृतराष्ट्रो नानुगृह्णाति। कृष्णार्जुनयोः वात्सल्यभाजनस्याभिमन्योः वधेन, स्वयमेव मृत्युं स्वीकृतवतां तेषामनुग्रहस्य कोऽर्थःइति स पृच्छति ।अभिमन्योर्हन्तारं अपरस्मिन् दिने सूर्यास्तमयात्पूर्वमेव हन्तुं अन्यथा आत्मानमेव हन्तुञ्च अर्जुनः प्रतिज्ञां कृतवान् । तच्छ्रुत्वा दुर्योधनः येन केनापि प्रकारेण जयद्रथं संरक्ष्य अर्जुनेन आत्महत्यां कारयितुं शक्यत इति विचिन्त्य तुष्यति।

अत्रान्तरे घटोत्कचः युद्धभूमिमागच्छति। धृतराष्ट्रमभिवाद्य आत्मानं श्रीकृष्णदूतं विज्ञाप्य च सः'एकस्य पुत्रस्य मृत्युना अर्जुने एतावन्मात्रं दुःखमनुभवति सति, पुत्रशतस्य मृत्युना भवतो दुःखं कियन्मात्रं भविष्यती' ति तं पृच्छति, आत्मबलं स्मपादयितुं निर्दिशति च। कृष्णदौत्यं स्वीकृत्य स्वधर्ममाचरितुं स दुर्योधनमभ्यर्थयति। दुर्योधनस्तस्मै कुप्यति। घटोत्कचः क्रुद्धोऽपि पितामहवचनात् क्रोधं संयम्य दूतभावमेवावलम्ब्य श्रीकृष्णस्य दौत्यमेवं धार्तराष्ट्रान् बोधयित्वा निष्क्रामति- धर्ममनुतिष्ठ, स्वजनप्रीतिं कुरुष्व, मनसि यदाभिलषितं तत्सर्वमनुतिष्ठ, क्षत्रियधर्मोपदेश इव यमधर्मः पाण्डवरूपेण सूर्यकिरणैस्सह युष्माकं सकाशमागमिष्यति।

६. **मध्यमव्यायोगः -**

विशिष्टो आयोगः समागमः - एव व्यायोगः। मध्यमस्य व्यायोगः मध्यमव्यायोग इति व्यायोगशब्दोऽत्र भासेनान्वर्थीकृत इति सहृदयाः सशिरः कम्पमङ्गीकुर्वन्ति। व्यायोगस्य नायको भीमसेनः यद्यपि महाभारतप्रसिद्धो भवति, ततोऽप्यस्य कथा भासकल्पितेत्येव वक्तुं शक्यते। भीमसेनस्य पत्न्याः हिडिम्बायाः व्रतान्तभोजनार्थं तत्पुत्रेण घटोत्कचेन गृहीतः कश्चन ब्राह्मणकुमारः भीमसेनेन मोचित इत्येषा कथाऽत्र नाटकीयैः मुहूर्त्तैः सुसम्पुष्टतया प्रतिपादिता। घटोत्कचः, मातुः पारणायै मानवमेकमन्विष्यन् निर्जने वने विचरति। तस्मिन्नेव वने पाण्डवाः अपि निवसन्ति स्म।घटोत्कचः, पुत्रत्रयेण सह गच्छन्तौ ब्र्ह्मणदम्पती पश्यति। तयोरन्यतमं पुत्रं ग्रहीतुं उद्यताय घटोत्कच्चाय आत्मानं प्रदाय अन्यान् मोचयितुं तत्र सर्वेऽपि सन्नद्धाः। अन्ते पुत्रत्रये मध्यम एव घटोत्कचेन सह गच्छति। मार्गमध्ये आचमनाय किमपि सरः प्रविष्टो मध्यमः प्रत्यागमनाय विलम्बितः। तदानीं घटोत्कचः"हे मध्यम"इति तमाह्वयति। तच्छ्रुत्वा आगतः पाण्डवमध्यमो भीमसेनः ब्रह्मणकुमारं मोचयित्वा घटोत्कचेन सह गच्छति। हिडिम्बा भीमसेनं दृष्ट्वा, पितरमभिवादयितुं पुत्रम् आज्ञापयति। एवं हिडिम्बाभीमसेनयोर्मिथः समागमः घचोत्कचस्य पित्रा समागमः मृत्युवशमुपगतस्य ब्राह्मणकुमारमध्यमस्य स्वपितृभ्यां भ्रातृभ्याञ्च पुनः समागम इत्येवं रूपकस्यास्य व्यायोगसंज्ञाऽन्वर्थीकृता।

७. **पञ्चरात्रम् -**

अङ्कत्रययुक्तेऽस्मिन् रूपके महाभारतात् स्वीकृतमितिवृत्तम्। पाण्डवाः विराटराज्येऽज्ञातवासमनुतिष्ठन्ति। कालेऽस्मिन् कुरुराजो दुर्योधनः कमपि यज्ञमनुतिष्ठति। यज्ञावसाने सः गुरुजनेभ्यो दक्षिणां ददाति, राज्ञश्च यथाविधि अभिनन्दति। तदानीं विराचराजो न आगत इति स जानाति। आचार्याय द्रोणाय का दक्षिणा दातव्येति पृच्छति राजा। स्वस्य किमपि नावश्यकमिति द्रोणो वदति। पुनः राज्ञा प्रसभं पृष्टो द्रोणः पाण्डवानामर्हं राज्यं दातव्यमित्येतदेव स इच्छतीति वदति। एषा वञ्चनैवेति शकुनिरभिप्रैति। शकुनिना पर्यालोच्च 'यदि पञ्चरात्रे पाण्डवा नीयन्ते चेत्, तेभ्यः अर्हं राज्यं दीयते'इति राजा अवदत्। अत्रान्तरे विराटराज्यादागतो दूतः कीचकवधवृत्तन्तं निवेद्य, विराटस्य आगमनं एतेनैव विघ्नितमभवदिति विज्ञापयति। ज्ञात्वैतद् भीमसान्निध्यं तत्राशङ्कमानो भीष्मः दुर्योधनोक्तां प्रतिज्ञामङ्गीकर्तुं द्रोणमुपदिशति।

अनन्तरं भीष्मप्रभृतयो विराटराजस्य गोधनमपहर्तुं गच्छन्ति। बृहन्नालवेषधारिणोऽर्जुनस्य साहाय्येन विराटपुत्र उत्तरकुमारः कुरुसैन्यं निष्कासयति। संप्रीतो विराटः स्वराजधान्यां प्रच्छन्नरूपेण निवसतः पाण्डवान् प्रत्यभिजानाति। स्वपुत्रीं उत्तराम् अर्जुनाय स ददाति। किन्त्वर्जुनः आत्मना पुत्रीत्वेनैव दृष्टां तां पुत्रवधूत्वेन स्वीकरोति। उत्तरकुमारः कुरुराजधानीं गत्वा, उत्तरा अर्जुनपुत्राय अभिमन्यवे दत्तेति, तयोर्विवाहः कुत्र प्रवर्ततां इत्यर्जुनः पृच्छतीति वदति। आज्ञातवासकालः आत्रान्तरे परिसमाप्तः। पञ्चरात्रश्चावशिष्यते, पाण्डवा अपि विदिताःइति जानन् द्रोणः, दक्षिणविषये कृतां प्रतिज्ञां पालयितुं दुर्योधनमवदत्। दुर्योधनश्च पाण्डवभ्यो राज्यार्धं दत्वा यज्ञकर्मानुष्ठानेन पवित्रीकृ तान्तरङ्गस्य स्वस्य साध्वाचारतां प्राकाशयति च।

## ८. ऊरुभङ्गम्-

संस्कृतसाहित्येतिहास एकमेव दृश्यते दुःखपर्यवसायि नाटकं - महाभारतकथामुपजीव्य भासेन विरचितं ऊरुभङ्गम्। प्रायेण सर्वत्रापि प्रतिनायकत्वेव वीक्षितो दुर्योधनोऽस्मिन् रूपके, मृत्युकाले पाण्डवान् प्रति स्वस्य वैरं पूर्णतया विस्मृत्य संशुद्धान्तरङ्गो भूत्वा दिवमेति। अतोऽस्मिन् वस्तुतः दुरन्तत्वमस्ति वा नवेति चर्चा युष्माभिः कार्यैव।

महाभारतयुद्धस्य समाप्तेः पूर्वं, धार्तराष्ट्रपक्षे दुर्योधन एक एव, पाणडवपक्षे तु पाण्डवाः कृष्णश्चैवाऽवशिष्यन्ते स्म। सर्वेऽप्यन्ये योद्धारो दिवङ्गताः। अस्यां दशायां भीमदुर्येधनयोर्मिथः अतिप्रचण्डो गदायुद्धः प्रचलति। अस्य युद्धस्य सुविशदा वर्णनाऽत्र भटत्रयमुखेन क्रियते। उभयोरपि गात्रयोः रुधिरप्रवाह एव जायते। सुयोधनस्य गदाप्रहारेण भीमसेनः नष्टप्रज्ञः पतति। दृष्ट्वैतत् पाण्डवाः दुःखिताः बलरामश्च स्वशिष्यस्य युद्धनैपुणीं वीक्ष्य संप्रीताश्चाऽभवत्। किन्तु अचिरेणैव भीमः लब्धप्रज्ञः सन्नुत्तिष्ठति। एतेन हृष्टः श्रीकृष्णः सुयोधनस्य ऊर्वोः प्रहर्तुं रहसि भीममुपदिशति। भीमः तथा कृत्वा कुरुराजं पातयति।

स्वस्य ऊर्वोर्भञ्जनेन पितुः पादाभिवन्दनस्यावकाशः प्रणष्ट इत्येव विषीदन् दुर्योधनः, 'जन्मान्तरेष्वपि त्वमेव मम माता भवत्वि' ति गान्धारीं वदति। स्वपुत्राय दुर्जयाय तेन दीयमान उपदेशः शिलाहृदयानमपि रोदयितुं प्रभवति। स पुत्रमेवमुपदिशति –'हे पुत्र! पाण्डवास्त्वया शुश्रूषयितव्याः। कुन्तीमातुः निदेशस्त्वाया वर्तयितव्यः। अभिमन्योर्जननी द्रौपदी च मातृवत्पूजयितव्ये। समवीर्येण सह सङ्ग्रामे ते पिता हत इति विचिन्त्य दुःखं त्यज। वीरमृत्युं प्राप्तेभ्यो यदा उदकक्रिया निर्वर्त्यते तदा धर्मपुत्रस्य दक्षिणकरं स्पृशन्नुपविश्य, मम नामोच्चारणसमये पाण्डुपुत्रैः सह त्वया मह्यं जलं दातव्यम्'इति।

तदनन्तरम् अश्वत्थामा प्रविश्य, स निशासमये पाण्डवान्धक्ष्यतीति प्रतिजानाति। अनन्तरं सः'अभिषेकं विनैव विप्रवचनैस्त्वं राजा भव'इति दुर्जयं राजानं करोति। सर्वमेतद्दृष्ट्वा दुर्योधनो दिवमेति।

## ९. बालचरितम् -

विष्णुपुराणप्रसिद्धः श्रीकृष्णकथाः बालचरितस्येतिवृत्तत्वेन स्वीकृताः। भागवतहरिवंशादिष्वपि एताः कथाः दृश्यन्ते। कारागारे जातं शिशुं श्रीकृष्णमादाय वसुदेवः मथुरायाः बहिरागच्छति। घोरेऽन्धकारे स येन केनापि प्रकारेण यमुनातीरमागच्छति। सम्पूर्णां तां नदीं भुजप्लवेनैव तरितुं स निश्चिनोति। किन्तु तदानीमेव नद्या स्वयमेव दत्तेन मार्गेण वसुदेवः पारं गच्छति। तत्रापि किं करणीयमित्यजानन् सः नन्दगोपसकाशं शिशुं न्यासत्वेन दातुमिच्छति। आत्मना पूर्वं कृतोपकारस्सः तं शिशुं पुत्रत्वेन परिपालयिष्यतीति स विश्वसति। रात्रौ नन्दगोपगेहं प्रति कमपि पृच्छति चेत्, जनानां सन्देहो भवेदिति विचिन्त्य स उषःकालपर्यन्तं कस्यचिन्न्यग्रोधपादपस्याधः प्रतिपालयितुं निश्चिनोति।

अस्मिन्नेव समये नन्दगोपस्य पत्नी यशोदा दारिकामेकां प्रसूय मोहमुपगतवती। स्वस्याः पुत्रो वा पुत्री वा जातेत्यपि सा न जानाति। अपरस्मिन् दिने च गोपग्रामे इन्द्रोत्सवः समारभ्यत इत्यतः जनानां दुःखहेतुर्मा भूदिति कृत्वा नन्दगोपः तदानीमेव तां मृतां दारिकामादाय मथुरां गच्छति। तदानीं सा दारिका पुनर्लब्धप्राणा भवति। कंसस्तदानीं बहूनि दुर्निमित्तानि पश्यन् तद्धेतुमन्विष्यन् लोकरक्षणाय काचन दैवी शक्तिः भूमावजायतेति सत्यं जानाति। सः शिशुं तां प्रस्तरे क्षिपन्नपि हन्तुं न शशाक। कृष्णः नन्दगोपगृहे नानाप्रकारैः विस्मयकरैः क्रीडाविशेषैः सर्वानपि जनान् विस्मितान् करोति। मल्लयुद्धेन कृष्णं मारयितुं कृतनिश्चयः कंसस्तं मथुरायां भविष्यन्तं धनुर्महम् अनुभवितुं भटद्वारा आज्ञापयति। बलरामेण सह मथुरां प्राप्तः कृष्णः कंसस्य उत्पलापीडाख्यं गजं चाणूराख्यं मल्लं च हत्वा तदनन्दरं युद्धप्रेक्षकं कंसञ्च हन्ति। वसुदेवस्तत्रागत्य कृष्णो बलरामश्च स्वस्य पुत्राविति सर्वान् विज्ञापयति। अनन्तरं कंसेन तत्पितरं उग्रसेनं बन्धनादुन्मुच्य तं राज्येऽभिषिञ्चति।

## पुनरावृत्तिः (Recap)

- संस्कृतनाटककाराणां मध्ये भासः प्रथमः इति गण्यते।
- बाणभट्टेन भासः परामृष्टः।
- भरतमुनेः नाट्यशास्त्रनियमाः भासेन नानुसृताः।
- पाणिनीयसूत्रेभ्यो व्यतिचलनम्।
- भासेन विरचितानां नाटकानां संख्या — त्रयोदश।
- भासकृतिषु सर्वोत्कृष्टं स्वप्नवासवदत्तम्।
- इतिवृत्तस्वीकरणे स्रोतसां बाहुल्यम्-रामयणं, महाभारतं, पुराणं, लोककथाः, इत्येवम्।
- वासवदत्तकथा - स्वप्नवासवदत्ते, प्रतिज्ञायौगन्धरायणे च।
- प्रकरणं चारुदत्तम्।

- व्यायोगरूपं रूपकं भवति मध्यमव्यायोगः।
- दुःखपर्यवसायी नाटकम् - ऊरुभङ्गम्। संस्कृते इदं प्रथमम्।
- रङ्गमण्डपे मरणं चित्रीकृतम् - ऊरुभङ्गे, प्रतिमानाटके च।
- कथावस्तुनः पात्राणां च चित्रणे वैविध्यम्।
- चमत्कारहृद्यं नाटकीयाविष्करणम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. उपलब्धेरनुसारं प्रथमनाटकानि केन रचितानि ?
२. भासेन कति नाटकानि रचितानि ?
३. कालिदासस्य कस्मिन् नाटके भासः परामृष्टः?
४. भासनाटकेषु प्रशस्ततमं नाटकं किम् ?
५. रामायणकथामाश्रित्य भासेन रचितं नाटकद्वयं किम्?
६. महाभारतकथानुसारं लिखितानि भासनाटकानि कति ?
७. स्वप्नवासवदत्तनाटके नायकः कः?
८. स्वप्नवासवदत्तनाटके नायिका का?
९. भासस्य नाटकद्वये उदयनः मुख्यकथापात्रं भवति। तन्नाटकद्वयं किम्?
१०. चारुदत्तनाटके नायिकायाः नाम किम्?
११. अविमारके कयोः प्रेमकथा वर्णिता ?
१२. भासस्य कस्मिन् नाटके कर्णः मुख्यकथापात्रं भवति?
१३. दूतशब्देन आरब्धं नाटकद्वयं भासेन लिखितम्। तद् नाटकद्वयं किम् ?
१४. ऊरुभङ्गनाटके कस्य वधं रङ्गे प्रदर्शयति ?
१५. श्रीकृष्णस्य बाललीलामाधारीकृत्य भासेन लिखितं नाटकं किम् ?
१६. भासस्य शोकपर्यवसायी नाटकं किम् ?

## एकैकया खण्डिकया उत्तराणि लिखत।
### (Answer the following questions in a Paragraph)

१. ऊरुभङ्गम् अधिकृत्य टिप्पणिं लिखत ।
२. कर्णभारमधिकृत्य टिप्पणिं लिखत ।
३. स्वप्नवासवदत्तकथां संक्षिप्य लिखत ।

## निर्दिष्टाभ्यासः (Assignments)

| | |
|---|---|
| १. | महाकविः भासं अधिकृत्य लिखत। |
| २. | भासस्य रामायणाधारितनाटकानां निरूपणं कुरुत। |
| ३. | भासस्य महाभारताधारितनाटकानां निरूपणं कुरुत । |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. भासेन
२. १३ ।
३. मालविकाग्निमित्रे
४. स्वप्नवासवदत्तम् ।
५. प्रतिमानाटकम् अभिषेकनाटकञ्च।
६. ६
७. उदयनः।
८. वासवदत्ता।
९. स्वप्नवासवदत्तम् , प्रतिज्ञायौगन्धरायणम्।
१०. वसन्तसेना।
११. अविमारकः, कुरङ्गी।
१२. कर्णभारः।
१३. दूतवाक्यम्, दूतघटोत्कचम् ।
१४. दुर्योधनस्य।
१५. बालचरितम्।
१६. ऊरुभङ्गम्।

## सूचनाग्रन्थाः(References)


1. T.K.Ramachandra Iyyer *A short History of Sanskrit Literature* R S Vadhyar &Sons Palakad
2. A Macdonnel. *A History of Sanskrit Literature* Motilal Banarasidass, Delhi
3. Dr.K.Kunjunniraja , *Sanskrit on the stage*, Madras University of Madras


## अधिकवाचनग्रन्थाः(Suggested Readings)

1. Dr.K.Kunjunniraja .*Sanskrit on the stage,* University of Madras, Madras
2.A.B.Keith , *Sanskrit drama,*Geoffrey cumberlege,Oxford University Press
3 Dr.Sudhamsu Caturvedi .*Bhāsanāṭakasaṛvasvam*

# Unit- 4

## नाटकान्तं कवित्वम्

### उद्देश्यानि (Learning Outcomes)

- समाजे कवीनां स्वाधीनतां जानाति।
- संस्कृतसौन्दर्यशास्त्रपरिज्ञानं लभते।
- नाट्यप्रयोगपरिचयः प्राप्नोति।
- नाटकप्रभृतीनां आस्वादनाय क्षमतोत्पादनम्।

### प्राग्व्यपेक्षाः(Prerequisites)

तृतीये भागे (खण्डे) रूपकविभागः, नाटकसाहित्यं विकासश्च, पुनः भासमहाकविः च पठनाय वर्तन्ते। एतत्खण्डमस्माभिः पठितम्। तृतीये खण्डे एककचतुर्थं वर्तते। चतुर्थे एकके नाटकान्तं कवित्वं वर्तते। इदानीं तदधिकृत्य पठामः।

### मुख्यपदानि (Key terms)

पञ्चसन्धिः, अष्टादश उपरूपकाणि, अवस्थाः, अर्थप्रकृतयः, कथापात्रम्, उत्तमनाटककर्तारः

### Discussion

कविप्रतिभायाः परिस्फूर्तिः नाटकेषु एव नाटकरचनासु एव दरीदृश्यते इति नाटकान्तं कवित्वम् इत्युक्तेः तात्पर्यम्। कवीनां कृतहस्तता अथवा उत्कृष्टकवित्वं नाटकरचनयैव सम्यक् प्रतीयते इति साहित्यतत्त्वदर्शिभिः अङ्गीकृतम्। दशभिः रूपकप्रभेदैः अष्टादश उपरूपकप्ररूपैश्च यत्किञ्चिदपि कथावस्तु प्रपञ्चयितुं शक्यते। एवं विधे विभिन्ने रूपकप्रपञ्चे नाटकस्यैव प्रामुख्यं प्रमाणीकृतमालङ्कारिकैः।

नाट्यं काव्यस्य अन्यभेदात् अधिकमाह्लादकरं मनोरमं च विद्यते। अत एव उच्यते "काव्येषु नाटकं रम्यम्"इति। नाट्येन सर्वेषां वर्गाणां जनाः आनन्दानुभूतिं कुर्वन्ति यतो हि दर्शनीयात् हृद्यं श्रवणीयात् उपदेशजनकञ्च भवति। एवं सहृदयानां हृदये आनन्दानुभूतिमुत्पादयति तथा च कान्तासम्मितोपदेशं करोति। महाकविकालिदासेन नाट्यं विभिन्नरुचियुक्तानां जनानां कृते आनन्ददायकमद्वितीयं समाराधनं मन्यते - "नाट्यं भिन्नरुचेः जनस्य बहुधाप्येकं समाराधनम्"।

इतरकाव्यप्रभेदापेक्षया आधिकारिकप्रासङ्गिकवस्तुस्वीकारस्य, पञ्चसन्धिः, पञ्च अवस्थाः, पञ्च अर्थप्रकृतयः इत्यादीनां च यथाविधि यथोचितं समन्वयेन प्रकाशम्, आत्मगतम्, अपवार्य, आकाशभाषितम् इत्यादि

भाषणप्रकारैः रसभावादीनां कथापात्रद्वारा अनुवाचकानां पुरतः प्रत्यक्षतया रङ्गमञ्चे एव अवतरणक्षमतया च नाटकानाम् सद्यैव अनुभूतिप्रदायकत्वमस्ति। अत एव नाटकरचना काव्यान्तररचनाभ्यः दुष्करं भवति। एवम् उत्तमनाटककर्ता कविः प्रतिभया रचनाकौशलेन च इतरान् काव्यकर्तॄन् अतिरिच्य वर्तते। तत्र भास-कालिदास-भवभूति-श्रीहर्ष-भट्टनारायण-विशाखदत्त-शूद्रकादयः नितरां स्मर्तव्याः एव।

इतिहासेषु पुराणेषु च नाट्यप्रयोगयोग्याः सन्दर्भाः आसन्नपि तेषां नाटकरूपाविष्कारेण वर्धितचारुता समुपलब्धा इति सुविदितमेव। तथैव च कठोपनिषदि यमनचिकेतसंवादोऽपि नाट्यप्रयोगसाध्यतायाः निदर्शनतया भासते। 'रसप्रधानं, घटनाप्रधानं' च भवति नाटकम् इत्यतः 'औचित्यं नाट्यजीवितम्'इत्यपि प्रथा अस्ति। नाट्ये सत्यशिवसौन्दर्याणां योगं भवति। तस्मिन् सर्वेषां भावानामवस्थानां च चित्रणं भवति। नाट्ये किमपि लोकवृत्तं न उपेक्षितम्। तस्मिन् उत्तममध्यमाधमजनानां यथार्थचित्रणं भवति। यथार्थचित्रणेन नाट्यं सत्यं भवति। हितोपदेशप्रदानात् शिवं विश्रान्तिजनकक्रीडनीयकात् सुन्दरं भवति। सत्यस्य शिवस्य सुन्दरत्वस्य एकत्र सम्मेलनं नाट्ये एव भवति।

काव्यापेक्षया नाटकस्य स्थानमन्यदेव। दृश्यकाव्ये नाटके सङ्गीत - वाद्य - दृश्यविधानादयः काव्यात्मकप्रभावस्य वृद्धौ साहाय्यं कुर्वन्ति। यतः लोकः दृश्यवस्तुनः अभिनयेन आत्मानं विनोदयति। नाटकदर्शनेन यो आनन्दः, सः श्रव्यकाव्यश्रवणेन लभ्यमानमानन्दम् अतिशेते। अतः उक्तम् - 'काव्येषु नाटकं रम्यम्'इति।सहृदयानां हृदये आह्लादकारकरसानुभूत्युत्पादनमेव काव्यस्योद्देशः।'काव्यगतरसानुभूतौ कृते यादृशस्य कवित्वमयस्य वातावरणस्य आवश्यकता भवति, नहि तत्र सर्वे क्षमन्ते, अत एव सहृदया एव काव्यमास्वादयितुं प्रभवन्ति। रसानुभूतेः मूलकारणं स्थायीभावस्य विभावानुभावव्यभिचारिभावैः सह संयोगं विद्यते - "विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः" । अभिनये पुनर्वेषभूषायवनिकादयः स्वयमेव रसानुकूलं वातावरणमुपपादयन्तः साधारणजनेभ्योऽपि रसानुभवावसरं ददाति। अत एव तु नाटकान्तं कवित्वं प्रथते'।

## पुनरावृत्तिः (Recap)

- कविप्रतिभायाः परिस्फूर्तिः नाटकेषु एव नाटकरचनासु एव दरीदृश्यते।
- दशभिः रूपकप्रभेदैः अष्टादश उपरूपकप्ररूपैश्च ।
- पञ्चसन्धिः, पञ्च अवस्थाः, पञ्च अर्थप्रकृतयः इत्यादीनां च यथाविधि यथोचितं सन्निवेशः करणीयः।
- आत्मगतम्, अपवार्य, आकाशभाषितम् इत्यादि भाषणप्रकारैः रसभावादीनां कथापात्रद्वारा अनुवाचकानां पुरतः प्रत्यक्षतया रङ्गमञ्चे एव अवतरणक्षमतया च नाटकानाम् सद्यैव अनुभूतिप्रदायकत्वमस्ति।
- इतिहासेषु पुराणेषु च नाट्यप्रयोगयोग्याः सन्दर्भाः सन्ति।
- 'रसप्रधानं, घटनाप्रधानं' च भवति नाटकम् इत्यतः 'औचित्यं नाट्यजीवितम्'इत्यपि प्रथा अस्ति।
- लोकः दृश्यवस्तुनः अभिनयेन आत्मानं विनोदयति। नाटकदर्शनेन यो आनन्दः, सः श्रव्यकाव्यश्रवणेन लभ्यमानमानन्दम् अतिशेते।
- सहृदयानां हृदये आह्लादकारकरसानुभूत्युत्पादनम्।
- नाटकेन साधारणजनेभ्योऽपि रसानुभवावसरं ददाति।

- अत एव तु नाटकान्तं कवित्वं प्रथते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. उपरुपकाणि कति?
२. कविप्रतिभायाः परिस्फूर्तिः केषु दरिदृश्यते?
३. नाटके कति अर्थप्रकृतयः ?
४. नाट्यप्रयोगयोग्याः सन्दर्भाः कुत्र आसन्?
५. कति अवस्थाः?
६. नाटकाचार्याः के?

## एकेन वक्येन द्वाभ्यां वा उत्तराणि लिखत
**(Answer the following questions in one or two sentences)**

१. काव्येषु नाटकं रम्यम्'इति-कथम्?
२. रसनिष्पत्तिप्रतिपादितं सूत्रम् किम् ?
३. नाटकस्य काव्यात्मकप्रभाववृद्धौ किम् किम् सहायं कुर्वन्ति?

## निर्दिष्टाभ्यासः (Assignments)

१. नाटकान्तं कवित्वम्।
२. काव्येषु नाटकं रम्यम् । समर्थयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. अष्टादश।
२. नाटकेषु।
३. पञ्च।
४. इतिहासेषु पुराणेषु च नाट्यप्रयोगयोग्याः सन्दर्भाः सन्ति।
५. पञ्च।
६. भास-कालिदास-भवभूति-श्रीहर्ष-भट्टनारायण-विशाखदत्त-शूद्रकादयः।

## सूचनाग्रन्थाः (References)


1. T.K Ramachanrda Aiyer. *A short history of Sanskrit Literature*, Published by R S Vadhyar and Sons, Kalpathi, Palakkad
2. A Macdonnel. *A History of Sanskrit Literature* Motilal Banarasidass, Delhi
3. Dr.K.Kunjunniraja .*Sanskrit on the stage,* University of Madras, Madras
4. Bhāsanāṭakasaṛvasvam – Dr.Sudhamsu Caturvedi


## अधिकवाचनग्रन्थाः (Suggested Readings)


1. Acharya.Lokamani Dahal, *Samskruthasahityethihasa*,Choukamba Krishnadas Academy, Varanasi,2019
2. A B Keith. *The Sanskrit Drama in its Origin, Dvelopment, Theory and Practice*, MotilalBanarasidass Publishers, Delhi.1924

BLOCK - 4

# भासस्य मध्यमव्यायोगस्य सविशेषाध्ययनम्

## उद्देश्यानि (Learning Outcomes)

- नाटकेषु मध्यमव्यायोगस्य सविशेषज्ञानम्।
- रूपकेषु व्यायोगस्य सविशेषतां अधिकृत्य अवगमनम्।
- मानवमूल्यानां धर्मस्य सत्यस्य न्यायस्य च बोधनेन जीवितस्य हितकरं मार्गं अवगच्छति।
- कथापात्राणां सामान्यज्ञानम्।
- नाटकरचनाय अभिरुचिं वर्धयति।

## प्राग्व्यपेक्षाः (Prerequisites)

विशिष्टो आयोगः - समागमः - एव व्यायोगः। मध्यमस्य व्यायोगः मध्यमव्यायोग इति व्यायोगशब्दोऽत्र भासेनान्वर्थीकृत इति सहृदयाः सशिरःकम्पमङ्गीकुर्वन्ति। व्यायोगस्य नायको भीमसेनः यद्यपि महाभारतप्रसिद्धो भवति, ततोऽप्यस्य कथा भासकल्पितेत्येव वक्तुं शक्यते। भीमसेनस्य पत्न्याः हिडिम्बायाः व्रतान्तभोजनार्थं तत्पुत्रेण घटोत्कचेन गृहीतः ब्राह्मणकुमारः भीमसेनेन मोचित इत्येषा कथाऽत्र नाटकीयैर्मुहूर्त्तैः सुसम्पुष्टतया प्रतिपादिता।

## मुख्याशयाः (Key concepts)

वृद्धब्राह्मणः वने सञ्चरति, घटोत्कचो तदा ब्राह्मणान् अन्वचरति, मातुः पारणाय पुत्रमेकं बध्नाति, मध्यमस्य रङ्गप्रवेशः, भीम-हिडिम्बीसमागमः।

# Unit - 1
## व्यायोगस्य सविशेषता

## Discussion
### महाकविः भासः

दशरूपकेषु एको भवति व्यायोगः। नाटकादि रूपकेषु व्यायोगप्रकारस्योदाहरणं भवति मध्यमव्यायोगः। व्यायोगस्य इतिवृत्तं इतिहासप्रयुक्तं प्रख्यातं भवति। एकाङ्कः। कथापात्रेषु स्त्रियः स्वल्पा एव। गर्भविमर्शसन्धी न स्तः। अङ्गीरसः वीरकरुणादयः भवेयुः। श्रृङ्गारहास्यशान्ताः रसाः अङ्गित्वेन न स्वीक्रियन्ते। नायकः दिव्यः, राजर्षिः, प्रसिद्धः, धीरोदात्तः च भवेत्। युद्धनियुद्धसंघर्षादयः भवेयुः।

एवं लक्षणयुक्तव्यायोगः भवति भासस्य मध्यमव्यायोगः। अस्य कथावस्तु महाभारतादुद्धृतं प्रख्यातं भवति। स्त्री कथापात्राणि स्वल्पमात्रं द्वे एव। मुखप्रतिमुखनिर्वहणसन्धित्रयमत्र भवति। एकाङ्कः। भीमघटोत्कचयोः द्वन्द्वयुद्धमस्ति। वीरकरुणरसप्रधानः। नायकस्थाने भीमः घटोत्कचः च समस्थानीयौ भवतः। किन्तु कथागत्यनुसारेण घटोत्कचस्य आद्यन्तपात्रत्वात् स नायक इति वक्तुं शक्यते। नायको दिव्यः, राजर्षिः इत्यादि चिन्तने भीमसेनस्य

नायकत्वं भवितव्यम्। तत्परिहाराय घटोत्कचस्य मायाविद्याप्रयोगः। मायाबन्धनं न राक्षसीयप्रयोगः, न वा वधाय च। अतः घटोत्कचः धीरोदात्तनायक इति वक्तुं शक्यते। किन्तु भासः पाण्डवमध्यमं भीमसेनं प्रतिनायकरूपेण अवतारयति इति च वक्तुं सन्देहस्यावश्यकता नास्ति।

# Unit - 2

## घटोत्कचप्रवेशः

**मध्यमव्यायोगः।**

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

**सूत्रधारः** - **पायात्स वोऽसुरवधूहृदयावसादः**
**पादो हरेः कुवलयामलखड्गनीलः।**
**यः प्रोद्यतस्त्रिभुवनक्रमणे रराज**
**वैडूर्यसंक्रम इवाम्बरसागरस्य।।१।।**

एवमार्यमिश्रान् विज्ञापयामि।
अये, किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते। अङ्ग, पश्यामि।

(नेपथ्ये)

भोस्तात! को नु खल्वेषः।

**सूत्रधारः** - (अवलोक्य) भवतु विज्ञातम्।
**भोः शब्दोच्चारणादस्य ब्राह्मणोऽयं न संशयः।**
**त्रास्यते निर्विशङ्केन केनचित् पापचेतसा।।२।।**

(पुनर्नेपथ्ये)

भोस्तात! को नु खल्वेषः।

**व्याख्या** - नान्दी पाठानन्तरं सूत्रधारः प्रविशति।

**श्लोकः - १** असुरवधूहृदयावसादः - असुरवधूनां हृदयदुःखदः, कुवलयामलखड्गनीलः - कुवलयस्य तथा निर्मल खड्गस्य च रूपसदृशनीलरूपः, हरेः स पादः - विष्णोः पादारविन्दः। वः - युष्मान्, पायात् - रक्षतु। त्रिभुवनक्रमणे - त्रिभुवनसंक्रमणरूपसञ्चारे, प्रोद्यतः - उच्चलितः, यः - यः पादः। अम्बरसागरस्य - आकाशसमुद्रस्य, वैडूर्यसंक्रम इव - वैडूर्यनिर्मितसेतुः इव, रराज - शुशुभे।

**सारः** - असुरवधूनां दुःखदः कुवलयवद् निर्मलखड्गनीलवर्णः हरेः पादः वः रक्षतु। यः त्रिभुवनसंक्रमणे उच्चलितः स पादः आकाशसमुद्रस्य वैडूर्यसेतुः इव शुशुभे।

किम् + नु - किन्नु। आर्यमिश्रान् - मान्यजनान्। पण्डितवर्यान्, विज्ञापयामि - अवबोधयामि। भोस्तात! भो पितः!

**श्लोकः - २** अस्य - अस्य पुरुषस्य, भोः शब्दोच्चराणात् - भोः इति शब्दकथनात्, अयं ब्राह्मणः - अयं पुरुषः कश्चित् ब्राह्मणः इति, न संशयः - न सन्देहः। निर्विशङ्केन - निस्सन्देहेन, केनचित् - केनचित्, पापचेतसा - दुष्टचेतसा, त्रास्यते - भयं करिष्यति।

**सारः -** शब्दोच्चारणादयं पुरुषः कश्चित् ब्राह्मणः इति न संशयः। सः केनचित् दुष्टचेतसा त्रस्यते न सन्देहः। पुनः भूयः, खलु + एषः - खल्वेषः। भोः + तात - भोस्तात।

**सूत्रधारः** - (अवलोक्य) हन्त! दृढं विज्ञातम्। एष खलु पाण्डवमध्यमस्यात्मजः हिडिम्बारणिसम्भूतो राक्षसाग्निः अकृतवैरः ब्राह्मणजनं वित्रासयति।
भोः कष्टं खलु पत्नीसुतपरिवृतस्य ब्राह्मणस्य वृत्तान्तः।
अत्र हि -

**भ्रान्तैः सुतैः परिवृतस्तरुणैः सदारो**
**वृद्धो द्विजो निशिचरानुचरः स एषः।**
**व्याघ्रानुसारचकितो वृषभः स धेनुः**
**सन्त्रस्तवत्सक इवाकुलतामुपैति।।३।।**

(निष्क्रान्तः)
(इति स्थापना)

**व्याख्या -** अवलोक्य - दृष्ट्वा, दृढं विज्ञातम् - सम्यक् ज्ञातम्। पाण्डवमध्यमस्य - भीमसेनस्य, आत्मजः - पुत्रः, अकृतवैरः - वैराग्यरहितः, वित्रासयसि - भीतिं करोति। पत्नीसुतपरिवृतस्य - भार्यापुत्रसहितस्य, वृत्तान्तः - कथा।

**श्लोकः - ३** तरुणैः भ्रान्तैः - यूनैः परिभ्रान्तैः, सुतैः - पुत्रैः, परिवृतः - सहितः, सदारः - दारया भार्यया सहितः, वृद्धः स एव द्विजः - वृद्धः सो अयं ब्राह्मणः, निशिचरानुचरः (सन्) - राक्षसानुचरः सन्, सन्त्रस्तवत्सकः सधेनुः - भीतवत्सेन गवा च सहितः वृषभः, व्याघ्रानुसारचकित इव - व्याघ्रानुसारेण भयचकित इव, आकुलतामुपैति - व्याकुलतां प्राप्नोति।

**सारः -** तरुणैः परिभ्रान्तैः पुत्रैः सहितः सभार्यो वृद्धब्राह्मणः राक्षसानुचरः सन् सन्त्रस्तवत्सकः सधेनुः व्याघ्रानुसारचकितः वृषभः इव आकुलतां प्राप्नोति। दारैः सहितः सदारः। धेन्वा सहितः सधेनुः। निशि चरतीति निशिचरः। इव + आकुलताम् - इवाकुलताम्। उप + एति - उपैति।

(ततः प्रविशति सुतत्रयकलत्रपरिवृतः केशवदासः पृष्ठतो घटोत्कचश्च)

**वृद्धः** - को नु खल्वेषः।

**तरुणरविकरप्रकीर्णकेशो**
**भ्रुकुटिपुटोज्वलपिङ्गलायताक्षः।**
**सतटिदिव घनः सकण्ठसूत्रो**
**युगनिधने प्रतिमाकृतिर्हरस्य।।४।।**

**प्रथमः** - भोस्तात! को नु खल्वेषः।

**ग्रहयुगलनिभाक्षः पीनविस्तीर्णवक्षाः**
**कनककपिलकेशः पीतकौशेयवासाः।**
**तिमिरनिवहवर्णः पाण्डरोद्वृत्तद्रंष्ट्रो**
**घन इव जलगर्भो लीयमानेन्दुलेखः।।५।।**

**व्याख्या -** घटोत्कचश्च - घटोत्कचः + च। को नु खल्वेषः - कः अयं पुरुषः।

**श्लोकः - ४** तरुणरविकरप्रकीर्णकेशः - बालसूर्यस्य किरणा इव विकीर्णाकेशसहितः, (तरुणरविः -बालसूर्यः, करः - किरणः, प्रकीर्ण - विकीर्ण) भ्रुकुटिपुटोज्वलपिङ्गलयाताक्षः - वक्रभ्रुवोः अधः ज्वलन्नरुणाक्षः, सकण्ठसूत्रः - कण्ठसूत्रसहितः, सतटित् घन इव - विद्युत्सहितमेघ इव, युगनिधने - युगान्ते, हरस्य - शिवस्य, प्रतिमाकृतिः - सदृशाकृतिः - शिवोऽयं क इति?

**सारः -** बालसूर्यस्य किरण इव विकीर्णकेशः भ्रूकुटिपुटोज्वलरक्ताक्षः कण्ठसूत्रसहितः विद्युत्सहितमेघ इव युगान्ते शिवस्य प्रतिमाकृतिः अयं कः?
कण्ठसूत्रेण सहितः सकण्ठसूत्रः।

**श्लोकः - ५** ग्रहयुगलनिभाक्षः - सूर्यचन्द्रग्रहसदृशाक्षः, पीनविस्तीर्णवक्षाः - पीनविस्तृतोरः, कनककपिलकेशः - सुवर्ण इव कपिलवर्णकेशः, पीतकौशेयवासः - पीतवर्ण कौशेयवसनसहितः, तिमिरनिवहवर्णः -गाढान्धकारवर्णः (तमसमूहवर्णः) पाण्डरोद्वृत्तद्रंष्ट्रः - श्वेतोन्नतीकृतद्रंष्ट्रासहितः, लीयमानेन्दुलेखः - लीयमानचन्द्रलेखः, नवः जलदः इव - नूतनमेघ इव (स्थितः एषः कः?)

**सारः** - सूर्यचन्द्रसदृशाक्षः पीनविस्तृतोरः सुवर्णकपिलकेशः पीतकौशेयवसनः गाढान्धकारवर्णः श्वेतोन्नतदंष्ट्रः लीयमानचन्द्रलेखः नूतनजलदः इव स्थितः एषः कः?

**द्वितीयः** - क एष भोः।

**कलभदशनदंष्ट्रो लाङ्गूलाकारनासः**
**करिवरकरबाहुर्नीलजीमूतवर्णः।**
**हुतहुतवहदीप्तो यः स्थितो भाति भीम-**
**स्त्रिपुरनिहन्तुः शङ्करस्येव शेषः।।६।।**

**तृतीयः** - भोस्तात। को नु खल्वयमस्मान् पीडयति।

**वज्रपातोऽचलेन्द्राणां श्येनः सर्वपतत्रिणाम्।**

**मृगेन्द्रो मृगसङ्घानां मृत्युः पुरुषविग्रहः।।७।।**

**ब्राह्मणी** - कः एषोऽस्मान् सन्तापयति?

**व्याख्या - श्लोकः - ६** सः - यः पुरुषः, कलभदशनद्रंष्ट्रः - कलभस्य दशनद्रंष्ट्र इव द्रंष्ट्रः, लाङ्गलाकारनासः - लाङ्गलस्य आकारनासिकासहितः सन् करिवरकरबाहुः - गजश्रेष्ठस्य शुण्डा इव बाहु यस्य सः, नीलजीमूतवर्णः - नीरदवर्णः, हुतहुतवहदीप्तः - ज्वलन्होमाग्निवद् प्रकाशमानः, भीमः स्थितः - भयङ्करः त्रिपुरनिहन्तुः - त्रिपुरारेः, शङ्करस्य रोष इव - शिवस्य कोप इव, भाति - शोभते।

**सारः -** यः पुरुषः कलभदशनदंष्ट्र इव लाङ्गलस्य आकार इव नासिकासहितः गजकरबाहुः, नीलनीरदवर्णः, होमाग्निवत् शोभमानः, भयङ्करः, त्रिपुरारेः शङ्करस्य रोष इव शोभते। सः कः? अस्मान् - अस्मज्जनान्, पीडयति - दुःखीकरोति।

**श्लोकः - ७** अचलेन्द्राणां - पर्वतश्रेष्ठानां, वज्रपातः - वज्राघातः, सर्वपतत्रिणां - सर्वपक्षिणां, श्येनः - श्येनपक्षिः, मृगसङ्घानां - मृगसमूहानां, मृगेन्द्रः - सिंहः, (एवं - ईदृशः) पुरुषविग्रहः - मनुष्यशरीरः (अयं) मृत्युः - कालः, को नु - कः भवेत्?

**सारः -** पर्वतश्रेष्ठानां वज्राघातः सर्वपक्षिणां श्येनः, मृगाणां सिंहः ईदृशपुरुषशरीरोऽयं कालः कः भवेत्? सन्तापयति - दुःखीकरोति।

**घटोत्कचः** - भो ब्राह्मण! तिष्ठ, तिष्ठ।

**किं यासि मत्भयविनाशित धैर्यसारो**
**वित्रस्तदारसुतरक्षणहीनशक्ते।**
**ताक्ष्यार्ग्रपक्षपवनोद्धतरोषवह्नि-**
**तीव्रः कलत्रसंहितो भुजगो यथार्त्तः।।८।।**

भो ब्राह्मण! न गन्तव्यं, न गन्तव्यम्।

**वृद्धः** - ब्राह्मणि! न भेतव्यं न भेतव्यम्। पुत्रकाः न भेतव्यम्। सविमर्शा ह्यस्य वाणी।

**घटोत्कचः** - (आत्मगतम्) भो! कष्टम्।

**जानामि सर्वत्र सदा च नाम**
**द्विजोत्तमाः पूज्यतमाः पृथिव्याम्।**
**अकार्यमेतच्च मयाद्य कार्यं**
**मातृनियोगादपनीतशङ्कम्।।९।।**

**व्याख्या** - तिष्ठ - स्थितिं कुरु।

**श्लोकः - ८** वित्रस्तदारसुतरक्षणहीनशक्ते - भयभीतदारस्य तथा पुत्राणां च रक्षणे शक्तिरहित! (हे ब्राह्मण!) मद्भयविनाशितधैर्यसारः - मज्जन्यभयेन नष्टधैर्यः। कलत्रसहितः - भार्यासहितः, तार्क्ष्याग्रपक्षपवनोद्धतरोषवह्नितीव्रः - तार्क्ष्यस्य - गरुडस्य, अग्रपक्षपवनः - पक्षाग्रपवनेनाविर्भूतवायुः (तेन) उद्धतरोषवह्नितीव्रः - ज्वलितकोपाग्निना तीक्ष्णः भुजगः - सर्पः यथा - इव, आर्तः - दुःखितः, किं यासि - किं गच्छसि।

**सारः** - भीतदारपुत्राणां रक्षणे शक्तिहीन! हे ब्राह्मण! मद्भयेन नष्टधैर्यः सभार्य; त्वं गरुडपक्षविलिप्तवह्निना आर्तः भुजग इव किं गच्छसि?
न भेतव्यं - मा बिभीहि। साविमर्शा - अवधानपूर्वकम्, वाणी - वाक्।

**श्लोकः - ९** द्विजोत्तमाः - ब्राह्मणश्रेष्ठाः, पृथिव्यां - भूमौ, सर्वत्र - सर्वतः, सदा च - सर्वदा च, पूज्यतमाः - आदरणीयाः (इति) जानामि - अहम् अवगच्छामि। अद्य - अस्मिन् दिने, मातुः नियोगात् - जनन्याः निर्देशेन, अकार्यम् एतत् च - कर्तुमयोग्यमपि एतत्, अपनीतशङ्कम् - शङ्कां विना, मया कार्यम् - मया करणीयम्।

**सारः -** ब्राह्मणश्रेष्ठाः भूमौ सर्वत्र पूजनीयाः इति अहं जानामि। अधुना मातुः नियोगात् कर्तुमयोग्यमपि एतत्कार्यं शङ्कां विना मया अद्य कार्यम्। वृद्धः - ब्राह्मणि! किं न स्मरसि तत्र भवता जलक्लिन्नेन मुनिनोक्तम् अनपेतराक्षसमिदं वनम्, अप्रमादेन गन्तव्यमिति तदेवोत्पन्नं भयम्।

**ब्राह्मणी** - किमिदानीमार्यो मध्यस्थवर्ण इव दृश्यते?
**वृद्धः** - किं करिष्यामि मन्दभाग्यः।
**ब्राह्मणी** - ननु विक्रोशामः।
**प्रथमः** - भवति, कस्य वयं विक्रोशामः।

**इदं हि शून्यं तिमिरोत्करप्रभैः**
**नगप्रकारैरवरुद्धदिक्पथम्।**
**खगैर्मृगैश्चापि समाकुलान्तरं**
**वनं निवासाभिमतं मनस्विनाम्।।१०।।**

**व्याख्या** - जलक्लिन्नेन - जलक्लिन्ननाम्ना मुनिना, अनपेतराक्षसं - राक्षससहितम्, मुनिना + उक्तं - मुनिनोक्तम्, अप्रमादेन - सश्रद्धं (सावधानेन), गन्तव्यं - गच्छतु, उक्तं - कथितं, तदेव - तस्मादेव, उत्पन्नं - जातम्। किं - केन कारणेन, मध्यस्थवर्ण इव - मध्यस्थ इव, विक्रोशं - आक्रेशम्?

**श्लोकः - १०**इदं वनं शून्यं हि - काननमिदं जनरहितं हि, तिमिरोत्करप्रभैः - गाढान्धकारप्रभैः, नगप्रकारैः - अचलवृक्षसमूहैः, अवरुद्धदिक्पथं - प्रतिरोधितदिङ्मार्गं, खगैः - पक्षिभिः, मृगैः - पशुभिः, समाकुलान्तरं - पूरितवनमध्यप्रदेशं, मनस्विनां - स्थिरचित्तानां, निवासाभिमतं - वासाय इष्टम्।

**सारः** - काननमिदं शून्यं हि गाढान्धकारप्रभैः पर्वतवृक्षसमूहैः प्रतिरुद्धदिङ्मार्गं खगैः पशुभिः पूरितवनप्रदेशं स्थिरचित्तानामपि वासाय इष्टं भवति।

न अपेताः अनपेताः, अनपेताः राक्षसाः यस्मिन् तत् अनपेतराक्षसं (वनम्) मध्यस्थस्य (उदासीनस्य) वर्णः इव (छाया इव) मध्यस्य वर्ण इव तिमिरस्य (अन्धकारस्य) उत्करः (राशिः) तस्य प्रभा (कान्तिः) येषां तैः। न गच्छति इति नगाः पर्वताः वृक्षाः च तेषां प्रकारैः (भेदैः) अवरुद्धः नगप्रकारैरवरुद्धः। प्रशस्तं मनः येषां ते मनस्विनः।

**वृद्धः** - ब्राह्मणि, न भेतव्यं, न भेतव्यम्। मनस्विजननिवासयोग्यमिति श्रुत्वा विगत इव मे सन्त्रासः। शङ्के नातिदूरेण पाण्डवाश्रमेण भवितव्यम्।
पाण्डवास्तु -

**युद्धप्रियाश्च शरणागतवत्सलाश्च**
**दीनेषु पक्षपतिताः कृतसाहसाश्च।**
**एवं विधप्रतिभयाकृतिचेष्टितानां**
**दण्डं यथार्हमिह धारयितुं समर्थाः।।११।।**

**प्रथमः** - भोस्तात! न तत्र पाण्डवा इति मन्ये।
**वृद्धः** - कथं त्वं जानीषे?
**प्रथमः** - श्रुतं मया तस्मादागच्छता केनचित् ब्राह्मणेन शतकुम्भं नाम यज्ञमनुभवितुं महर्षेर्धौम्यस्याश्रमं गता इति।
**वृद्धः** - हन्त! हताः स्मः।
**प्रथमः** - तात! न तु सर्व एव। आश्रमपरिपालनार्थमिह स्थापितः किल मध्यमः।
**वृद्धः** - यद्येवं सन्निहिताः सर्वे पाण्डवाः।
**प्रथमः** - स चाप्यस्यां वेलायां व्यायामपरिचयार्थं विप्रकृष्टदेशस्थ इति श्रूयते।

**व्याख्या** - निवासयोग्यं - वासयोग्यं, श्रुत्वा - आकर्ण्य, विगतः - निर्गतः, सन्त्रासः - भीतिः, न + अतिदूरेण - नातिदूरेण। पाण्डव + आश्रमेण - पाण्डवाश्रमेण। पाण्डवाः + तु - पाण्डवास्तु।

**श्लोकः ११** युद्धप्रियाः - संग्रामेषु तत्पराः, शरणागतवत्सलाः - शरणागतेषु वात्सल्ययुक्ताः, दीनेषु पक्षपतिताः - दीनेषु विषयेषु पक्षपातयुक्ताः, कृतसाहसाः - साहसयुक्ताः, एवं विधप्रतिभयाकृतिचेष्टितानां - ईदृशभयङ्कराकृतीनां प्रवृत्तीनां, यथार्हं - उचितं, दण्डं धारयितुं - दण्डचालने, समर्थाः - शक्ताः (भवन्ति पाण्डवाः)।

**सारः** - युद्धप्रियाः शरणागतेषु वत्सल्ययुक्ताः दीनेषु पक्षपातयुक्ताः साहसप्रियाः ईदृशभयङ्राकृतीनां प्रवृत्तीनां यथार्हं दण्डं धारयितुं पाण्डवाः समर्थाः इति।

**विग्रहः** - युद्धप्रियाः - युद्धं प्रियं येषां ते युद्धप्रियाः। शरणागतवत्सलाः - शरणाय आगताः शरणागताः, तेषु वत्सलाः शरणागतवत्सलाः। कृतसाहसाः - कृतं साहसं यैः ते कृतसाहसाः। जानीषे - अवगच्छसि। यज्ञं - यागं,

महर्षेः + धौम्यस्य + आश्रमं - महर्षेर्धौम्यस्याश्रमं, यदि + एवं - यद्येवं, सः + च + अपि + अस्यां - स चाप्यस्यां, सन्निहिताः - सान्निध्यम् अनुभूताः, तत्रस्थाः, विप्रकृष्टः - विदूरस्थः,

**वृद्धः** - हन्त! निराशाः स्मः। भवतु। पुत्र! व्यपश्रियिष्ये तावदेनम्।
**प्रथमः** - अलमलं परिश्रमेण।
**वृद्धः** - निर्वेदप्रत्यर्थिनी खलु प्रार्थना। भवतु पश्यामस्तावत्। भो भो पुरुष! अस्त्यस्माकं मोक्षः?
**घटोत्कचः** - मोक्षोऽस्ति समयतः।
**वृद्धः** - कः समयः?
**घटोत्कचः** - अस्ति मे तत्र भवती जननी तयाहमाज्ञप्तः। पुत्र! ममोपवासनिसर्गार्थमस्मिन् वनप्रदेशे कश्चिन्मानुषः प्रतिगृह्यानेतव्यः इति। ततो मयाऽऽसादितो भवान्।

**पत्न्या चारित्रशालिन्या द्विपुत्रो मोक्षमिच्छसि।**
**बलाबलं परिज्ञाय पुत्रमेकं विसर्जय।।१२।**

**वृद्धः** - हं भो राक्षसापसद! किमहमब्राह्मणः?

**ब्राह्मणः श्रुतवान् वृद्धः पुत्रं शीलगुणान्वितम्।**
**पुरुषादस्य दत्वाहं कथं निर्वृतिमाप्नुयाम्।।१३।।**

**व्याख्या -** व्यपश्रयिष्ये - आश्रयिष्ये, अलं परिश्रमेण - अलम् इति अव्ययस्य योगे परिश्रमेण इति तृतीयाविभक्तिः। निर्वेदप्रत्यर्थिनी - निराशाविरोधिनी, पश्यामः + तावत् - पश्यामस्तावत्, अस्ति + अस्माकं - अस्त्यस्माकं, समयतः - व्यवस्थायाः, मोक्षः - मोचनम्। तयाहमाज्ञप्तः - तया + अहम् + आज्ञप्तः, ममोपवासः - मम + उपवासः, उपवासनिसर्गार्थे - व्रतान्तपारणायै, कश्चिन्मानुषः - कश्चित् + मानुषः, आसादितः प्राप्तः।

**श्लोकः - १२** चारित्रशालिन्या - पतिव्रतया, पत्न्या - भार्यया (सह) द्विपुत्रो - द्वौ पुत्रौ, मोक्षमिच्छसि चेत् - मोक्षमभिलषसि चेत्, बलाबलं - तेषु बलाबलं (शक्तिं) ज्ञात्वा, एकपुत्रं - सूतमेकं, विसर्जय - उपेक्षय।

**सारः** - पतिव्रतया पत्न्या द्वाभ्यां पुत्राभ्यां च सह भवान् मोक्षमिच्छति चेत् पुत्रेषु बलाबलं परिज्ञाय एकं पुत्रं विसर्जय। राक्षसापसद - राक्षसाधम!

**श्लोकः - १३** ब्राह्मणः - द्विजः, श्रुतवान् - वेदज्ञः, वृद्धः अहं - जठरोऽहं, शीलगुणान्वितं - सुशीलगुणसमन्वितं, पुत्रं - अपत्यं, पुरुषादस्य - राक्षसस्य, हस्ते - करे, दत्वा - प्रदाय, कथं - केन प्रकारेण, निर्वृतिमाप्नुयाम् - सुखं प्राप्नुयाम्।

**सारः** - वेदज्ञः वृद्धः ब्राह्मणानुसारं शीलगुणसम्पन्नं पुरुषं राक्षसाय दत्वा कथं सुखं प्राप्नुयाम्।
**विग्रहः** - श्रुतम् अस्य अस्ति इति श्रुतवान्। शीलेन गुणैः चान्वितः शीलगुणान्वितः। पुरुषम् अत्ति इति पुरुषादः।

घटोत्कचः - **यद्यर्थितो द्विजश्रेष्ठ पुत्रमेकं न मुञ्चसि।**

**सकुटुम्बः क्षणेनैव विनाशमुपयास्यसि।।१४।।**

**वृद्धः** - एष एव मे निश्चयः।

**कृतकृत्यं शरीरं मे परिणामेन जर्जरम्।**
**राक्षसाग्नौ सुतापेक्षी होष्यामि विधिसंस्कृतम्।।१५।।**

**ब्राह्मणी** - आर्य! मा मैवम्। पतिमात्रधर्मिणी पतिव्रतेति नाम। गृहीतफलेनैतेन शरीरेणार्यं कुलं च रक्षितुमिच्छामि।

**घटोत्कचः** - भवति! न खलु स्त्रीजनोऽभिमतस्तत्र भवत्या।

**वृद्धः** - अहमनुगमिष्यामि भवन्तम्।

**घटोत्कचः** - आः! वृद्धत्वमपसर!

**प्रथमः** - भोस्तात! ब्रवीमि खलु तावत्किञ्चित्।

**वृद्धः** - ब्रूहि ब्रूहि शीघ्रम्।

**व्याख्या - श्लोकः - १४** हे द्विजश्रेष्ठ! हे ब्राह्मणश्रेष्ठ! अर्थितः (त्वं) - प्रार्थितः (त्वं) यदि एकं पुत्रं - पुत्रम् एकं, न मुञ्चसि - न मोचयसि (चेत्) क्षणेन - निमिषमात्रेण, सकुटुम्बं - कुटुम्बसहितं, विनाशं - नाशं, उपयास्यसि - प्राप्स्यसि।

**सारः -** हे ब्राह्मणश्रेष्ठ! मया प्रार्थितः भवान् यदि एकं पुत्रं न मुञ्चति चेत् क्षणमात्रेण सकुटुम्बेन नश्यति। क्षणेन + एव - क्षणेनैव।

**श्लोकः - १५** कृतकृत्यं - कर्तव्यकार्यकृतं, परिणामेन जर्जरं - वार्धक्येन जर्जरीकृतं, विधिसंस्कृतं - यथाविधि संस्कृतं, मे शरीरं - मम देहं, सुतापेक्षी - पुत्रकृते, राक्षसाग्नौ - राक्षसवह्नौ, होष्यामि - होमाग्नौ अर्पयामि।

**सारः** - कर्तव्यकार्यकृतं वार्धक्येन जर्जरं विधिसंस्कृतं मे शरीरं पुत्रापेक्षी राक्षसाग्नौ होष्यामि। पतितमात्रधर्मिणी - भर्तृशुश्रूषाधर्मचारणी।

**अभिमतः** - इष्टः।

**प्रथमः** - **मम प्राणैर्गुरुप्राणानिच्छामि परिरक्षितुम्।**
**रक्षणार्थं कुलस्यास्य मोक्तुमर्हति मां भवान्।।१६।।**

**द्वितीयः** - आर्य! मा मैवम्।

**ज्येष्ठः श्रेष्ठः कुले लोके पितॄणां च सुसंप्रियः।**
**ततोऽहमेव यास्यामि गुरुवृत्तिमनुसरन्।।१७।।**

**तृतीयः**- आर्यो! मा मैवम्।

**ज्येष्ठो भ्राता पितृसमः कथितो ब्रह्मवादिभिः।**

**ततोऽहं कर्तुमस्म्यर्हो गुरूणां प्राणरक्षणम्।।१८।।**

**व्याख्या - श्लोकः - १६** मम प्राणैः - मम जीवैः, गुरुप्राणान् - गुरूणां प्राणान्, परिरक्षितुं - संरक्षितुं, इच्छामि - अभिलषामि। अस्य कुलस्य - अस्य वंशस्य, रक्षणार्थं - रक्षायै, मां मोक्तुं - मां मोचयितुं, भवान् अर्हति - भवान् योग्यः अस्ति। मैवम् - मा + एवम्। कुलस्यास्य - कुलस्य +अस्य।

**सारः** - मम प्राणान् राक्षसाय दत्वा गुरूणां प्राणान् रक्षितुमहम् अभिलषामि। अतः अस्माकं कुलस्य रक्षायै मां मोचयितुं भवान् अर्हति।

**श्लोकः - १७** ज्येष्ठः - ज्येष्ठपुत्रः, कुले - वंशे, लोके - भुवने, श्रेष्ठः - उत्तमः, पितॄणां - मातापितॄणां, सुसम्प्रियः च - उत्तमप्रियः च। ततः - तस्मात्, गुरुवृत्तिं - गुरूणां कृते यद्वृत्ति तं, अनुस्मरन् - स्मरन्, अहमेव - अहम् एव। यास्यामि - गमिष्यामि।

**सारः -** ज्येष्ठपुत्रः कुले लोके उत्तमः, पितॄणां प्रियतमः च। ततोऽहं गुरुवृत्तिं स्मरन् गमिष्यामि।

**श्लोकः - १८** ज्येष्ठः भ्राता - अग्रजः सोदरः, पितृसमः - जनकतुल्यः, ब्रह्मवादिभिः - ब्रह्मज्ञैः, कथितः - उक्तः। ततः - तस्मात्, गुरूणां - गुरुजनानां, प्राणरक्षणं कर्तुं - जीवरक्षणाय, अहम् अर्हः अस्मि - अहं योग्यः अस्मि।

**सारः** - ज्येष्ठसोदरः पितृतुल्यः इति ब्रह्मवादिभिः उक्तः। ततः गुरूणां जीवरक्षणायाहं योग्यः अस्मि। ब्रह्मवादिनः - ब्रह्म वेदं वदन्ति इति ब्रह्मवादिनः। कर्तुमस्म्यर्हः - कर्तुम् +अस्मि +अर्हः।

**प्रथमः** - वत्स! मा मैवम्।

**आपदं हि पिता प्राप्तो ज्येष्ठपुत्रेण तार्यते।**
**ततोऽहमेव यास्यामि गुरूणां प्राणरक्षणात्।।१९**

**वृद्धः** - ज्येष्ठमिष्टतमं न शक्नोमि परित्यक्तुम्।
**ब्राह्मणी** - यथार्यो ज्येष्ठमिच्छति तथाहमपि कनिष्ठमिच्छामि।
**द्वितीयः** - पित्रोरनिष्टः कस्येदानीं प्रियः।
**घटोत्कचः** - अहं प्रीतोऽस्मि। शीघ्रमागच्छ।
**द्वितीयः** - **धन्योऽस्मि यद्गुरुप्राणाः स्वैः प्राणैः परिरक्षिताः।**
**बन्धुजनस्नेहाद्धि महतः कायस्नेहस्तु दुर्लभः।।२०।।**
**घटोत्कचः** - अहो स्वजनवात्सल्यं ब्राह्मणवटोः।
**द्वितीयः** - भोस्तात! अभिवादये।

**व्याख्या - श्लोकः - १९** हि - यतः, आपदं प्राप्तः - विपदमासादितः, पिता - जनकः, ज्येष्ठपुत्रेण, तार्यते - तरणं क्रियते। ततः - तस्मात्, गुरूणां - गुरुजनानां, प्राणरक्षणात् - जीवरक्षायाः निमित्तेन, अहम् एव, यास्यामि - गमिष्यामि।

**सारः -** यतः विपदं प्राप्तः पिता ज्योष्ठपुत्रेण तार्यते। तस्मात् गुरूणां प्राणरक्षणहेतुना अहमेव गमिष्यामि। इष्टतमम् - प्रियतमं, शक्नोमि - साधयामि, परित्यक्तुम् - उपेक्षितुम्, इदानीम् - अधुना, प्रीतोऽस्मि - प्रीतः +अस्मि। शीघ्रं - झटिति, धन्योऽस्मि - धन्यः +अस्मि।

**श्लोकः - २०** स्वैः प्राणैः - आत्मनः जीवैः, गुरुप्राणाः - गुरुजनानां प्राणाः, परिरक्षिताः - संरक्षिताः (इति) यत् (तत्) - यस्माद् तस्मात्, धन्यः अस्मि - अहं धन्यः भवामि। हि - यतः, महतः बन्धुस्नेहात् - महान्तं बन्धुस्नेहमुपेक्ष्य, कायस्नेहः - केवलं शरीरस्नेहः, दुर्लभः - तुच्छः भवति।

**सारः -** स्वैः प्राणैः गुरुप्राणाः संरक्षिताः इति अहं धन्यः अस्मि। यतः महतः बन्धुस्नेहात् केवलं शरीरस्नेहः दुर्लभः भवति।

**प्रथमः** - एहि एहि पुत्रः!

**विनिमाय गुरुप्राणान् स्वैः प्राणैर्गुरुवत्सल!।**
**अकृतात्मदुरावापं ब्रह्मलोकमवाप्नु हि।।२१।।**

**द्वितीयः** - अनुगृहीतोऽस्मि। अम्ब! अभिवादये।
**ब्राह्मणी** - चिरं जीव।
**द्वितीयः** - अनुगृहीतोऽस्मि। आर्य! अभिवादये।
**प्रथमः** - एह्येहि वत्स!

**परिष्वजस्व गाढं मां परिष्वक्तः शुभैर्गुणैः।**
**कीर्त्या तव परिष्वक्ता भविष्यति वसुन्धरा।।२२।।**

**तृतीयः**- आर्य! अभिवादये।
**द्वितीयः** - स्वस्ति।
**तृतीयः**- अनुगृहीतोऽस्मि।
**द्वितीयः** - भो! पुरुष किञ्चित् ब्रवीमि।
**घटोत्कचः** - ब्रूहि ब्रूहि शीघ्रम्।

**व्याख्या -** एहि - आगच्छ।

**श्लोकः - २१** हे गुरुवत्सल! - गुरुजनेषु वात्सल्ययुक्त!, स्वैः प्राणैः - स्वजीवैः, गुरुप्राणान् - गुरुजनानां जीवान्, विनिमाय - विनिमयं कृत्वा, अकृतात्मदुरावापं - अजितेन्द्रियैः दुष्प्रापं, ब्रह्मलोकं - ब्रह्मणः लोकं, अवाप्नुहि - प्राप्नुहि।

**सारः -** हे गुरुजनवत्सल! त्वं स्वजीवैः गुरुप्राणान् विनिमाय अजितेन्द्रियैः दुरापं ब्रह्मलोकं प्राप्नुहि।
अम्ब - माता, चिरं - चिरकालं, जीव - जीवतात्, अनुगृहीतोऽस्मि - अनुगृहीतः +अस्मि। दुरवापम् - दुःखेन अवाप्तुं शक्यं दुरवापम्।

**श्लोकः - २२** शुभैः गुणैः - सद्गुणैः, परिष्वक्तः - आलिङ्गितः (त्वं) मां - मा, गाढं परिष्वजस्व - गाढम् आलिङ्गस्व, तव कीर्त्या - ते यशसा, वसुन्धरा - भूमिः, परिष्वक्ता भवति - आलिङ्गिता भविष्यति।

**सारः** - सद्गुणसम्पन्नः त्वं मां आलिङ्गस्व। भवतः यशसा भूमिः आलिङ्गिता भविष्यति।
स्वस्ति - मङ्गलं भविष्यति, ब्रवीमि - वदामि, ब्रूहि - वद।

**द्वितीयः** - एतस्मिन्वनान्तरे जलाशय इव दृश्यते। तत्र मे प्रकल्पितपरलोकस्य पिपासाप्रतीकारं करिष्यामि।
**घटोत्कचः** - दृढव्यवसायिन्! गम्यताम्। अतिक्रामति मातुराहारकालः। शीघ्रमागच्छ।
**द्वितीयः** - भोस्तात! एष गच्छामि।

**(निष्क्रान्तः)**

एहि + एहि - एह्येहि।
**व्याख्या** - वनान्तरे - वनमध्ये, प्रतीकारं - शमनं, प्रकल्पितपरलोकस्य - प्रकल्पितः परलोकः यस्य सः प्रकल्पितपरलोकः, तस्य। पिपासाप्रतीकारं - पातुम् इच्छा पिपासा तस्याः प्रतीकारम्। दृढव्यवसायिन् - हे दृढप्रयत्न!

# Unit - 3
## मध्यमस्य रङ्गप्रवेशः

**वृद्धः** - हा हा परिमुषिताः स्म भोः! परिमुषिताः स्म।

**यस्त्रिश्रृङ्गो मम त्वासीन्मनोज्ञो वंशपर्वतः।**
**स मध्यश्रृङ्गभङ्गेन मनस्तपति मे भृशम्।।२३।।**

हा पुत्रक! कथं गत एव।

**तरुण! तरुणतानुरूपकान्ते!**
**नियमपराध्ययनप्रसक्तबुद्धे!।**
**कथमिव गजराजदन्तभग्न-**
**स्तरुरिव यास्यसि पुष्पितो विनाशम्।।२४।।**

**व्याख्या** - परिमुषिताः - चोरीकृताः।

**श्लोकः - २३** मम - मे, मनोज्ञः - मनोहरः, वंशपर्वतः - कुलपर्वतः, सः - स पर्वतः, त्रिश्रृङ्गः त्रिशिखरयुक्तः, आसीत् - अभवत्, तु - किन्तु, मध्यमश्रृङ्गभङ्गेन - मध्यश्रृङ्गस्य नाशेन, मे मनः - मम चित्तं, भृशं - अधिकं, तपति - दुःखीभवति।

**सारः** - अधिकमनोज्ञः मम कुलपर्वतः त्रिश्रृङ्गः आसीत्। तेषु त्रिश्रृङ्गेषु मध्यमश्रृङ्गनाशेन अर्थात् मध्यमपुत्रस्य नाशेन मम मनः अधिकं तपति। त्रिश्रृङ्गः - त्राणि श्रृङ्गाणि यस्य सः।

**श्लोकः - २४** तरुणतानुरूपकान्ते - युवत्वानुरूपशोभायुक्त! नियमपराध्ययनप्रसक्तबुद्धे -व्रतानुष्ठानवेदाध्ययनेन आर्जितशक्तबुद्धे! हे तरुण! हे युवन्! पुष्पितः - कुसुमितः, गजराजदन्तभग्नः - गजश्रेष्ठस्य दन्तेन भग्नः, तरुः इव - वृक्ष इव, कथं विनश्यसि त्वं - कथं विनाशं प्राप्स्यसि?

**सारः -** यूनत्वानुसारिकान्तियुक्त! व्रतानुष्ठानेन कृतवेदपठनेनार्जितबुद्धे! युवन्! कुसुमितः, ततः गजश्रेष्ठस्य दन्ताभ्यां भग्नः वृक्षः इव कथं विनाशं प्राप्स्यति।

कथमिव - कथम् + इव। तरुरिव - तरुः + इव। भग्नस्तरुः - भग्नः + तरुः।

**घटोत्कचः** - चिरायते खलु ब्राह्मणवटुः। अतिक्रामति मातुराहारकालः। किं नु खलु करिष्ये? भवतु, दृष्टम्। भोः ब्राह्मण! आहूयतां तव पुत्रः।

**वृद्धः** - आः! अतिराक्षसं खलु ते वचनम्।

**घटोत्कचः** - कथं रुष्यति। मर्षयतु भवान् मर्षयतु। अयं मे प्रकृतिदोषः। अथ किं नाम तव पुत्रः।

**वृद्धः** - एतदपि न शक्यं श्रोतुम्।

**घटोत्कचः** - युक्तम्। भोः ब्राह्मणकुमार! किं नाम ते भ्राता?

**प्रथमः** - तपस्वी मध्यमः।

**घटोत्कचः** - मध्यम इति सदृशमस्य। अहमेवाह्वयामि। भो मध्यम! मध्यम! शीघ्रमागच्छ।

(ततः प्रविशति भीमसेनः)

**भीमः** - कस्यायं स्वरः?

**खगशतविरुते विरौति तारं द्रुमगहने दृढसंकटे वनेऽस्मिन्।**
**जनयति च मनोज्वरं स्वरोऽयं बहुसदृशो हि धनञ्जयस्वरस्य।।२५।।**

**घटोत्कचः** - चिरायते खलु ब्राह्मणवटुः। अतिक्रामति मातुराहारकालः। किं नु खलु करिष्ये? भवतु दृष्टम्। उच्चैः शब्दापयामि। भो मध्यम ! शीघ्रमागच्छ।

**व्याख्या** - चिरायते - विलम्बं क्रियते, ब्राह्मणवटुः - ब्राह्मणबालः, अतिक्रामति - अतिगच्छति, आह्वयतां - आह्वानं क्रियतां, रुष्यति - क्रुद्धः भवति, मर्षयतु - क्षमस्व।

**श्लोकः - २५** खगशतविरुते - पक्षिगणकूजने, द्रुमगहने - वृक्षसंकुले, दृढसङ्कटे - सञ्चारदुर्घटे (गमनाशक्ये) अस्मिन् वने - काननेऽस्मिन्, तारं विरौति - उच्चैः शब्दं करोति। धनञ्जयस्वरस्य - अर्जुनशब्दस्य, बहुसदृशः - अधिकसाम्यः, हि, अयं स्वरः - अयं शब्दः, मनोज्वरं - मनोदुःखं, जनयति च - उत्पादयति च।

**सारः** - पक्षिगणकूजने वृक्षसंकुले दुर्घटे अस्मिन् वने स्वरोऽयम् उच्चैः श्रृणोति। अर्जुनस्य शब्दसदृशोऽयं स्वरः मे मनोज्वरं जनयति।
शब्दापयामि - आह्वयामि।

**भीमः** - भोः! को नु खल्वेतस्मिन् वनान्तरे मम व्यायामविघ्नमुत्पाद्य मध्यम मध्यम इति मां शब्दापयति? भवतु, पश्यामि तावत्। (परिक्रम्यावलोक्य सविस्मयम्) अहो दर्शनीयोऽयं पुरुषः। अयं हि।

**सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो**
**बभ्रुभ्रूः श्येननासो द्विरदपतिहनुर्दीप्तविश्लिष्टकेशः।**
**व्योढोरा वज्रमध्यो गजवृषभगतिर्लम्बपीनांसबाहुः**
**सुव्यक्तंराक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः।।२६।।**

**घटोत्कचः** - चिरायते खलु ब्राह्मणवटुः। उच्चैः शब्दापयामि। भो भो मध्यम! शीघ्रमागच्छ। भीमः
- भो! प्रीतोऽस्मि।

**व्याख्या** - खल्वेतस्मिन् - खलु + एतस्मिन्, परिक्रम्यावलोक्य - परिक्रम्य + अवलोक्य। दर्शनीयोऽयम् - दर्शनीयः + अयम्। द्रष्टुं योग्यः दर्शनीयः। वनान्तरे - वनमध्ये।

**श्लोकः - २६** सिंहास्यः - सिंहमुखः, सिंहदंष्ट्रः - सिंहस्य दंष्ट्रा इव दंष्ट्रासहितः, मधुनिभनयनः - मधुसदृशरक्तनयनः, स्निग्धगम्भीरकण्ठः - मधुरगम्भीरस्वरः, बभ्रुभ्रूः - पिङ्गलवर्णयुक्तभ्रूः, श्येननासः - श्येनचञ्चूसदृशनासिकायुक्तः, द्विरदपतिहनुः - गजराजस्य हनुसदृशहनुः, दीर्घविश्लिष्टकेशः - आयतविकीर्णकेशः, व्यूढोराः - विस्तृतोराः, वज्रमध्यः - कठिनमध्यदेशः, गजवृषभगतिः - गजश्रेष्ठगमनः, लम्बपीनांसबाहुः - लम्बस्थूलांसकरः, विपुलबलयुतः - वर्धितबलवीर्यः, लोकवीरस्य - कस्यचित् भुवनवीरस्य, राक्षसीजः - राक्षस्यां जातः पुत्रः इति, सुव्यक्तम् - व्यक्तमेव।

**सारः -** मृगराजमुखः सिंहदंष्ट्रः मधुसदृशनयनः मधुरगम्भीरस्वरः पिङ्गलभ्रूसहितः श्येननासिकः गजराजहनुः आयतविकीर्णकेशः व्युढोराः कठिनमध्यदेशः गजश्रेष्ठगमन लम्बस्थूलांसकरः वर्धितबलवीर्यः, (अयं) कस्यचित् लोकवीरस्य राक्षसीजः पुत्रः इति सुव्यक्तं भवति।

**विग्रहः -** राक्षस्यां जातः राक्षसीजः। लोके वीरः लोकवीरः। सिंहस्य आस्यम् इव आस्यं यस्य सः सिंहास्यः। सिंहस्य दंष्ट्रे इव दंष्ट्रे यस्य सः सिंहदंष्ट्रः। वज्र इव मध्यः यस्य सः वज्रमध्यः। ब्राह्मणवटुः - ब्राह्मणबालः, प्रीतोऽस्मि - प्रीतः अस्मि।

**घटोत्कचः** - न खल्वहं ब्राह्मणवटुः। अहो दर्शनीयोऽयं पुरुषः।
य एषः -

**सिंहाकृतिः कनकतालसमानबाहुः**
**मध्ये तनुर्गरुडपक्षविलिप्तवक्षः।**
**विष्णुर्भवेत् विकसिताम्बुजपत्रनेत्रो**
**नेत्रे ममाहरति बन्धुरिवागतोऽयम्।।**

भो मध्यम! त्वां खल्वहं शब्दापयामि।

**भीमः** - अतः खल्वहं प्राप्तः।

**घटोत्कचः** - किं भवानपि मध्यमः?

**भीमः** - न तावदपरः।

**मध्यमोऽहमवध्यानामुत्सिक्तानां च मध्यमः।**
**मध्यमोऽहं क्षितौ भद्र! भ्रातॄणामपि मध्यमः।।२८।।**

**घटोत्कचः** - भवितव्यम्।

**व्याख्या - श्लोकः - २७** सिंहाकृतिः - सिंहाकारः, कनकतालसमानबाहुः - सुवर्णतालसदृशबाहुः, मध्ये तनुः - कृशमध्यः, गरुडपक्षविलिप्तवक्षः - गरुडस्य पक्ष इव विस्तृतोरः, विकसिताम्बुजपत्रनेत्रः - विकसितकमलदलनयनः, अयं - अयं पुरुषः, विष्णुः भवेत् - नारायणो भवेत्, बन्धुः इव - बन्धुजन इव, आगतः (अयं) - समागतोऽयं, मम नेत्रे - मे नयने, आहरति - आकर्षते।

**सारः** - सिंहाकारः सुवर्णतालवृक्षसदृशकरः कृशमध्यमः गरुडपक्ष इव विस्तृतोरः विकसितकमलदलनयनः अयं नारायणो भवेत्। बन्धुजन इव समागतोऽयं मे नयने आहरति।

**विग्रहः** - सिंह इव आकृतिः यस्य सः सिंहाकृतिः।

विष्णुः + भवेत् - विष्णुर्भवेत् । मम +आहरति - ममाहरति। आगतः + अयम् - आगतोऽयम्। बन्धुः +इव - बन्धुरिव।

प्राप्तः - समीपमागतः। अपरः - अन्यः।

**श्लोकः - २८** हे भद्र! अहम् अवध्यानां - अहं वधानर्हानां, मध्यमः, उत्सिक्तानां च - अहङ्कारिणां च मध्यमः, क्षितौ - भूमौ, मध्यमः, भ्रातॄणामपि - सोदराणामपि मध्यमः।

**सारः -** अहम् अवध्यानां मध्ये मध्यमः। अहङ्कारिणां मध्यमः। मध्यमलोकत्वात् भूमावपि अहं मध्यमः। सोदराणां मध्येऽपि अहं मध्यमः भवामि।

**भीमः** - अपि च,

**मध्यमः पञ्चभूतानां, पार्थिवानां च मध्यमः।**
**भवे च मध्यमो लोके सर्वकार्येषु मध्यमः।।२९।।**

**वृद्धः** - **मध्यमस्त्विति संप्रोक्ते नूनं पाण्डवमध्यमः।**

**अस्मान्मोक्तुमिहायातो दर्पान्मृत्योरिवोत्थितः।।३०।।**

(प्रविश्य)

**मध्यमः** - **अस्यामाचम्य पद्मिन्यां परलोकेषु दुर्लभम्।**
**आत्मनैवात्मनो दत्तं पद्मपत्रोज्वलं जलम्।।३१।।**

(उपगम्य)

भो पुरुष! प्राप्तोऽस्मि।

**घटोत्कचः** - भवानिदानीं खल्वसि मध्यमः। मध्यम! इतः इतः।

**वृद्धः** - (भीमसेनमुपगम्य) भो मध्यम! परित्रायस्व ब्राह्मणकुलम्।

**व्याख्या - श्लोकः - २९** पञ्चभूतानां - पृथिव्यादि पञ्चभूतानां वायुपुत्रः मध्यमः। पार्थिवानां च - राज्ञां (पाण्डवानां) मध्यमः। भवे च - जनने च मध्यमः। लोके सर्वकार्येषु - भुवने अखिलकार्येषु मध्यमः (भवामि)।

**सारः** - पृथिव्यादि पञ्चभूतानां मध्ये वायुपुत्रः इति मध्यमः। राज्ञां पाण्डवानां कुन्तीपुत्राणां युधिष्ठिरभीमार्जुनानां मध्यः इति मध्यमः। भवे मध्यमलोके भूमौ जन्यत्वात् मध्यमः। किमुत लोके सर्वकार्येषु अहं मध्यमः भवामि। मध्यमस्त्विति - मध्यमः + तु + इति

**श्लोकः - ३०** मध्यम इति, संप्रोक्ते - उक्ते, नूनं - निश्चयं, पाण्डवमध्यमः - पाण्डवेषु मध्यमः भीमः, मृत्योः - मरणस्य, दर्पात् - अहङ्कारात्, अस्मान् - अस्मज्जनान्, मोक्तुं - मोचयितुं, आयातः इव - आगतः इव। उत्थितः - आविर्भूतः।

**सारः** - मध्यम इत्युक्ते नूनमयं पाण्डवमध्यमः भीमः मृत्योः अस्मान् रक्षितुम् आगत इति प्रतिभाति।

**श्लोकः - ३१** अस्यां पद्मिन्यां - अस्मिन् पद्माकरे, आचम्य - आचमनं कृत्वा, परलोकेषु - अन्यलोकेषु, दुर्लभं - लब्धुमशक्यं, पद्मपत्रोज्वलं - कमलदले प्रशोभमानं, जलं - पयः, आत्मना एव - स्वयमेव, आत्मने दत्तं - स्वस्मै दत्तम्।

**सारः -** अस्मिन् कमलाकरे आचमनं कृत्वा परलोकेषु अपि लब्धुमशक्यं कमलपत्रोज्वलं जलं स्वयमेव स्वस्मै दत्तम्।

**विग्रहः** - दुःखेन लब्धुं योग्यं दुर्लभम्। आत्मना एव - आत्मनैव। एव + आत्मने - एवात्मने। प्राप्तः +अस्मि - प्राप्तोऽस्मि। उपगम्य - प्राप्य, परित्रायस्व - रक्षस्व। भीमः - न भेतव्यं, न भेतव्यम्। मध्यमोऽहमभिवादये।

**वृद्धः** - वायुरिव दीर्घायुर्भव।

**भीमः** - अनुगृहीतोऽस्मि। कुतो भयमार्यस्य?

**वृद्धः** - श्रूयताम्। अहं खलु कुरुराजेन युधिष्ठिरेणाधिष्ठितपूर्वे कुरुजाङ्गले यूपग्रामवास्तव्यो माठरसगोत्रश्च कल्पशाखाध्वर्युः केशवदासो नाम ब्राह्मणः। तस्य ममोत्तरस्यां

दिशि उद्दामकग्रामवासी मातुलः कौशिकगोत्रो यज्ञबन्धुर्नामास्ति। तस्य पुत्रोपनयनार्थं सकलत्रोऽस्मि प्रस्थितः।

**भीमः** - अरिष्टोऽस्तु पन्थाः। ततस्ततः।

**वृद्धः** - ततो मामेष हि -

**सजलजलदगात्रः पद्मपत्रायताक्षो**
**मृगपतिगतिलीलो राक्षसः प्रोग्रदंष्ट्रः।**
**जगति विगतशङ्कस्त्वद्विधानां समक्षं**
**ससुतपरिजनं भो! हन्तुकामोऽभ्युपैति।।३२।।**

**भीमः** - एवम्। अनेन ब्राह्मणजनस्य मार्गविघ्नः कृतः। भवतु, निग्रहिष्यामि तावदेनम्। भो पुरुष! तिष्ठ! तिष्ठ!

**घटोत्कचः** - एष स्थितोऽस्मि।

**व्याख्या -** भेतव्यं - भयं कुरु, अभिवादये - वन्दे। वायुः +इव - वायुरिव। कुतः - कस्मात्। श्रूयताम् - आकर्ण्यतां। कुरुराजेन - कुरुभूपेन, अधिष्ठितपूर्वे - पूर्वे वसिते, सकलत्रः - जायासहितः। अरिष्टः - दुर्घटः (विपदः), पन्थाः - मार्गः। ततः + ततः - ततस्ततः। तदनन्तरम्।

**श्लोकः - ३२** भो भो पुरुष! सजलजलदगात्रः - सनीरमेघशरीरः, पद्मपत्रायताक्षः - कमलदलदीर्घनयनः, मृगपतिगतिलीलः - सिंहगमनलीलः, प्रोग्रदंष्ट्रः - उग्रदंष्ट्रः, राक्षसः, जगति - लोके, तद्विधानां समक्षं - भवतः सदृशानां पुरतः, विगतशङ्कं - भयरहितं, सपुत्रपरिजनं (मां) - पुत्रकलत्रसहितं (मां), हन्तुकामः - निग्रहीतुमिच्छन्, (अयम्) अभ्युपैति - प्राप्नोति।

**सारः** - भो पुरुष! मेघवर्णशरीरः पद्मदलदीर्घनयनः सिंहगमनशीलः उग्रदंष्ट्रः राक्षसोऽयं लोके भवता सदृशानां पुरतः भयरहितं पुत्रकलत्रसहितं मां निग्रहीतुनिच्छन् प्राप्नोति।

**विग्रहः** - पद्मपत्रायताक्षः पद्मपत्रे इव आयते अक्षिणी यस्य सः।

निग्रहिष्यामि - हनिष्यामि। स्थितोऽस्मि - स्थितः +अस्मि।

**भीमः** - किमर्थं ब्राह्मणजनमपराध्यसि?

**पुत्रनक्षत्रकीर्णस्य पत्नीकान्तप्रभस्य च।**
**वृद्धस्य विप्रचन्द्रस्य भवान् राहुरिवोत्थितः।।३३।।**

**घटोत्कचः** - अथ किं? राहुरेव।

**भीमः** - आः,

**निवृत्तव्यवहारोऽयं सदारस्तनयैः सह।**
**सर्वापराधेऽवध्यत्वान्मुच्यतां द्विजसत्तमः।।३४।।**

**घटोत्कचः** - न मुच्यते।

**भीमः** - (आत्मगतम्) भोः! कस्य पुत्रेणानेन भवितव्यम्?

**भ्रातॄणां मम सर्वेषां कोऽयं भोः गुणतस्करः।**
**दृष्ट्वैतद्बालशौण्डीर्यं सौभद्रस्य स्मराम्यहम्।।३५।।**

(प्रकाशम्)

भोः पुरुष! मुच्यताम्।

**व्याख्या** - अपराध्यसि - अपराधं करोषि।

**श्लोकः - ३३** पुत्रनक्षत्रकीर्णस्य - सुततारकाकीर्णस्य, पत्नीकान्तप्रभस्य - भार्याकान्तप्रकाशस्य, वृद्धस्य - वृद्धावस्थस्य, विप्रचन्द्रस्य - ब्राह्मणचन्द्रस्य, राहुः इव - राहुः इव, भवान् आगतः - भवानत्रागतः।

**सारः -** पुत्रनक्षत्रैरावृतं भार्यया प्रशोभमानं वृद्धं ब्राह्मणचन्द्रं राहुः यथा तारकैरन्वितं चन्द्रं दंशति तथा भवान् पीडयति।

**श्लोकः - ३४** द्विजसत्तमः - ब्राह्मणश्रेष्ठः, सर्वापराधे - अखिलापराधे कृते, अवध्यत्वात् - वधानर्हत्वात्, निवृत्तिव्यवहारः - लोकव्यवहारात् परावृत्तः, सदारः अयं - भार्यासहितः अयं ब्राह्मणः, तनयैः सह - पुत्रैः समं, (त्वया) मुच्यताम् - विमुच्यताम्।

**सारः -** अपराधिनः अपि ब्राह्मणाः अवध्याः। अतः लोकव्यवहारान्निवृत्तं सभार्यं सतनयं एनं ब्राह्मणं मोचय।

पुत्रेणानेन - पुत्रेण + अनेन।

**श्लोकः - ३५** भो - हे, मम सर्वेषां भ्रातॄणां - मे सोदराणां सर्वेषां, गुणतस्करः - गुणचोरः, अयं कः - अयं पुरुषः कः, एतत् बालशौण्डीर्यं दृष्ट्वा - बालकस्य शौर्यादिकं दृष्ट्वा, अहं - भीमः, सौभद्रस्य - सुभद्रातनयस्य अभिमन्योः, शौर्यादिकं स्मरामि।

**सारः** - मम भ्रातॄणां सर्वेषां गुणचोरः अयं कः? अस्य बालस्य वीर्यशौर्यादिकं दृष्ट्वा सौभद्रस्य अभिमन्योः शौर्यादिकं स्मरामि।

**घटोत्कचः** - न मुच्यते।

**मुच्यतामिति विस्रब्धं ब्रवीति यदि मे पिता।**
**न मुच्यते तथा ह्येष गृहीतो मातुराज्ञया।।३६।।**

**भीमः** - (आत्मगतम्) कथं मातुराज्ञेति। अहो गुरुशुश्रूषुः खल्वयं तापस्वी।

**माता किल मनुष्याणां दैवतानां च दैवतम्।**
**मातुराज्ञां पुरस्कृत्य वयमेतां दशां गताः।।३७।।**

(प्रकाशम्) भो पुरुष! प्रष्टव्यं खलु तावदस्ति।

**घटोत्कचः** - ब्रूहि, ब्रूहि शीघ्रम्।

**भीमः** - का नाम भवतो माता?

**घटोत्कचः** - श्रूयताम्। हिडिम्बा नाम राक्षसी,

**कौरव्यकुलदीपेन पाण्डवेन महात्मना।**
**सनाथा या महाभागा पूर्णेन द्यौरिवेन्दुना।।३८।।**

**व्याख्या - श्लोकः - ३६** मुच्यतामिति - मोचनं क्रियतामिति, विस्रब्धं - विश्वासपूर्वकं, यदि मे पिता - यदि मम जनकः, ब्रवीति (तर्हि) - वदति तर्हि, न मुच्यते - न मोचयिष्ये, तथा हि - एवमपि, मातुः आज्ञया - जनन्याः आज्ञानुसारेण, एषः - अयं ब्राह्मणः, मया गृहीतः - मया स्वीकृतः।

**सारः -** एनं मुच्यतामिति मम पित्रा आज्ञप्तोऽपि अहं न मोचयामि। यतः मम जनन्याः आज्ञया अयं गृहीतः।
ह्येषः - हि + एषः। मातुराज्ञेति - मातुः + आज्ञा + इति।

**श्लोकः - ३७** मनुष्याणां - मानवानां, माता किल - जनयित्री खलु, देवतानां - सुराणां, दैवतं - देवः, वयं च - वयं जनाः, मातुराज्ञां - जनन्याः निर्देशं, पुरस्कृत्य - अनुसृत्य, एव - एव, एतां दशां गताः - इमामवस्थां प्राप्ताः।

**सारः** - मनुष्याणां कृते माता दैवानां देवः भवति। अतः मातुराज्ञामनुसृत्य वयं एतामवस्थां प्राप्ताः।
ब्रूहि - वद। शीघ्रं - सत्वरम्।

**श्लोकः - ३८** पूर्णेन इन्दुना - पूर्णचन्द्रेण, द्यौः इव - आकाशमिव, कौरव्यकुलदीपेन - कौरववंशप्रदीपेन, महात्मना - महता, पाण्डवेन - पाण्डवेन, या सनाथा - या भर्तृमती, (सा) महाभागा - महती हिडिम्बा मे माता।

**सारः** - यथा पूर्णचन्द्रेण आकाशं सनाथं तथा कौरवकुलदीपेन महात्मना पाण्डवेन या सनाथा सा महाभागा मे माता हिडिम्बी नाम।
**विग्रहः** - सनाथा - नाथेन सह वर्तते इति सनाथा।

**भीमः** - (सहर्षम् आत्मगतम्) एवं हिडिम्बायाः पुत्रोऽयम्। सदृशो ह्यस्य गर्वः।

**रूपं सत्त्वं बलं चैव पितृभिः सदृशं बहु।**
**प्रजासु वीतकारुण्यं मनश्चैवास्य कीदृशम्।।३९।।**

(प्रकाशम्) भोः पुरुष! मुच्यताम्।

**घटोत्कचः** - न मुच्यते।

**भीमः** - भो ब्राह्मण! गृह्यतां तव पुत्रः। वयमेनमनुगमिष्यामः।

**द्वितीयः** - मा मा भवानेवम्।

**त्यक्ताः प्रागेव मे प्राणाः गुरुप्राणेष्वपेक्षया।**
**युवा रूपगुणोपेतो भवांस्तिष्ठतु भूतले।।४०।।**

**भीमः** - आर्य ! मा मैवम्। क्षत्रियकुलोत्पन्नोऽहम्। पूज्यतमाः खलु ब्राह्मणाः। तस्मान्मच्छरीरेण ब्राह्मणशरीरं विनिमातुमिच्छामि।

**घटोत्कचः** - एवं क्षत्रियोऽयं, तेनास्य दर्पः। भवतु, इममेव गृहीत्वा (हत्वा) नेष्यामि। अथ केनायं वारितः ?

**व्याख्या - श्लोकः - ३९** पुत्रोऽयम् - पुत्रः + अयम्। ह्यस्य - हि + अस्य। सदृशः - समः, गर्वः - अहङ्कारः। अस्य - घटोत्कचस्य, रूपं - सौन्दर्यं, सत्त्वं - धैर्यं, बलं च - शक्तिः च, बहु सदृश एव - अस्मत्तुल्य एव, प्रजासु - जनेषु, वीतकारुण्यं - निर्गतकारुण्यं, मनः - चित्तं, कीदृशम् - कथं भूतम्?

**सारः -** अस्य सौन्दर्यं, धैर्यं, बलं च अस्मत्सदृश एव। किन्तु प्रजासु अस्य निर्दयत्वं मनः कथं सम्भूतम्? चैव - च + एव। एवास्य - एव + अस्य। गृह्यतां - स्वीकुरु। अनुगमिष्यामः - अनुचलिष्यामः।

**श्लोकः - ४०** गुरुप्राणेषु - पितृप्राणेषु, अपेक्षया - अपेक्षया, मे प्राणाः - मम जीवाः, प्राक् एव - पूर्वमेव, त्यक्ताः - उपेक्षिताः। युवा - तरुणः, रूपगुणोपेतः - सौन्दर्यसौशील्यादिगुणयुक्तः, भवान् - भवान्, भूतले - भूमौ, तिष्ठतु - स्थितिं कुरु।

**सारः** - गुरूणां प्राणरक्षणाय मे जीवः पूर्वमेव त्यक्तः। तरुणः सौन्दर्यसौशील्यादिगुणयुक्तः भवान् भूतले तिष्ठतु। प्राणेष्वपेक्षया - प्राणेषु + अपेक्षया। भवांस्तिष्ठतु - भवान् + तिष्ठतु। मैवम् - मा + एवम्। क्षत्रियकुलोत्पन्नोऽहम् - क्षत्रियकुलोत्पन्नः + अहम्। तस्मान्मच्छरीरेण - तस्मात् + मत् + शरीरेण। क्षत्रियोऽयम् - क्षत्रियः + अयम्। तेनास्य - तेन + अस्य। केनायम् - केन + अयम्। शक्तिरस्ति - शक्तिः + अस्ति। वारितः - निवारितः।

**भीमः** - मया।
**घटोत्कचः** - किं त्वया ?
**भीमः** - अथ किम्?
**घटोत्कचः** - तेन हि भवानेवागच्छतु।
**भीमः** - एवमतिवीर्यबलं नानुगच्छामि। यदि ते शक्तिरस्ति, बलात्कारेण मां नय।
**घटोत्कचः** - किं मां प्रत्यभिजानीते भवान्?
**भीमः** - मत्पुत्र इति जाने।
**घटोत्कचः** - कथं कथं तव पुत्रोऽहम्?
**भीमः** - कथं रुष्यति। मर्षयतु भवान्। सर्वाः प्रजाः क्षत्रियाणां पुत्रशब्देनाभिधीयन्ते। अत एव मयाभिहितम्।
**घटोत्कचः** - भीतानामायुधं गृहीतम्।
**भीमः** - **शपामि सत्येन भयं न जाने ज्ञातुं तदिच्छामि भवत्समीपे।**
**किं रूपमेतद्वद भद्र तस्य गुणागुणज्ञः सदृशं प्रपत्स्ये।।४१।।**
**घटोत्कचः** - एष ते भयमुपदिशामि। गृह्यतामायुधम्।

**भीमः** - आयुधमिति। गृहीतमेतत्।

**घटोत्कचः** - कथमिव?

**भीमः** - **काञ्चनस्तम्भसदृशो रिपूणां निग्रहे रतः।**
**अयं तु दक्षिणो बाहुरायुधं सहजं मम।।४२।।**

**व्याख्या -** प्रत्यभिजानीते - अवगम्यते।रुष्यति - क्रुध्यति। मर्षयतु - क्षमस्व। सर्वाः - अखिलाः। अभिधीयन्ते - कथ्यन्ते। अभिहितम् - उक्तम्।

**श्लोकः - ४१** शपामि - सत्यं करोमि (शपथं करोमि), सत्येन भयं न जाने - अहं सत्येन भीतिं न जानामि, भवत्समीपे - भवतः समीपे, तत् ज्ञातुं - तत् भीतिं ज्ञातुं, इच्छामि - अभिलषामि। भद्र! एतत् - इदं, किं रूपं वद - किं रूपमिति वदतु, तस्य गुणागुणज्ञः - तस्य गुणदोषं ज्ञात्वा, सदृशं - युक्तं, प्रपत्स्ये - प्रवृत्तिं करिष्ये।

**सारः -** अहं शपामि यथार्थतः भयं न जानामि। भवतः समीपे तद् ज्ञातुमहम् इच्छामि। कीदृशं तस्य रूपं, गुणदोषं च विविच्य युक्तं कर्तुम् इच्छामि।

**श्लोकः - ४२** काञ्चनस्तम्भसदृशः - सुवर्णस्थाणुतुल्यः, रिपूणां - शत्रूणां, निग्रहे - नाशे, रतः - तत्परः, अयं दक्षिणः बाहुः - अयं वामेतरः करः, मम सहजं - मे सहजातं, आयुधं - शस्त्रं, भवति।

**सारः** - सुवर्णस्तम्भतुल्यः शत्रुनिग्रहे तत्परः अयं दक्षिणः करः मे सहजमायुधं भवति।

**घटोत्कचः** - इदमुपपन्नं पितुर्मे भीमसेनस्य।

**भीमः** - अथ कोऽयं भीमो नाम?

**विश्वकर्ता शिवः कृष्णः शक्रः शक्तिधरो यमः।**
**एतेषु कथ्यतां भद्र केन ते सदृशः पिता।।४३।।**

**घटोत्कचः** - सर्वैः।

**भीमः** - धिगनृतमेतत्।

**घटोत्कचः** - कथं कथमनृतमित्याह। क्षिपसि मे गुरुम्। भवतु, इमं स्थूलं वृक्षमुत्पाट्य प्रहरामि।
(उत्पाट्य प्रहरति)
कथमनेनापि शक्यते हन्तुम्। किं नु खलु करिष्ये। भवतु, दृष्टम्। एतत् गिरिकूटमुत्पाट्य प्रहरामि।

**भीमः** - **शैलकूटं मया क्षिप्तं प्राणानादाय यास्यति।**
**रुष्टोऽपि कुञ्जरो वन्यो न व्याघ्रं घर्षयेद्वने।।४४।।**

**व्याख्या** - उपपन्नं - युक्तम्।

**श्लोकः - ४३** विश्वकर्ता - ब्रह्मा, शिवः - परमेश्वरः, कृष्णः - नन्दगोपकुमारः, शक्रः - देवेन्द्रः, शक्तिधरः - कुमारः, यमः - यमदेवः, एतेषु - एतेषु देवेषु, केन सदृशः - केन तुल्यः, ते पिता - तव जनकः, हे भद्र! कथ्यतां - वदताम्।

**सारः** - हे भद्र! ब्रह्मा शिवः कृष्णः इन्द्रः कुमारः यमः एतेषु केन तुल्यः भवतः पिता इति कथ्यताम्।

धिक् - कष्टम्। अनृतम् - असत्यम्। अनृतमित्याह - अनृतम् + इति +आह। क्षिपसि - आक्षिपसि। उत्पाट्य - उत्पाटनं कृत्वा, प्रहरामि - ताडयामि, गिरिकूटं - पर्वतशिखरम्।

**श्लोकः - ४४** मया क्षिप्तं - मया प्रक्षिप्तं, शैलकूटं - पर्वतशिखरं, प्राणानादाय - तव प्राणान् गृहीत्वा, यास्यति - गमिष्यति। रुष्टः अपि - कोपिष्टः अपि, वन्यः कुञ्जरः - वन्यो गजः, वने - कानने, व्याघ्रं न घर्षयेत् - शार्दूलं न आक्रमिष्येत्।

**सारः** - मया क्षिप्तं पर्वतशिखरं तव प्राणान् गृहीत्वा गमिष्यति। कोपिष्टोऽपि शार्दूलः वने शार्दूलं न घर्षयेत्।

**घटोत्कचः** - (प्रहृत्य) कथमनेनापि न शक्यते हन्तुम्?
किं नु खलु करिष्ये। भवतु दृष्टम्।

**नन्वहं भीमसेनस्य पुत्रः पौत्रो नभस्वतः।**
**तिष्ठेदानीं सुसन्नद्धो नियुद्धे नास्ति मत्समः।।४५।।**

(इत्युभे नियुद्धं कुरुतः)

**घटोत्कचः** - (भीमसेनं बद्ध्वा)

**व्रजसि कथमिह त्वं वीर्यमुल्लङ्घ्य बाहोः।**
**गज इव दृढपाशैः पीडीतो मद्भुजाभ्याम्।।४६।।**

**भीमः** - (आत्मगतम्) कथं गृहीतोऽस्म्यनेन। भोः सुयोधन! वर्धते ते शत्रुपक्षः
कृतरक्षो भव। (प्रकाशम्) भोः पुरुष, अवहितो भव।

**घटोत्कचः** - अवहितोऽस्मि।

**व्याख्या -** शक्यते - साध्यते। हन्तुं - हननं कर्तुम्।

**श्लोकः - ४५** अहं भीमसेनस्य पुत्रः - अहं पाण्डवमध्यमस्य तनयः, नभस्वतः पौत्रः - वायोः पौत्रः, (पुत्रस्य पुत्रः पौत्रः) ननु इदानीं - ननु अधुना, सुसन्नद्धः तिष्ठ - सुसज्जः तिष्ठतु, नियुद्धे - द्वन्द्वयुद्धे, मत्समः - मम सदृशः, नास्ति - न भवति।

**सारः** - अहं पाण्डवमध्यमस्य भीमसेनस्य पुत्रः, वायोः पौत्रश्च भवामि। अधुना भवान् सुसज्जो भवतु। द्वन्द्वयुद्धे मादृशः नास्त्येव।

इत्युभे - इति + उभे, उभे - उभौ।

**श्लोकः - ४६** इह - अत्र, त्वं - भीमः, मद्भुजाभ्यां - मम बाहुभ्यां, पीडितः - बन्धितः, दृढपाशैः - दृढरज्जुभिः, (पीडितः) गजः इव - वारण इव, (मम) बाहोः - भुजयोः, वीर्यमुल्लङ्घ्य - शक्तिम् अनतिक्रम्य, कथं - केन प्रकारेण, व्रजसि - गच्छसि।

**सारः** - हे भीम! त्वम् अत्र मम बाहुभ्यां बद्धः असि। यथा दृढपाशैः बद्धः गजः तथा। मम भुजयोः वीर्यमुल्लङ्घ्य कथं व्रजसि?

गृहीतोऽस्म्यनेन - गृहीतः + अस्मि + अनेन। सुयोधन! - दुर्योधन!, अवहितः - दत्तश्रद्धः, भव - भवतु, अवहितोऽस्मि - अवहितः + अस्मि। सुखेन योद्धुं शक्यः सुयोधनः। दुःखेन योद्धुं शक्यः दुर्योधनः।

**भीमः** - (नियुद्धबन्धमवधूय)

**व्यपनय बलदर्पं दृष्टसारोऽसि वीर।**
**न हि मम परिखेदो विद्यते बाहुयुद्धे।।४७।।**

**घटोत्कचः** - कथमनेनापि न शक्यते हन्तुम्। किं नु खलु करिष्ये? भवतु, दृष्टम्। अस्ति मातृप्रसादलब्धो मायापाशः। तेन बध्वैनं नेष्यमि। कुतः खल्वापः। भोः गिरे! आपस्तावत्। हन्त! स्रवति। (आचम्य मन्त्रं जपति) भो पुरुष!

**मायापाशेन बद्धस्त्वं विवशोऽनुगमिष्यसि।**
**राजसे रज्जुभिर्बद्धः शक्रध्वज इवोत्सवे।।४८।।**

(इति मायया बध्नाति)

**भीमः** - कथं मायापाशेन बन्धितोऽस्मि। किमिदानीं करिष्ये? भवतु दृष्टम्। अस्ति मे महेश्वरप्रसादलब्धो मायापाशमोक्षो मन्त्रः। तं जपामि। कुतः खल्वापः। भो ब्राह्मणकुमार! आनय कमण्डलुगता आपः।

**वृद्धः** - इमा आपः। (भीमः आदाय आचम्य मन्त्रं जप्त्वा मायामपनयति)

**घटोत्कचः** - अये पतितः पाशः। किमिदानीं करिष्ये? भवतु, दृष्टम्। भोः पुरुष! पूर्वसमयं स्मर।

**व्याख्या -** अवधूय - तिरस्कृत्य।

**श्लोकः - ४७** हे वीर! - हे धीर!, बलदर्पं - शक्तः इति अहङ्कारं, व्यपनय - दूरीकरोतु। त्वं - भवान्, दृष्टसारः - दृष्टबलवान्, असि - भवसि। हि - यतः, बाहुयुद्धे - द्वन्द्वयुद्धे, मम - मे, परिखेदः - परिक्षीणः, न विद्यते - नास्ति।

**सारः** - हे वीर ! भवान् शक्तः इति गर्वम् अपनय। त्वं दृष्टबलवान् भवसि। किन्तु द्वन्द्वयुद्धे मे स्वल्पोऽपि खेदो नास्ति। बध्वैनं - बध्वा + एनम्। खल्वापः - खलु + आपः। आपः - जलम्। स्रवति - वमति।

**श्लोकः - ४८** मायापाशेन - मायारज्जुना, बद्धः - निबद्धः, (बन्धितः) विवशः - क्षीणितः, त्वं - भवान्, न गमिष्यसि - न यास्यसि। उत्सवे - महोत्सवावसरे, रज्जुभिः - पाशैः, बद्धः - बन्धितः, शक्रध्वजः - इन्द्रध्वजः, इव - इव, राजसे - शोभसे।

**सारः** - मायापाशेन बन्धितः त्वं परिक्षीणः अभवः। अतः गन्तुं न शक्यसे। उत्सवे पाशैः बन्धितः इन्द्रध्वजः इव त्वं शेभसे। आदाय - गृहीत्वा।

**भीमः** - समयमिति ? एषः स्मरामि। गच्छाग्रतः।

(उभौ परिक्रमतः)

# Unit - 4

## भीम-हिडिम्बीसमागमः

**वृद्धः** - पुत्रका ! किं कुर्मः ? अयं गच्छति वृकोदरः।

**आक्रम्य राक्षसमिमं ज्वलदुग्ररूपं**
**उग्रेण बाहुबलवीर्यगुणेन युक्तम्।**
**एष प्रयाति शनकैरवधूय शीघ्र-**
**मासारवर्षमिव गोवृषभ सलीलम्।।४९।।**

**घटोत्कचः** - इह तिष्ठ ! त्वदागमनमम्बायै निवेदयामि।

**भीमः** - बाढं गच्छ।

**घटोत्कचः** - (उपसृत्य) अम्ब ! अयमभिवादये। चिराभिलाषितो भवत्या आहारार्थमानीतो मानुषः।

(प्रविश्य)

**हिडिम्बा** - जात ! चिरं जीव।

**घटोत्कचः** - अनुगृहीतोऽस्मि।

**हिडिम्बा** - जात ! कीदृशो मानुषः आनीतः ?

**घटोत्कचः** - भवति ! रूपमात्रेण मानुषः न वीर्येण।

**हिडिम्बा** - किं ब्राह्मणः ?

**घटोत्कचः** - न ब्राह्मणः।

**व्याख्या** - परिक्रमतः - इतस्ततः चलतः, वृकोदरः - भीमः, समयः - सत्यं (शपथं)

**श्लोकः - ४९** ज्वलदुग्ररूपं - जाज्वल्यमानभीकररूपिणं, उग्रेण - भयङ्करेण, बाहुबलवीर्यगुणेन युक्तम् - करबलवीर्येण युक्तम्। इमं राक्षसं - इमं भीकरं राक्षसं, आक्रम्य - आक्रमणं कृत्वा, आसारवर्षं - अनवरतवर्षं, शीघ्रं - झटिति, अवधूय - कम्पनेन तिरस्कृत्य, गोवृषभ इव - वृषभश्रेष्ठ इव, एषः - भीमसेनः, सलीलं - लीलया, शनैः - मन्दं, प्रयाति - गच्छति।

**सारः** - जाज्वल्यमानं उग्ररूपिणं राक्षसम् उग्रेण करबलेन आक्रम्य आसारवर्षं झटिति कम्पनेन तिरस्कृत्य गच्छन् वृषभश्रेष्ठ इव भीमः लीलया मन्दं गच्छति।
अम्बायै निवेदयामि - निपूर्वक विद् धातोः योगे अम्बायै इति चतुर्थी। अभिवादये - अभिवाद्यं करोमि। जात! - पुत्र!

**हिडिम्बा** - अथवा स्थविरः?
**घटोत्कचः** - न वृद्धः।
**हिडिम्बा** - किं बालः?
**घटोत्कचः** - न बालः।
**हिडिम्बा** - यद्येवं पश्यामि तावदेनम्।
(उभौ परिक्रामतः)
**हिडिम्बा** - किमेष मानुष आनीतः?
**घटोत्कचः** - अम्ब! कोऽयम्?
**हिडिम्बा** - उन्मत्तक! दैवतं खल्वस्माकम्।
**घटोत्कचः** - आः! कस्य दैवतम्?
**हिडिम्बा** - तव च मम च।
**घटोत्कचः** - कः प्रत्ययः?
**हिडिम्बा** - अयं प्रत्ययः। जयत्वार्यपुत्रः।
**भीमः** - (विलोक्य) का पुनरियम्? अये देवी हिडिम्बा!

**अस्माकं भ्रष्टराज्यानां भ्रमतां गहने वने।**
**जातकारुण्यया देवि सन्तापो नाशितस्त्वया।।५०।।**

हिडिम्बे! किमिदम्?
**हिडिम्बा** - (कर्णे) आर्यपुत्र! ईदृशमिव।
**भीमः** - जात्या राक्षसी न समुदाचारेण।
**हिडिम्बा** - उन्मत्तक! अभिवादय पितरम्।

**व्याख्या** - स्थविरः - वृद्धः। यद्येवम् - यदि + एवम्। अम्ब - मात, कोऽयम् - कः + अयम्। प्रत्ययः - विश्वासः, उन्मत्तक - विभ्रान्तक, विलोक्य - दृष्ट्वा, पुनरियम् - पुनः +इयम्।

**श्लोकः ५०** हे देवि ! - हे देवते !, भ्रष्टराज्यानां - नष्टराज्यानां, गहने वने - भीकरे कानने, भ्रमतां - सञ्चरतां, अस्माकं - अस्मज्जनानां, जातकारुण्यया - दयाशीलया, त्वया - भवत्या, सन्तापः - दुःखः, नाशितः - विनाशितः।

**सारः** - हे देवि ! नष्टराज्यानां वने भ्रमताम् अस्माकं सन्तापः जातकारुण्यया भवत्या विनाशितः खलु।
**विग्रहः** - जातकारुण्यया - जातं कारुण्यं यस्याः सा जातकारुण्या, तया।

**घटोत्कचः** - भोस्तात ! अहं धार्तराष्ट्रवनदवाग्निः घटोत्कचोऽभिवादये। पुत्रचापलं क्षन्तुमर्हसि।
**भीमः** - एह्येहि पुत्र ! व्यतिक्रमकृतं कान्तमेव।
(इति परिष्वज्य)
अयं स धार्तराष्ट्रवनदवाग्निः। पुत्रापेक्षीणि खलु पितृहृदयानि। पुत्र ! अतिबलपराक्रमो भव।
**घटोत्कचः** - अनुगृहीतोऽस्मि।
**वृद्धः** - एवं भीमसेनपुत्रोऽयं घटोत्कचः।
**भीमः** - पुत्र ! अभिवादयात्रभवन्तं केशवदासम्।
**घटोत्कचः** - भगवन् अभिवादये।
**वृद्धः** - पितृसदृशगुणकीर्तिर्भव।
**घटोत्कचः** - अनुगृहीतोऽस्मि।
**वृद्धः** - भो वृकोदर ! रक्षितमस्मत्कुलं, स्वकुलमुद्धृतं च। गच्छामस्तावत्।
**भीमः** - **अनुग्रहात्तु भवतः सर्वमासादितं शुभम्।**
**आश्रमोऽदूरतोऽस्माकं तत्र विश्रम्य गम्यताम्।।५१।।**
**वृद्धः** - कृतमातिथ्यमनेन जीवितप्रदानेन। तस्मात् गच्छामस्तावत्।
**भीमः** - गच्छतु भवान् सकुटुम्बः पुनर्दर्शनाय।
**वृद्धः** - बाढम्। प्रथमः कल्पः।
(सपुत्रत्रयकलत्रो निष्क्रान्तः केशवदासः)

**व्याख्या** - भोस्तात - भोः + तात, दवाग्निः - वनाग्निः, एहि + एहि - एह्येहि, व्यतिक्रमं - विपरीतं, कान्तं - सुन्दरं, परिष्वजस्व - आलिङ्गय, समुदाचारेण - सदाचारेण, पितृसदृशं - पितृतुल्यम्।

**श्लोकः - ५१** भवतः अनुग्रहात् - भवतः अनुग्रहात्, सर्वं - सर्वं कार्यं, शुभं - मङ्गलं, आसादितं - प्राप्तं, तु - किन्तु, अस्माकं - नः, आश्रमः - तपोवनं, अदूरतः - समीपे, तत्र - आश्रमे, विश्रम्य - विश्रमं कृत्वा, गम्यताम् - गच्छताम्।

**सारः** - भवतः अनुग्रहात् सर्वं शुभं जातम्। नः आश्रमः समीपे वर्तते। तत्र विश्रम्य गच्छताम्।

**भीमः** - हिडिम्बे ! इतस्तावत्। वत्स घटोत्कच ! इतस्तावत् तत्र भवन्तं केशवदासम् आश्रमपदद्वारमात्रमपि संभावयिष्यामः।

**यथा नदीनां प्रभवः समुद्रो**
**यथाहुतीनां प्रभवो हुताशनः।**
**यथेन्द्रियाणां प्रभवं मनोऽपि**
**तथा प्रभुर्नो भगवानुपेन्द्रः।।५२।।**

(निष्क्रान्ताः सर्वे)

मध्यमव्यायोगोऽवसितः।

**व्याख्या** - इतस्तचावत् - इतः + तावत्।

**श्लोकः - ५२** यथा - येन प्रकारेण, नदीनां - सरितः, प्रभवः, समुद्रः - सागरः, यथा, आहुतीनां - होमद्रव्याणां, प्रभवः - उत्पत्तिस्थानं, हुताशः - अग्निः, यथा, इन्द्रियाणां - पञ्चेन्द्रियाणां प्रभवः, मनः - चित्तं, तथा नः - अस्माकं, भगवान्, उपेन्द्रः - विष्णुः, प्रभुः - स्वामी। यथाहुतीनाम् - यथा आहुतीनाम्। यथेन्द्रियाणाम् - यथा + इन्द्रियाणाम्।

**सारः** - यथा नदीनां प्रभवः समुद्रः, यथा होमद्रव्याणां प्रभवः अग्निः, यथा पञ्चेन्द्रियाणां स्वामिनः मनः तथा अस्माकं प्रभुः भगवान् विष्णुः भवति।

निष्क्रान्ताः - निर्गताः।

**विग्रहवाक्यानि।**

१. मध्यमव्यायोगः - मध्यमौ अधिकृत्य कृतः व्यायोगः मध्यमव्यायोगः।
२. त्रिभुवनक्रमणे - त्रयाणां भुवनानां समाहारः त्रिभुवनम्, तस्य क्रमणे।
३. अम्बरसागरस्य - अम्बरम् एव सागरः अम्बरसागरः, तस्य।
४. निर्विशङ्केन - निर्गता शङ्का यस्य सः निर्विशङ्कः, तेन।
५. पापचेतसा - पापं चेतः यस्य सः, तेन।
६. सदारः - दारैः सह वर्तते इति।
७. निशिचरानुचरः - निशि चरति इति निशिचरः, तस्य अनुचरः।
८. व्याघ्रानुचारचकितः - व्याघ्रस्य अनुचारेण चकितः।
९. सधेनुः - धेन्वा सह वर्तते इति।
१०. संतन्त्रवत्सकः - संतन्त्रो वत्सकः यस्य सः।
११. पीतकौशेयवसनः - पीतं कौशेयं वासः यस्य सः।
१२. तिमिरनिवहवर्णः - तिमिरस्य निवहः तिमिरनिवहः, तस्य वर्ण इव वर्णो यस्य सः।
१३. जलगर्भः - जलं गर्भे यस्य सः।
१४. मनस्विनः - प्रशस्तं मनः येषां ते।
१५. अवरुद्धदिक्पथम् - अवरुद्धाः दिशां पन्थानः यस्मिन् तत्।
१६. युद्धप्रियाः - युद्धं प्रियं येषां ते।

१७. शरणागतवत्सलाः - शरणाय आगताः शरणागताः, तेषु वत्सलाः।
१८. शीलगुणान्वितम् - शीलेन गुणैः च अन्वितः, तम्।
१९. पुरुषादः - पुरुषम् अत्तीति।
२०. ब्रह्मवादिनः - ब्रह्म वेदं वदन्तीति ब्रह्मवादिनः।
२१. व्यूढोराः - व्यूढम् उरः यस्य सः व्यूढोराः।
२२. वज्रमध्यः - वज्रं इव (कठिनम्) मध्यः यस्य सः।
२३. गजवृषभगतिः - गजश्च वृषभश्च गजवृषभौ। तयोरिव गतिः यस्य सः।
अथवा
गजानां वृषभः (श्रेष्ठः) तस्येव गतिः यस्य सः।
२४. पद्मिनी - पद्मानि अस्यां सन्ति इति।
२५. सौभद्रस्य - सुभद्रायाः अपत्यं पुमान् सौभद्रः, तस्य।
२६. ग्रहयुगलनिभाक्षः - ग्रहस्य युगलं ग्रहयुगलं, तस्य निभे अक्षिणी यस्य सः।
२७. मृगेन्द्रः - मृगाणाम् इन्द्रः।
२८. राक्षसाग्निः - राक्षस एव अग्निः।
२९. पित्रोः - माता च पिता च पितरौ, तयोः।
३०. अतिवीर्यबलम् - अतिशयेन वीर्यबले यस्य तम्।
३१. ज्वलदुग्ररूपम् - ज्वलत् उग्रं रूपं यस्य सः ज्वलदुग्ररूपः, तम्।
३२. समक्षम् - अक्ष्णोः समीपम्।
३३. कृतकृत्यम् - कृतं कृत्यं येन तम्।
३४. नीलजीमूतवर्णः - नीलश्चासौ जीमूतः च नीलजीमूतः, तस्य वर्णः यस्य सः।
३५. वन्यम् - वने भवं वन्यम्।

**व्याकरणकार्याणि।**

१. अवरुद्धदिक्पथम् - नकारान्तो पथिन् शब्दः समासान्ते अकारान्तवत् रूपम्।
२. विज्ञातम् - 'वि' इत्युपसर्गपूर्वक ज्ञाधातोः 'क्त' प्रत्ययान्तं रूपम्।
३. अलं परिश्रमेण - 'अलम्' इत्यव्ययस्य योगे परिश्रमेण इति निषेधार्थे तृतीयाविभक्तिः।
४. सौभद्रस्य स्मरामि - अत्र सौभद्रस्य गुणविशेषान् स्मरामि। अतः सौभद्रस्य इति, न सौभद्रं स्मरामि।
५. पिङ्गलायताक्षः - नकारान्तो अक्षिन् शब्दः समासान्ते अकारान्तवत्।
६. हन्तुकामः - हन्तुं कामो यस्य सः। कामं, मनः शब्दयोः पूर्वं यत् तुमुन्नन्तं तस्यानुस्वारस्य लोपः।
७. कुरुराजेन - कुरूणां राजा कुरुराजः, तेन। नकारान्तस्य राजन् शब्दस्य समासान्ते अकारान्तवत् रूपम्।
८. महात्मना - महान् चासौ आत्मा च महात्मा, तेन।

तकारान्तस्य महत् शब्दस्य आत्वं - महात्मना।

## घटोत्कचस्य स्वभावं चित्रीकुरुत।

महाकवेः भासस्य त्रयोदशनाटकेषु अन्यतमो भवति मध्यमव्यायोगः। दशरूपकेषु व्यायोगप्रकारस्य उत्तमोदाहरणं भवति मध्यमव्यायोगः।

उक्तं च नाट्यशास्त्रे व्यायोगलक्षणमेवम्-

व्यायोगस्तु विविधैः कार्यः प्रख्यातनायकशरीरः।
अल्पस्त्रीजनयुक्तस्त्वेकाहकृतस्तथा चैव।।
बहवश्च तत्र पुरुषाः व्यायच्छन्ते यथा समवकारे।
न च दिव्यनायककृतः कार्यो राजर्षिनायकनिबन्धः।।
युद्धनियुद्धघर्षणसंघर्षकृतश्च कर्तव्यः।
एवं विधास्तु कार्यो व्यायोगो दीप्तकाव्यरसयोनिः।। इति।

व्यायोगे इतिहासप्रयुक्तं कथावस्तु स्यात्। दिव्यपुरुषः राजर्षिः वा नायको भवेत्। अल्पस्त्रीजनयुक्तः स्यात्। एकाङ्कः, एकाहकृतघटनाधारः च। अस्मिन् युद्धनियुद्धसंघर्षादयः भवेयुः। रौद्रवीराद्भुतकरुणभयानकादयः रसाः भवेयुः। एवमादिलक्षणयुक्तो भवति मध्यमव्यायोगः।

## घटोत्कचः।

भीमसेनस्य हिडिम्बायां जातः पुत्रः भवति घटोत्कचः। दर्शने सः राक्षसः सूर्यचन्द्रसदृशनयनः, पीनविस्तीर्णवक्षाः, सुवर्णकपिलकेशः, पीतकौशेयवासः, तमोनिवहवर्णः, लीयमानेन्दुलेखः नूतनजलद इव आसीत्। तथापि सः रूपगुणान्वितः गभीरस्वभावयुक्तः इति ब्राह्मणपुरुषाणां संभाषणद्वारा अस्मान् बोधयति भासः। ब्राह्मणाः भूमौ सर्वत्र पूजनीयाः, ते अवध्याः इत्यादि धार्मिकचिन्तावान् च सः घटोत्कचः। किन्तु मातुः आज्ञापरिपालनं पुत्रधर्म इति विचिन्त्य सः ब्राह्मणजनपीडनम् इति हीनकर्ममपि कर्तुं नियुक्तः अभवत्। उक्तं च -

जानामि सर्वत्र सदा च नाम
द्विजोत्तमाः पूज्यतमाः पृथिव्याम्।
अकार्यमेतच्च मयाद्य कार्यं
मातुर्नियोगादपनीय शङ्कम्।। इति।

भीमसेनेन सह द्वन्द्वयुद्धे प्रारब्धे 'नन्वहं भीमसेनस्य पुत्रः, नभस्वतः पौत्रः' इति अस्य वचनं तस्य कुलीनत्वं पौरुषं च सूचयति। एवं स घटोत्कचः गुरुशुश्रूषुः, धर्मिष्ठः, मातृभक्तः, स्नेहयुक्तः, आज्ञापरिपालनतत्परः इति वक्तुं शक्यते।

## भीमसेनः।

पाण्डवमध्यमः भीमः कारुणिकः, शरणागतेषु वत्सलः, तेषां संरक्षकः चासीत्। दीनेषु सः पक्षपतितश्चाभवत्। पाण्डवाश्रमः नातिदूरमिति ज्ञत्वा राक्षसात्भीतो ब्राह्मणः आश्वसति। उक्तं च केशवदासेन-

युद्धप्रियाश्च शरणागतवत्सलाश्च
दीनेषु पक्षपतिताः कृतसाहसाश्च।
एवं विधप्रतिभयाकृतिचेष्टितानां
दण्डं यथार्हमिह धारयितुं समर्थाः।। इति।

शतकुम्भं नाम यज्ञमनुभवितुं पाण्डवाः गताः। आश्रमपरिपालनार्थं भीमः अत्र स्थापितः इति श्रुत्वा वृद्धब्राह्मणः एवमभिप्रैति - 'यद्येवं सन्निहिताः सर्वे पाण्डवाः'इति। घटोत्कचोऽपि भीमं दृष्ट्वा वदति -'अहो दर्शनीयोऽयं पुरुषः य एष' -

सिंहाकृतिः कनकतालसमानबाहुः
मध्ये तनुः गरुडपक्षविलिप्तपक्षः।
विष्णुर्भवेत् विकसिताम्बुजपत्रनेत्रो
नेत्रे ममाहरति बन्धुरिवागतोऽयम्।।

मध्यम इत्याहूते भीमस्यागमनं दृष्ट्वा घटोत्कचः संशयं प्रकटयति 'किं भवानपि मध्यमः?'इति। तच्छ्रुत्वा भीमः -

मध्यमोऽहमवध्यानामुत्सिक्तानां च मध्यमः।
मध्यमोऽहं क्षितौ भद्र! भ्रातॄणामपि मध्यमः।।
मध्यमः पञ्चभूतानां पार्थिवानां च मध्यमः।
भवे च मध्यमो लोके सर्वकार्येषु मध्यमः।।

इति सः स्वमध्यमत्वम् अङ्गीकरोति। घटोत्कचः यदा ब्राह्मणजनान् वित्रासयति तदा तं तस्मात् निवारयितुं यतते भीमसेनः। तत्तस्य कर्तव्यम् इति विश्वसति भीमः। ब्रह्मा, शिवः, विष्णुः, शक्रः, शक्तिधरः, यमः एतैः सर्वैः सदृशः स्वस्य पिता भीमः इति घटोत्कचो अभिप्रैति। भार्यास्नेहः, पुत्रस्नेहश्च तस्य महत्तरमेव। घटोत्कचस्य मातृभक्तिं दृष्ट्वा भीमः अवदत् यत् 'हन्त गुरुशुश्रूषुः खल्वयं तपस्वी'इति। अन्ते भीमः स्वस्य पिता इति ज्ञात्वा घटोत्कचः तस्य पादौ प्रणमति। तदा पुत्रवत्सलः भीमः तमेवम् अवदत् - 'एह्येहि पुत्र! व्यतिक्रमकृतं कान्तमेव। पुत्रापेक्षिणी खलु पितृहृदयानि'इति।

## अस्य दृश्यकाव्यस्य नाम्नः औचित्यम्।

प्रायः नायकस्य, नायिकायाः, प्रधानघटनायाः, कथावस्तुनः वा आधारेण नाटकस्य नाम कुर्यात्। पाण्डवमध्यमः भीमः नाटकस्यास्य नायकः इति चिन्तायां, मध्यम इति नाम्ना तस्य व्यवहाराच्च मध्यममधिकृत्य रचितः व्यायोगः मध्यमव्यायोगः इति नाम। व्यायोगः दशरूपकेषु अन्यतमो भवति। किन्तु अस्मिन् व्यायोगे ब्राह्मणस्य द्वितीयपुत्रः अपि मध्यम इति नाम्ना व्यवहृतः। अतः मध्यमौ अधिकृत्य विरचितः व्यायोगः मध्यमव्यायोगः इति वा केचित् अभिप्रयन्ति।

एवं मध्यमप्रधानो व्यायोगः मध्यमव्यायोगः। यथा स्वप्नप्रधानं नाटकं स्वप्ननाटकम्। प्रतिमाप्रधानं नाटकं प्रतिमानाटकम् तथा। इति मध्यमव्यायोग इति नाम्नः औचित्यम्।

## पुनरावृत्तिः (Recap)

- कुरुजाङ्गलदेशनिवासी वेदज्ञः कश्चित् वृद्धब्राह्मणः आसीत् केशवदासः।
- एकदा सः सभार्यः पुत्रैः सह मातुलस्य यज्ञबन्धोः पुत्रोपनयनकर्मणि सान्निध्यं दातुं वनमार्गेण सञ्चरन्नासीत्। तस्मिन् वने हिडिम्बा नाम राक्षसी अवसत्। तस्याः पुत्रः घटोत्कचो नाम राक्षसः तदा तान् ब्राह्मणान् अन्वचरत्।
- तं दृष्ट्वा भीताः विप्राः ते राक्षसरूपं वर्णयित्वा कोऽयम् इत्याशङ्कां प्रकटयन्ति। एतस्मिन्नन्तरे सः घटोत्कचः ब्राह्मणान् गमनान्निवार्य तत्रैव स्थातुं निर्दिशति। सर्वे भीताः तत्र स्थिताः।
- मातुः पारणायै पुत्रमेकं दास्यति चेत् अन्यान् स्वतन्त्रान् करिष्यति इति घटोत्कचोऽवदत्। तदा ज्येष्ठः पुत्रः पितुः, कनिष्ठः पुत्रः मातुः च प्रियतरौ इति ज्ञात्वा मध्यमः पुत्रः 'पित्रोरनिष्टः कस्येदानीं प्रियः?'इत्युक्त्वा राक्षसम् अनुगन्तुं निश्चिकाय।
- ततः मध्यमः आचमनाय जलाशयम् अगच्छत्। प्रत्यागमने विलम्बिते सति घटोत्कचः 'मध्यम'! 'मध्यम'! इति तम् आह्वयामास।
- एतच्छ्रुत्वा तत्र व्यायामं कुर्वन् भीमसेनः 'कोऽयं मामाह्वयति'इति विचिन्त्य तत्रागच्छति।
- तं दृष्ट्वा घटोत्कचः, 'किं भवानपि मध्यमः?'इति संशयं प्राकटयत्।
- 'अहं सर्वकार्येषु मध्यमः'इति भीमः प्रत्यवदत्। तदा आगच्छन्तं मध्यमकुमारं दृष्ट्वा घटोत्कचः तेन सह गन्तुं उद्युक्तवान्।
- तदा ब्राह्मणः तान् राक्षसात् रक्षितुं भीमम् अभ्यर्थयामास। तदनन्तरं भीमः 'ब्राह्मणकुमारं विमुच्य मां नय'इति घटोत्कचम् अवदत्।
- 'तेन हि भवनेवागच्छतु'इति घटोत्कचः तदङ्गीचकार। अतः तौ बलाबलं परीक्षितुं द्वन्द्वयुद्धम् अकुरुताम्। ततः भीमः तम् अनुससार। तावुभौ हिडिम्बायाः वासस्थानं प्रापतुः तदनु घटोत्कचः मातरं प्राप्य पारणायै पुरुषः आनीतः इत्यवदत्।
- ततः हिडिम्बा तेन सह बहिरागता। आगतं पुरुषं दृष्ट्वा अतिशयिता सा 'आर्यपुत्र'इत्याहूय भीमसेनम् अनमत्।
- भीमः घटोत्कचस्य पिता इति ज्ञात्वा घटोत्कचः पितरम् अनमत्। सर्वे सन्तुष्टाः जाताः। ततः सन्तुष्टः ब्राह्मणः सकुटुम्बम् अगच्छत्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

१. 'मयि विज्ञापनव्यग्रे शब्द इव श्रूयते' - कस्मिन्?

२. मृत्युः पुरुषविग्रहः कः?
३. मयाद्य - विघटयत।
४. 'शङ्के नातिदूरेण पाण्डवाश्रमेण भवितव्यम्' - कस्य वचनमिदम्?
५. पतिमात्रधर्मिणी - का नाम?
६. ततोऽहमेव यास्यामि गुरुवृत्तिमनुस्मरन् - कुतः?
७. अतिराक्षसं खलु ते वचनम् - कस्य वचनमिदम्?
८. प्रकृतिदोषः नाम कः?
९. भवे च मध्यमे लोके सर्वकार्येषु मध्यमः - मध्यमः कः?
१०. मनुष्याणां दैवतानां च दैवतम् - का?

## एकेन वाक्येन द्वाभ्यां वा उत्तराणि लिखत।

**(Answer the following questions in one or two sentences)**

१. सन्त्रस्तवत्सक इव आकुलतामुपैति - कः? कीदृशः?
२. अस्ति मे तत्र भवती जननी तयाहमाज्ञप्तः - आज्ञा का?
३. होष्यामि विधिसंस्कृतम् - किम्?
४. यास्यामि गुरूणां प्राणरक्षणात् - कुतः?
५. जनयति च मनोज्वरं स्वरोऽयं - कस्य स्वरः, कुत्र?

## एकैकया खण्डिकया उत्तराणि लिखत

**(Answer the following questions in a Paragraph)**

१. व्याख्यात -

जानामि सर्वत्र सदा च नाम
द्विजोत्तमाः पूज्यतमाः पृथिव्याम्।
अकार्यमेतच्च मयाद्य कार्यं
मातुर्नियोगादपनीय शङ्कम्।।

२. सर्वकार्येषु मध्यमः - कः? कथम्?

## निर्दिष्टाभ्यासः (Assignments)

१. घटोत्कचस्य स्वभावचित्रणं कुरुत।
२. मध्यममव्यायोगमिति नाम्नः औचित्यं विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

१. सूत्रधारे विज्ञापनव्यग्रे शब्द इव श्रूयते।
२. घटोत्कचः।
३. मया + अद्य।
४. वृद्धब्राह्मणस्य वचनमिदम्।
५. पतिव्रतेति नाम।
६. कुले लोके च ज्येष्ठः श्रेष्ठः पितॄणां सुसंप्रियः, अतः।
७. वृद्धस्य वचनमिदम्।
८. स्वभावदोषः।
९. पाण्डवमध्यमः भीमः।
१०. माता।

## सूचनाग्रन्थौ (References)


1. T.K Ramachandra Aiyer.मध्यमव्यायोगः, महाकवि भासः, Published by R S Vadhyar and Sons, Kalpathi, Palakkad
2. A K Keshavan Acheri. *Madhyamavyayoga of Bhasa*, Published by Agasthya Publications, Anchal.


## अधिकवाचनग्रन्थौ(Suggested Readings)


1. आचार्य श्रीरामचन्द्रमिश्रः, संस्कृतसाहित्येतिहासः, Prof. Dharmasamaja Published by Chaukhamba Vidyabhavan, Varanasi.
2. T.K Ramachanrda Aiyer. *A short history of Sanskrit Literature*, Published by R S Vadhyar and Sons, Kalpathi, Palakkad

**Model Question Paper**

**Set - 01**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ………...............

Name : ………………...

SECOND SEMESTER B.A. SANSKRIT EXAMINATION

LANGUAGE CORE- B21SN01LC - गद्यं नाटकं च।

(CBCS - UG)

2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

---

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।**

## SECTION - A

**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10 x 1=10)**

**(Answer any ten questions in a word or sentence)**

1. हितोपदेशे कति प्रकरणानि सन्ति ?
2. पञ्चतन्त्रस्य कर्ता कः ?
3. चक्रधरस्य सुहृद् कः ?
4. केन विषफलं प्राप्तम् ?
5. सकलशास्त्रपारंगतः ब्राह्मणः कः ?
6. मानवानां सौख्यं कुत्र लभते ?
7. कः मार्गे क्षेमकारकः भवेत्?
8. हास्यप्रधानं रूपकं किम् ?
9. स्वप्नवासवदत्तनाटके नायकः कः ?

10. भासस्य शोकपर्यवसायि नाटकं किम् ?
11. मध्यमव्यायोगस्य कर्ता कः ?
12. हिडिम्ब्याः पुत्रः कः ?
13. आपदं प्राप्तः पिता केन तार्यते ?
14. कृतकृत्यं शरीरं मे परिणामेन जर्जरम्। कस्य शरीरम् ?
15. पाण्डवमध्यमः कः?

## SECTTION - B
## (द्वितीयो भागः)

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** **(5 x 2 = 10)**

**(Answer any five questions in one or two sentences)**

16. नीतिकथायां किं उपदिश्यते ?
17. विद्यापतेः पुरुषपरीक्षाग्रन्थस्य प्राधान्यम् किम् ?
18. पञ्चतन्त्रे कति प्रकरणानि सन्ति ? कानि च तानि?
19. विद्यायाः महत्त्वं प्रतिपादयितुं मूर्खब्राह्मणः किमकरोत्?
20. स मण्डूको रात्रावेवान्यजलाशयं गत: । कुत :?
21. दशरूपकाणां नामानि कानि ?
22. ततोऽहमेव यास्यामि – कः? किमर्थम् ?
23. व्यायोगः नाम किम् ?
24. पाण्डवाः वने असन्निहिताः - कुतः?
25. “मोक्षोऽस्ति समयतः”- सन्दर्भः कः?

## SECTION -C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत ।** **(6 x 5 = 30)**

**(Answer any six questions)**

26. मत्स्यमण्डूककथाया: गुणपाठं विशदयत।
27. भारुण्डपक्षिकथां संक्षिप्य लिखत ।
28. दुष्प्राप्यानि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि।
    अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम्।। ( अन्वयं विलिख्य व्याख्यात।)
29. दरिद्रस्य दयनीयामवस्थां वर्णयत ।
30. बृहत्कथामञ्जरीमधिकृत्य खण्डिकामेकां लिखत।

31. वानरकुलनाशं कथं सम्भूतम् ?
32. प्रकरणस्य लक्षणं सोदाहरणं विशदयत ।
33. कर्णभारमधिकृत्य संक्षिप्य लिखत ।
34. 'अहो दर्शनीयोपुरुषः'– कस्य वचनम्? कदा ? कमधिकृत्य ?
35. "भो ब्राह्मण ! गृह्यतां तव पुत्रः वयमेनमनुगमिष्यामः" । ससन्दर्भं व्याख्यात।
36. 'माता किल मनुष्याणां दैवतानां च दैवतम्।
मातुराज्ञां पुरस्कृत्य वयमेतां दशां गताः'।। - व्याख्यात।
37. 'पतिमात्रधर्मिणी पतिव्रतेति नाम' – सन्दर्भं व्याख्यात।

## SECTION -D
## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत।** **(2 x 10 =20)**

**(Write an essay on any two of the following)**

38. पञ्चतन्त्रानुसारं शास्त्रपराङ्मुखः ब्राह्मणकुमारः इति कथां उपन्यस्यत ।
39. विष्णुशर्मणा रचितं पञ्चतन्त्रमधिकृत्य उपन्यस्यत।
40. नाटकस्य सविशेषतां सोदाहरणं विशदयत।
41. भासनाटकानि अधिकृत्य निरूपयत ।

**Model Question**

**Paper Set - 01**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ……….............

Name : ………………...

SECOND SEMESTER B.A. SANSKRIT EXAMINATION

LANGUAGE CORE- B21SN01LC- गद्यं नाटकं च

(CBCS - UG)

2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।**

## SECTION A

## (प्रथमो भागः)

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** (10x1=10)

**(Answer any ten Questions in a word or Sentence)**

1. बृहत्कथायाः कर्ता कः?
2. वानराः केन मेषं ताडयन्ति स्म ?
3. क्षेमेन्द्रः कदा अजायत ?
4. ब्राह्मणकुमाराः किमर्थं महिलारोप्यं गताः?
5. मत्स्यमण्डूककथायां मण्डूकस्य नाम किम्?
6. लक्ष्मी किं इच्छति ?
7. गौरवयुक्तं कार्यं कैः आलोच्य करणीयम्?
8. नाट्यशास्त्रस्य रचयिता कः?
9. हास्यप्रधानं रूपकं किम्?
10. चारुदत्तनाटके नायिकायाः नाम किम्?

11. मध्यमव्यायोगे कति अङ्कः अस्ति?

12. मध्यमव्यायोगस्य रचयिता कः?

13. वृकोदरः कः?

14. मध्यमव्यायोगे वृद्धब्राह्मणस्य नाम किम्?

15. व्यायोगस्य इतिवृत्तं किम् ?

**SECTION -B**
**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** (5x2=10)

**(Answer any five Questions in one or two sentences)**

16. विष्णुशर्मा तान् राजकुमारान् कथं शिक्षितवान्?

17. कस्मात् कारणात् वानराः वनं गन्तुं विमुखाः बभूवुः?

18. राज्ञः अमरशक्तेः पुत्राः के? ते कीदृशाः आसन्?

19. भैरवानन्दःकीदृशानिधनोपायमार्गाणि व्यपदिशत्?

20. केन सुखप्राप्तिः लभते?

21. गृहीतफलेनैतेन शरीरेणार्थं कुलं च रक्षितुमिच्छामि। लघुटिप्पणिःलिखत।

22. नाटकारंभे किमर्थं नान्दी कार्या?

23. अकार्यमेतच्च मयाद्य कार्यम् – किम् अकार्यम्?

24. यद्येवं सन्निहिताः सर्वे पाण्डवाः वृद्धाः– ब्राह्मणः कुतः एवमवदत्?

25. पाण्डवाः महर्षेः धौम्यस्य आश्रमं गताः। किमर्थम्?

**SECTION - C**
**(तृतीयो भागः)**

**III.केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** (6x5=30)

**(Answer any six Questions)**

26. हितोपदेशः - टिप्पणिं लिखत।

27. सोमदेवमधिकृत्य खण्डिकामेकां लिखत।

28. उदारचरितानां तु वसुधैव कुटुम्बकम् – आशयं विशदयत ।

29. शास्त्रपराङ्मुखं प्रतिनिवर्तयितुं यतन्तौ ब्राह्मणकुमारौ कौ ? कथं सान्त्वयामास?

30. भयमतुलं गुरुलोकात्तृणमिव तुलयन्ति साधुसाहसिकाः।
प्राणानद्भुतमेतच्चरितं चरितं ह्युदाहरणम्।। ( अन्वयं विलिख्य व्याख्यात।)

31. महान्त एव महतामर्थं साधयितुं क्षमाः ।
ऋते समुद्रादन्यः को बिभर्ति बडवानलम्।। ( अन्वयं विलिख्य व्याख्यात।)

32. भासस्य ऊरुभङ्गमधिकृत्य विशदयत ।

33. ईहामृगस्य लक्षणं सोदाहरणं विशदयत।

34. मध्यमव्मयायोगानुसारं भीमसेनस्य कथापात्रनिरूपणं कुरुत।

35. मध्यमव्यायोगमिति नाम्नः औचित्यम् विशदयत।

36. मध्यमव्यायोगे घटोत्कचस्य धीरोदात्तनायकत्वं समर्थयत।

37. 'ब्राह्मणी! न भेतव्यं न भेतव्यम्। पुत्रकाः न भेतव्यम्। साविमर्शा हास्यवाणी'। सन्दर्भं विशदयत।

## SECTION– D
## (चतुर्थो भागः)

**IV.केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** (2x10=20)

**(Write an essay on any two of the following)**

38. सिंहकारकमूर्खब्राह्मणकथां संक्षिप्य लिखत ।

39. कथापठनस्य महत्त्वं प्रतिपाद्य संस्कृतभाषायां वर्तमानानां कथानां विशेषताः विशदयत।

40. भासस्य रचनावैशिष्ट्यं सोदाहरणं निरूपयत।

41. घटोत्कचस्य स्वभावचित्रणं कुरुत।

## Model Question
## Paper Set - 02

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ………...............
Name : ………………...

SECOND SEMESTER B.A. SANSKRIT EXAMINATION
LANGUAGE CORE- B21SN01LC - गद्यं नाटकं च।
(CBCS - UG)
2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

---

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।**

### SECTION - A
### (प्रथमो भागः)

**I.एकेन पदेन वाक्येन वा केषाश्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10 x 1=10)**
**(Answer any ten questions in a word or sentence)**

1. हितोपदेशे कति प्रकरणानि सन्ति ?
2. पञ्चतन्त्रस्य कर्ता कः ?
3. चक्रधरस्य सुहृद् कः ?
4. केन विषफलं प्राप्तम् ?
5. सकलशास्त्रपारंगतः ब्राह्मणः कः ?
6. मानवानां सौख्यं कुत्र लभते ?
7. कः मार्गे क्षेमकारकः भवेत्?
8. हास्यप्रधानं रूपकं किम् ?
9. स्वप्नवासवदत्तनाटके नायकः कः ?

10. भासस्य शोकपर्यवसायि नाटकं किम् ?

11. मध्यमव्यायोगस्य कर्ता कः ?

12. हिडिम्ब्याः पुत्रः कः ?

13. आपदं प्राप्तः पिता केन तार्यते ?

14. कृतकृत्यं शरीरं मे परिणामेन जर्जरम्। कस्य शरीरम् ?

15. पाण्डवमध्यमः कः?

## SECTTION - B
## (द्वितीयो भागः)

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5 x 2 = 10)**

**(Answer any five questions in one or two sentences)**

16. नीतिकथायां किं उपदिश्यते ?

17. विद्यापतेः पुरुषपरीक्षाग्रन्थस्य प्राधान्यम् किम् ?

18. पञ्चतन्त्रे कति प्रकरणानि सन्ति ? कानि च तानि?

19. विद्यायाः महत्त्वं प्रतिपादयितुं मूर्खब्राह्मणः किमकरोत्?

20. स मण्डूको रात्रावेवान्यजलाशयं गत: । कुत :?

21. दशरूपकाणां नामानि कानि ?

22. ततोऽहमेव यास्यामि – कः? किमर्थम् ?

23. व्यायोगः नाम किम् ?

24. पाण्डवाः वने असन्निहिताः - कुतः?

25. "मोक्षोऽस्ति समयतः"- सन्दर्भः कः?

## SECTION -C
## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत । (6 x 5 = 30)**

**(Answer any six questions)**

26. मत्स्यमण्डूककथाया: गुणपाठं विशदयत।

27. भारुण्डपक्षिकथां संक्षिप्य लिखत ।

28. दुष्प्राप्यानि बहूनि च लभ्यन्ते वाञ्छितानि द्रविणानि।
    अवसरतुलिताभिरलं तनुभिः साहसिकपुरुषाणाम्।। ( अन्वयं विलिख्य व्याख्यात।)

29. दरिद्रस्य दयनीयामवस्थां वर्णयत ।

30. बृहत्कथामञ्जरीमधिकृत्य खण्डिकामेकां लिखत।

31. वानरकुलनाशं कथं सम्भूतम् ?
32. प्रकरणस्य लक्षणं सोदाहरणं विशदयत ।
33. कर्णभारमधिकृत्य संक्षिप्य लिखत ।
34. 'अहो दर्शनीयोपुरुषः'– कस्य वचनम्? कदा ? कमधिकृत्य ?
35. "भो ब्राह्मण ! गृह्यतां तव पुत्रः वयमेनमनुगमिष्यामः" । ससन्दर्भं व्याख्यात।
36. 'माता किल मनुष्याणां दैवतानां च दैवतम्।

मातुराज्ञां पुरस्कृत्य वयमेतां दशां गताः'।। - व्याख्यात।

37. 'पतिमात्रधर्मिणी पतिव्रतेति नाम' – सन्दर्भं व्याख्यात।

## SECTION -D

## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत। (2 x 10 =20)**

**(Write an essay on any two of the following)**

38. पञ्चतन्त्रानुसारं शास्त्रपराङ्मुखः ब्राह्मणकुमारः इति कथां उपन्यस्यत ।
39. विष्णुशर्मणा रचितं पञ्चतन्त्रमधिकृत्य उपन्यस्यत।
40. नाटकस्य सविशेषतां सोदाहरणं विशदयत।
41. भासनाटकानि अधिकृत्य निरूपयत ।

# Model Question Paper
## Set - 02

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ………...............
Name : ………………...

SECOND SEMESTER B.A. SANSKRIT EXAMINATION
LANGUAGE CORE- B21SN01LC- गद्यं नाटकं च
(CBCS - UG)
2022-23 - Admission Onwards

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।**

**SECTION A**
**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** (10x1=10)

**(Answer any ten Questions in a word or Sentence)**

1. बृहत्कथायाः कर्ता कः?
2. वानराः केन मेषं ताडयन्ति स्म ?
3. क्षेमेन्द्रः कदा अजायत ?
4. ब्राह्मणकुमाराः किमर्थं महिलारोप्यं गताः?
5. मत्स्यमण्डूककथायां मण्डूकस्य नाम किम्?
6. लक्ष्मी किं इच्छति ?
7. गौरवयुक्तं कार्यं कैः आलोच्य करणीयम्?
8. नाट्यशास्त्रस्य रचयिता कः?
9. हास्यप्रधानं रूपकं किम्?
10. चारुदत्तनाटके नायिकायाः नाम किम्?

11. मध्यमव्यायोगे कति अङ्कः अस्ति?

12. मध्यमव्यायोगस्य रचयिता कः?

13. वृकोदरः कः?

14. मध्यमव्यायोगे वृद्धब्राह्मणस्य नाम किम्?

15. व्यायोगस्य इतिवृत्तं किम् ?

**SECTION -B**
**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** (5x2=10)

**(Answer any five Questions in one or two sentences)**

16. विष्णुशर्मा तान् राजकुमारान् कथं शिक्षितवान्?

17. कस्मात् कारणात् वानराः वनं गन्तुं विमुखाः बभूवुः?

18. राज्ञः अमरशक्तेः पुत्राः के? ते कीदृशाः आसन्?

19. भैरवानन्दःकीदृशानिधनोपायमार्गाणि व्यपदिशत्?

20. केन सुखप्राप्तिः लभते?

21. गृहीतफलेनैतेन शरीरेणार्थं कुलं च रक्षितुमिच्छामि। लघुटिप्पणिःलिखत।

22. नाटकारंभे किमर्थं नान्दी कार्या?

23. अकार्यमेतच्च मयाद्य कार्यम् – किम् अकार्यम्?

24. यद्येवं सन्निहिताः सर्वे पाण्डवाः वृद्धाः– ब्राह्मणः कुतः एवमवदत्?

25. पाण्डवाः महर्षेः धौम्यस्य आश्रमं गताः। किमर्थम्?

**SECTION - C**
**(तृतीयो भागः)**

**III.केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** (6x5=30)

**(Answer any six Questions)**

26. हितोपदेशः - टिप्पणिं लिखत।

27. सोमदेवमधिकृत्य खण्डिकामेकां लिखत।

28. उदारचरितानां तु वसुधैव कुटुम्बकम् – आशयं विशदयत ।

29. शास्त्रपराङ्मुखं प्रतिनिवर्तयितुं यतन्तौ ब्राह्मणकुमारौ कौ ? कथं सान्त्वयामास?

30. भयमतुलं गुरुलोकात्तृणमिव तुलयन्ति साधुसाहसिकाः।
प्राणानद्भुतमेतच्चरितं चरितं ह्युदाहरणम्।। ( अन्वयं विलिख्य व्याख्यात।)

31. महान्त एव महतामर्थं साधयितुं क्षमाः ।
ऋते समुद्रादन्यः को बिभर्ति बडवानलम्।। ( अन्वयं विलिख्य व्याख्यात।)

32. भासस्य ऊरुभङ्गमधिकृत्य विशदयत ।

33. ईहामृगस्य लक्षणं सोदाहरणं विशदयत।

34. मध्यमव्मयायोगानुसारं भीमसेनस्य कथापात्रनिरूपणं कुरुत।

35. मध्यमव्यायोगमिति नाम्नः औचित्यम् विशदयत।

36. मध्यमव्यायोगे घटोत्कचस्य धीरोदात्तनायकत्वं समर्थयत।

37. 'ब्राह्मणी! न भेतव्यं न भेतव्यम्। पुत्रकाः न भेतव्यम्। साविमर्शा हास्यवाणी'। सन्दर्भं विशदयत।

## SECTION– D
## (चतुर्थो भागः)

**IV.केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** **(2x10=20)**

**(Write an essay on any two of the following)**

38. सिंहकारकमूर्खब्राह्मणकथां संक्षिप्य लिखत ।

39. कथापठनस्य महत्त्वं प्रतिपाद्य संस्कृतभाषायां वर्तमानानां कथानां विशेषताः विशदयत।

40. भासस्य रचनावैशिष्ट्यं सोदाहरणं निरूपयत।

41. घटोत्कचस्य स्वभावचित्रणं कुरुत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres

### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

गद्यं नाटकं च

COURSE CODE: B21SN01LC

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-963059-0-1
9 788196 305901